M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 55

Title: Mitaksara With Yajnavalkya Smriti

55

with Yajnavalkya Smriti

:		Mitāksharā	: **Title**
:	:	Vignanèshvara	: Author
:	:	(Ācara & Prayascitta	: Editor
:	:	Kandas only)	: Year, Vols.
:	:		: Publisher
55 :	:	M. E.	: Remarks

श्रीगणेशायनमः

कारुइति।कारवोरजकचैलधावकसूपकाराद्यास्तेषांहस्तःशुचिः।शुचित्वंचितंतत्साध्येकर्मणिवस्त्रधावनादौस्प
र्शकादिसंनवेदिति॥तथाचमनुःनरे॥कारवःशिल्पिनोवैद्यादासीदासास्तथैवच॥राजानोराजभृत्याश्चसद्यः
शौचाःप्रकीर्तिताःइति॥पुण्यंपुण्यार्हविक्रेयंयवव्रीह्यादितदनेककर्तृजनकरपरिगृहीतमप्यप्रयतैर्नेन
भवति॥तत्रकादिनिमित्तेचवणिजांनिरूपणंसप्रसूपोनैनंतत्प्रसवाचार्यादिगतंप्रकाशतं॥६॥स्त्रीबालानाति॥
इदानींभूशुद्धिमाह॥भूतशुद्धिमार्जनंदाहःकालोयावतातत्केलेनलेपनयोल्लवनितावान्गोक्रमणंगवांप्र
दपरिवर्हणंसेकःक्षीरगोमूत्रगोमयवारिभिःप्रवर्षणंवा॥उल्लेखनंतक्षणंखननंवा॥लेपोगोमया
कारुःहस्तःशुचिःपण्यंभैक्षंयोषिन्मुखंतथा॥६॥भूशुद्धिर्मार्जनाद्दाहात्कालाद्गोक्रमणात्तथा॥सेकादुल्लेख
नाल्लेपाद्गृहंमार्जनलेपनात्॥७॥आदिभिरेतैर्मार्जनादिभिर्यथाव्यस्तैःसमस्तैर्वामेध्याद्युपहतमलिनाचभूमिःशुध्यति॥
यत्रप्रसूयतेनारीम्रियतेदह्यतेपिवा॥चांडालाध्युषितंयत्रविष्ठादिसंगतिः॥एवंकश्मलभूयिष्ठाभूरमेध्या
प्रकीर्तिता॥श्वसूकरखरोष्ट्रादिसंस्पृष्टादुष्टतांव्रजेत्॥अंगारतुषकेशास्थिभस्माद्यैर्मलिनाभवेत्इतिदेवलः॥
इत्यमेध्यादुष्टामलिनेतित्रयोभेदाभूमेस्तत्रविधमनिश्चायशुद्धिविज्ञानंदर्शयति॥पंचधाचचतुर्धाचभूरमेध्यावि
शुध्यति॥दुष्टाद्वित्रिविधादेवाशुध्यतेमलिनैकधा॥इति॥यत्रमनुष्यादह्यंतेयत्रचांडालैरध्युषितंतयोःपंचभिः

दहनकालं गोक्रमणं सेकोल्लेखनैः शुद्धिः॥ यत्र मनुष्या जायंते म्रियंते यत्र चान्ने न विष्ठादिसंगतिता सा दाहखननादि
ते स्मैरेव चतुर्भिः स्वल्पकालं स्थिरकालमध्युषिता या सेकगोक्रमणोल्लेखनैस्त्रिभिः कृष्ठ्यामकुर्कुटादि निश्चि
रकालमधिवासिता या सेकोल्लेखनानां शुद्धिः॥ ल्पं गामनुषादि निश्चिरकालमधिवासिता याः उल्लेखनाच्छु
द्धिः मार्जनानुलेपनेन तु सर्वत्र समुच्चीयते॥७॥ गोघ्राते इति॥ गोनिश्वासोपहते भक्षणीयमात्रे तथा मक्षिका
कन्नाकीटैर्दूषिते केशास्रहरोमलोमादि प्रसिद्धम्॥ कीटाः पिपीलिकादयः उदकेन भस्मना मृदा यथासंभवं प्रक्षेप्तव्यं

गोघ्राते अन्ने तथा केशमक्षिकाकीटदूषिते॥ सलिलं भस्म मृद्वापि प्रक्षेप्तव्यं विशुद्धये॥८॥ त्रपुसीसकताम्राणां क्षा
राम्लोदकवारिभिः॥ भस्माद्भिः कांस्यलोहानां शुद्धिः प्लावो द्रवस्य तु॥९॥ शुध्यर्थं यत्तु गोतमेनोक्तं निःसमनोत्पं

केशकाकीटोपपन्नमिति तत्केशकाकीटादिभिः सहपक्वस्यान्नविषयं॥८॥ त्रपु इति॥ त्रपुप्रभृतीनि तेषां क्षारोदके
नाम्लोदकेन वारिणा च उपघातापेक्षया व्यस्तैः समस्तैर्वा शुद्धिः कार्या॥ कांस्यलोहानां भस्मोदकेन
नस्राम्लोदकेन वारिणा॥ एतच्च ताम्रादीनामम्लोदकादिभिः शुद्धयनि
।ताम्रग्रहणात् रीतिकाहस्तलोहयोर्ग्रहणं। एकशीतितान्॥ नस्मनच्छोधने प्रोक्तं सामानां द्रव्यशुद्धिकृदिति वि
धानेन नियमार्थं॥ मलसंयोगजं येषां येनापहन्यते॥ न सर्वत्र वेनियमेनाः शुद्धिः कार्या॥ अत एव
त्रोषस्मरणात् स्मृतीनां ताम्रादेरुच्छिष्टोदकादिलेपस्यामेध्येनानेमसंनवेनियमेनाः शुद्धिः
मनुना॥ ॥

सामान्येनोक्तं॥ ताम्रायःकांस्यरैत्यानां त्रपुणः सीसकस्य च॥ शौचं यथार्हं कर्तव्यं क्षाराम्लोदकवारिभिः॥ यत्तु
नस्मनाशुध्यते कांस्यं ताम्रमम्लेन शुध्यतीति॥ तन्नोक्ताः शौचस्य परं काष्ठां प्रतिपादयितुं तान् निषेधाय
यदापुपघातः। तिस्रायस्तदाम्लोदकादीनामावृत्तिः॥ गवां घ्राणानि॥९॥ स्मरणतांशुद्धिः आवाद्रव्यस्य
त्विति द्रवद्रव्यस्य घृतादेः प्रस्थप्रमाणाधिकस्य श्वकाद्युपहतस्यामेध्यसंस्पर्शाद्वा भावः भ्रावनं समानजातीये
नद्रव्येणानोदस्यातिपूरणं यावन्निःसरणं शुद्धिरिति मनुवचनं तं॥ अतो ल्पस्य त्यागः स बकल्पं च देशकालापे
क्षया वेदितव्यं यथाह बौधायनः॥ देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनं॥ उपपत्तिमवस्थां च ज्ञात्वा शौ

गवां घ्राणि च कांस्यानि शूद्रोच्छिष्टानि यानि च॥ शुध्यंति दशभिः क्षारैः श्वकाकोपहतानि च॥१०॥

चं प्रकल्पयेत्॥ कीटाद्युपहतस्य त्वन्नस्य प्लवनं। यथाह मनु॥ द्रव्याणां चैव सर्वेषां शुद्धिरुत्प्लवनं स्मृतं॥ उ
त्पवनं चात्र वस्त्रान्तरितेपात्रे प्रक्षेपात् अन्यथा कीटाद्युपगमासंभवात्॥ स्तद्भनोऽडल्पितं तस्तु मधूदकादेः। पा
त्रांतरनयनाच्छुद्धिः॥ मधूदके पयः तद्विः॥ मधूदके पयः तद्विकाराश्च पात्रांतरनयनात् शुद्धिरिति बोधायनस्म
रणात्॥ मधु घृतादेर्वर्णांसदहस्यात्वा भस्मपात्रांतरनयनं पुनः पचनं कार्यं॥ यथाहशंखः॥ अन्नं व्यवहार्य
णघृतादिना नियारितानां पुनः॥ एवं स्नेहानामपि हवन सानामिति॥ एवं वर्णरजतादीनमेतत्र प्रकरणप्रति
पादितानां सर्वेषां उच्छिष्टस्पर्शाद्युपघातशुद्धिरुक्ता॥१०॥ ॥

मि० श्रा०
५१

इदानीं तेषामेवामेध्योपहतानां शुद्धिमाह ॥ अमेध्येति ॥ अमेध्याः शरीरजाः मलाः वसाशुक्रादयः ॥ वसाशुक्रमसृ
ङ्मज्जामूत्रविट्कर्णविड्नखाः ॥ श्लेष्माश्रुदूषिकास्वेदो द्वादशैते नृणां मलाः ॥ तथा मानुषास्थि शवं विष्ठा रेतः मूत्र
र्तवं वसा ॥ स्वेदाश्रुदूषिकाश्लेष्म मद्यं चामेध्यमुच्यते ॥ इति मनुदेवलादिप्रतिपादिताः ॥ तैर्वसादिभिर्लिप्त
तस्य मृदा तोयेन च शुद्धिः कार्या ॥ गंधापकर्षणेन गंधग्रहणं लेपस्यापि ग्रहणं ॥ यथाह गौतमः ॥ लेपगंधापक
र्षणे शौचममेध्यलिप्तस्येति सर्वशुद्धिषु च प्रथमं तोयैरेव लेपगंधापकार्यः ॥ अत्र कालं वैनन्तरं द्विरष्टं मृदा चेति

अमेध्याक्तस्य मृत्तोयैः शुद्धिः गंधापकर्षणात् ॥

गौतमवचनात् वसादिग्रहणं सर्वेषाममेध्यत्वप्रतिपादयितुं न सामान्येनोपघातायाय ॥ मद्यमूत्रपुरीषश्ले
ष्मपूयाश्रुशोणितैः ॥ संस्पृष्टं नैव शुध्येत पुनःपाकेन मृन्मयमिति पयात विशेषाभिधानात् ॥ अमेध्य
स्पर्शे स्नानं ॥ यथाह देवलः ॥ मानुषास्थि वसां विष्ठामार्तवं मूत्ररेतसी ॥ मज्जानं शोणितं स्पृष्ट्वा स्वर
स्स्नानमाचरेत् ॥ तान्येव स्वानि संस्पृश्य प्रक्षाल्याचम्य शुध्यतीति ॥ ऊर्ध्वं नाभेः करौ मुक्त्वा यदंगमुपहन्यते
॥ तत्र स्नानमधस्तात्तु प्रक्षाल्याचम्य शुध्यतीति ॥ ॥ +वचैषां देवलाद्युक्तममन्त्रस्तुताः निवचनादृष्टे
+दसुतानामेव मेध्यानां वस्त्रिनो पुरुषस्य नाभेरूर्ध्वं करव्यतिरिक्तांगानामामे
ध्य+

द्वि० प्रा०
५१

कृतोपि ययोमांकरयोचेमनसोपरितोषाय च शुद्धिसंदेहस्य शाकवासं शुचिरशुद्धमेतदस्मातिबालान
चेनेनशुद्ध भवतीत्यर्थः ॥ अंबुनिर्णिक्तं यस्य प्रति परोक्षाद्यदिनास्तितस्य प्रक्षालनेन शुद्धिः ॥ प्रक्षालनासह
सप्रोक्षणेन च तानं च सदा युक्ता काद्युपदतिपूर्वेनक दापिन्नायते तच्छुचि तदुपभोगादष्टादोषोदो
षोनास्तीत्यर्थः ॥ नन्वेतद्विरुध्यते ॥ सर्वत्र रसैकमपि चरेत्कृच्छ्रं द्विजोत्तमः ॥ अज्ञातं तु कश्चिदर्थं
ज्ञातस्य च विशेषनः ॥ इत्यादृष्टदोषे प्रायश्चित्तप्रतिपादनात् ॥ नैतत्प्रायश्चित्तस्य जग्धिविषयत्वात् दोषा
शाकवासमंबुनिर्णिक्तमज्ञातं च सदा शुचिः ॥ १९ ॥ भुवि गोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतं ॥ तथा मांसं च
चांडालक्रव्यादादिनिपातितं ॥ २० ॥
वस्त्रवान्तोपयोगविषयत्वात् ॥ १९ ॥ शुचीति ॥ भूमिस्थमुदकमेकस्या
वितृप्तिजननसमर्थं चांडालादिभिरस्पृष्टं प्रकृतिस्थं रूपरसगंधस्पर्शांतरमनापन्नं शुचि विघ्नाचमनादियोग्यं
भवति ॥ महीगतमिति अशुद्धभूतस्य शुचित्वनिषेधार्थं ॥ नन्वेतत् उदकस्य शुद्धिप्रपादनमर्थं ॥ नाभ्युद्धृतस्य
दृताश्चापि शुचयंति ॥ शुचैः पात्रैः समुद्धृतः एकरात्रोषितास्त्रोपस्मात्पाः शुद्धाश्चपि स्वयमपि देवलवचनाद
ति ॥ तथा चांडालादिकृततडागादौ न दोषः ॥ अमेरपि कृते कूपे सतो वाकादिके तथा ॥ तत्र स्नात्वा तत्पी
त्वा च प्रायश्चित्तेन विद्यते इति व्यासतात परस्मरणात् ॥ तथा मांसं श्व चांडालक्रव्यादादिनिपातितं ॥ ॥

मि० आ० ५२ शुचिः श्वादिवत्। ब्राह्मणकरादेरपि ग्रहणं॥ निपातितग्रहणं नक्षितस्य निराकरणार्थं॥१२॥ रश्मीति॥ रश्मयः
सूर्यादिप्रकाशद्रव्यस्य। अग्निः प्रसिद्धः। रजो जातिव्यतिरेकेण तत्र श्वकाकोष्ट्रखरोलूकरज्ञामपहितं॥ अ
जाविरेणुसंस्पर्शादायुर्लक्ष्मीश्च हीयत इति दोषश्रवणात् संमार्जनादिकार्यं॥ छाया वृक्षादेः गोः अश्वश्च व
सुधा भूमिः अनिलो वायुः विप्रुषो वक्त्रपायबिंदवः मुखजानां वक्ष्यमाणत्वात्॥ मक्षिकाश्च एते चांडालादि
स्पृष्टा अपि अशुचयः॥ वत्सः प्रस्नवने अधोगतदुग्धाकर्षणे शुचिः वत्सग्रहणं बालस्योपलक्षणं॥ बालैरनुप
रत्नपरम्परिरजश्छाया गौरश्वो वसुधानिलः॥ विप्रुषो मक्षिकाः स्पर्शे वत्सः प्रस्नवने शुचिः॥१३॥ अजाश्वमुखतो मेध्यं
न गोर्न नरजा मलाः॥ पंथानश्च विशुध्यंति सोमसूर्यांशुमारुतैः॥१४॥ श्मश्रु चास्यागतं दंतसक्तं त्यक्त्वा ततः शुचि
रिक्तांतनिर्मं मेध्यमिति स्थितिरिति वक्ष्यमाणत्वात्॥१३॥ अजेति॥ अजाश्वयोर्मुखं मेध्यं। न गोर्न नरजा मलाः नरत्वादे
लेढ्दाण्यादेहमलनिष्ठत्वे। नरजा मला वसादयो न मेध्याः॥ पंथानो मार्गाश्चांडालादिस्पृष्टा अपि रात्रौ सोमांशुमारु
तैर्नेन च शुध्यंति॥ दिवा च सूर्यांशुमारुतैः मुखजा विप्रुषो मेध्यास्तथाचमनबिंदवः॥१४॥ मुखे जाता मुखजाः श्लेष्म
विप्रुषो मेध्या नोच्छिष्टं अपतिताश्चेदंगेन मुखाद्विप्रुषः उच्छिष्टं कुर्वंति न च देहे पतंतीति गौतमस्मरणात्॥ तथाच
मनबिंदवः आचामतो ये बिंदवः पादौ स्पृशंति तेपि मेध्याः॥ श्मश्रु चास्यप्रविष्टं उच्छिष्टं न करोति॥ दंतसक्तं चान्नादि
कं स्वयमेव च्युतं सत्काशुचिर्निर्वेत्॥ ॥ रा+ त्रि० ५२

च्युतं तु दंतवत्समं॥ तथाच गौतमः॥ दंतसक्ते क्लिष्टेषु दंतवदिति अजिह्वानिमर्शनात्प्राक् च्युतेरित्येके॥
च्युतेष्वास्रावद्विद्यान्निगिरन्नेव तच्छुचिरिति॥ निगरणात्तु पुनरनेन यावत्तत्कवलो नागेन विकल्प्यते॥ निगर
णेनैवैष एवकारः॥ ताम्बूले फले चैव भुक्तस्नेहावसिष्टके दंतलग्नस्य संस्पर्शे नोच्छिष्टो भवति द्विज इति स्मृत्यंतरप्रस्मर
णात्॥१५॥ स्नात्वेति॥ स्नात्वा पीत्वा क्षुते चर्वणे इति॥१६॥ इति विद्युत्कावमननिषेधार्थं॥ तांबूलग्रहणं
फलाद्युपलक्षणार्थं॥ तांबूले च फले चैव भुक्त... स्वप्ने भोजने रथ्या अप्रसर्पणे वासो विपरिधाने शुक्र
चर्वणे त्वाचमेन्नित्यं मुक्त्वा तांबूलचर्वणं॥ ओष्ठौ विलोमकौ स्पृष्ट्वा वासो विपरिधाय च॥१५॥ स्नात्वा पीत्वा क्षुते सु
त:३ प्ते भुक्त्वा रथ्यापसर्पणे॥ आचांतः पुनराचामेत् वासो विपरिधाय च॥१६॥ नेषु आचांतः पुनराचामेत् द्विराचामेदित
र्थः॥ चकाराद्गोधनाध्ययनारंभ... लान्तेभ्योक्तादिषु॥ तथाच वासिष्ठः॥ सुप्त्वा भुक्त्वा क्षुत्वा स्नात्वा पीत्वा रुदित्वा
तः पुनराचमेदिति॥ मनुरपि॥ कृत्वा सुप्त्वा च भुक्त्वा च निष्ठीव्योक्त्वानृतं वचः॥ पीत्वापोध्येष्यमाणश्च आचा
मेत्प्रयतोपि सन्निति॥ भोजने त्वादौ चिक्षिद्विराचमनं भोक्ष्यमाणः प्रयतोऽपि द्विराचमेदित्यापस्तंबस्मरणात्॥ अ
न्नानपानयोरादौ सूक्तं तत्राध्ययनेऽपि चारंभे द्विः। शेषं तु यथोक्तं द्विराचमनं॥ रथ्याकर्दमतोयानि स्पृष्टान्यंत
श्ववायसैः॥ मारुतेनैव शुध्यंति पक्वेष्टकचितानि च॥१७॥ रथ्यामार्गः॥ रथ्यास्थानि कर्दमतोयानि अंत्यादिस्पृष्टानि मा
रुतेनैव शुध्यंति॥ बहुजनसंचरणत गोमये॥ ॥

यत्रार्करादित्राद्यर्थं पक्षेष्टचकिता निधवल्लग्रहणादीनि च ॥ एतच्च श्रोत्रियाणां संहतानामित्युक्तं श्रोत्रियाणां निषेधार्थं
॥ नृणां काष्ठपाषाणादीनां तु प्रोक्षणमेवेति ॥१९७॥ ॥ इति द्रव्यशुद्धिप्रकरणम् ॥ ॥ इदानीं दानधर्मं प्रतिपादयिष्य
स्तदंगभूतपात्रं प्रतिपादयिष्यंस्तत्रादौ तावदाह ॥ तपस्तेति ॥ ब्रह्मा हिरण्यगर्भः कल्पादौ तपस्तप्त्वा ध्यानं कृ
त्वा कान्मुख्यान्सृजामीति पूर्वं ब्राह्मणानसृष्टवान् ॥ किमर्थं वेदगुप्तये श्रुतिरक्षणार्थं पितॄणां देवानां च तृप्त्यर्थं
अनुष्ठानोपदेशद्वारेण धर्मरक्षणार्थं च ॥ अतस्तेभ्यो दत्तमक्षयफलं भवतीत्यभिप्रायः ॥१॥ सर्वस्येति ॥ स

तपस्तप्त्वासृजद्ब्रह्मा ब्राह्मणान्वेदगुप्तये ॥ तृप्त्यर्थं पितृदेवानां धर्मसंरक्षणाय च ॥१॥ सर्वस्य
प्रभवो विप्राः श्रुताध्ययनशालिनः ॥ तेभ्यः क्रियापराः श्रेष्ठास्तेभ्योऽप्यध्यात्मवित्तमाः ॥ २॥

र्वस्य क्षत्रियादेर्विप्राः प्रभवाः श्रेष्ठा जात्या कर्मणा च ब्राह्मणेष्वपि श्रुताध्ययनशालिनः ॥ श्रुताध्ययन
संपन्ना उत्कृष्टाः तेभ्योऽपि क्रियापरा विहितानुष्ठानशीलास्तेभ्योऽप्यध्यात्मवित्तमाः ॥ वक्ष्यमाणमार्गेण शमद
मादियोगिन आत्मतत्त्वज्ञाननिरताः श्रेष्ठाः स्युरुपपन्नते ॥२॥ एवं जातिविद्यानुष्ठानतपसां प्रत्येकमुत्कर्षेण
कैयोगेन पात्रतामभिधायाधुना तेषां समुच्चये संपूर्णपात्रतामाह ॥ ॥ ॥श्रीरामायनमः॥ ॥नमः॥

नेति ॥ केवलया विद्यया श्रुताध्ययनसंपन्नानैव संपूर्णपात्रत्वं नैव केवलेन तपसा शमदमादिनापि वा केव
लानुष्ठानेनैो केवलजात्या वा नैव संपूर्णपात्रता ॥ कथं तर्हि यत्र पुरुषे वृत्तमनुष्ठानं इमे चोभे विद्यातपसी स्तः
चशब्दाद्ब्राह्मणजातिश्च ॥ तादृग्मन्वादिभिः संपूर्णपात्रं प्रकीर्तितं ॥ हि यस्मादतः परमुत्कृष्टं पात्रं नास्ति ॥ अनेन च
जातिविद्यानुष्ठानतपःसमुच्चयानामुत्तरोत्तरप्रशस्त्येन फलतारतम्यं द्रष्टव्यं ॥३॥ गोभूइति ॥ पूर्वोक्ते पात्रे गवा
दिकमर्चितं गन्धोदकदानादीतिकर्तव्यतासहितं देयं ॥ अपात्रे क्षत्रियादौ ब्राह्मणे चैपतितादौ विदु

न विद्यया केवलया तपसा वापि पात्रता ॥ यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितं ॥३॥
गोभूतिलहिरण्यादि पात्रे दातव्यमर्चितं ॥ नापात्रे विदुषा किंचिदात्मनः श्रेय इच्छता ॥४॥ ॥

षा पात्रविशेषेण फलविशेषं ॥ श्रेयः संपूर्णफलमिच्छता किंचिदल्पमपि दातव्यं ॥ श्रेयोग्रहणादपा
त्रादानेपि तामसंकल्पमस्तीति सूचितं ॥५॥ यथाह कृष्णद्वैपायनः ॥ अदेशकाले यद्दानमपात्रे
यत्प्रदीयते ॥ असत्कृतमविज्ञातं दातव्यमिति वदता वसिष्ठेन देशकालद्रव्यसन्निधौ पात्रस्यासन्निध
ने द्रव्यस्य तदुद्देशेन त्यागं तस्मै प्रतिश्रवणं श्रवणं वा तत्तोसमर्प्पयेन्न त्वपात्रे दातव्यमिति सूचितं ॥

प्रतिश्रुतमपि पश्चात्साजकादिसंयोगेपि न देयं॥ प्रतिश्रुतार्थधर्मसंयुक्ताय न दद्यादिति निषेधात्॥४॥ अपात्रे दातृ
निषेधमुक्त्वा प्रतिग्रहीतारं प्रत्याह॥ विद्येति॥ विद्यातपोभ्यां हीनेन प्रतिग्रहः सुवर्णादिदानं न ग्राह्यः॥ यस्माद्विद्यावि
हीनं प्रतिगृह्णन्दातारमात्मानं च अधो नरकं प्रापयामिति॥५॥ गवादिपात्रे दातव्यमित्युक्तं तत्र विशेषमाह
॥दातव्यमिति॥ प्रतिदिवसं शक्त्यनुसारेण यथोक्तविधिना पात्रे गवादिकं स्वकुटुंबाविरोधेन दातव्यं॥ निमित्तेषु

विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः॥ गृह्णन्प्रदातार
मधो नयत्यात्मानमेव च॥५॥ दातव्यं प्रत्यहं पात्रे निमित्तेषु वि
शेषतः॥ याचितेनापि दातव्यं श्रद्धापूतं तु शक्तितः॥ ६॥

चंद्रोपरागादिषु विशेषेषु अधिकं यत्नेन दातव्यं॥ याचितेनापि श्रद्धापूतं श्रद्धया पवित्रीकृतं शक्त्या दातव्यं
॥ याचितेनापि दातव्यमिति वदता पात्रं स्वयमेव गत्वाऽऽहूय वा यद्दानं तन्महाफलमुक्तं॥ तथा स्म
रणं॥ गत्वा यद्दीयते दानं तदनंतफलं स्मृतं॥ सहस्रगुणमाहूय याचिते तु तदर्धकं॥६॥ ॥ ॥उत्तम॥

मि॰आ॰
५४

गवादिकं देयमित्युक्तं तत्र दाने विशेषमाह॥ हेमशृंगीति॥ हेममये शृंगे यस्याः सा हेमशृंगी शफैः रूप्यैः राजतैः
:खुरैः संयुता वस्त्रेण च संयुता॥ कांस्यपात्रसहिता बहुक्षीरा गौर्यथाशक्ति दक्षिणासहिता दातव्या॥७॥ गो
दानस्य फलमाह॥ दातेति॥ अस्याः गोरोमसंमितान्संख्याकान्वत्सरान्स्वर्गमाप्नोति दाता॥ कपिला तद्दान
केवलं दातारं तारयति॥ किंतु कुलमप्यासप्तमं मम निवाप्य पित्रादीन्पुत्रादीन् षट् आत्मानं सप्तमं च

हेमशृंगी शफै रौप्यैः सुशीला वस्त्रसंयुता॥ सकांस्यपात्रा दातव्या क्षीरिणी गौः सदक्षिणा॥७॥
दातास्याः स्वर्गमाप्नोति वत्सरान्रोमसंमितान्॥ कपिला चेत्तारयेत्तु पुरुषांसप्तमं कुलं॥ ८॥ सव
त्सारोमतुल्यानि युगान्युभयतोमुखी॥ दातास्याः स्वर्गमाप्नोति पूर्वेण विधिना ददत्॥ ९॥ ॥

ख्यर्याधन्दयप्राह॥८॥ सवत्सेति॥ वत्सरोमतुल्यानि वत्सेन सह वर्तत इति सवत्सा तस्या रोमतुल्यानि व
त्सस्य गोश्च यावंति रोमाणि तावत्संख्याकानि युगानि कृत्वा नेतादीनुभयतोमुखीं ददत्स्वर्गमवाप्नोत्यनु
भवति॥ पूर्वेण विधिना दाता चेत्॥९॥ का पुनरुभयतोमुखी कथं वा तद्दानं महाफलं तत्राह॥ ॥ ॥

मि॰ क्षा॰ ५५

यावदिति॥गर्भान्निगच्छतो वत्सस्य यौ पादौ मुखं च योन्यां दृश्यते॥तावत्कालमुभयतोमुखी उभयतो मुखमस्यास्तीति
उभयतोमुखी॥यावत्कालं गर्भं न मुंचति तावद्गौः पृथिवी ज्ञेया फलातिशयो युक्तः॥यथाकथंचिद्दत्वा गां धेनुं वाधे
नुमेव वा अरोगामपरिक्लिष्टां दाता स्वर्गे महीयते॥यथाकथंचिदिति हेमशृंगादौ घासंभवेपि यथासंभवं पूर्वोक्तेन।
विधिना धेनुं दोग्ध्रीमधेनुं वा अवंध्यामरोगां रोगरहितामपरिक्लिष्टामत्यंता दुर्बलां गां दत्वा दाता स्वर्गे मही

यावद्वत्सस्य पादौ द्वौ मुखं योन्यां च दृश्यते॥तावद्गौः पृथिवी ज्ञेया
यावद्गर्भं न मुंचति॥१०॥श्रांतसंवाहनं रोगिपरिचर्या सुरार्चनं॥
पादशौचं द्विजोच्छिष्टमार्जनं गोप्रदानवत्॥११॥ ॥उत्तमः॥

यते पूज्यते॥१०॥गोदानसमान्याह॥श्रांत इति॥श्रांतस्यासनस्थापनादिदानेन श्रमापनयनं श्रांतसंवाह
नं॥रोगिणां परिचर्या यथाशक्त्यौषधादिदानेन सुरार्चनं हरिहरहिरण्यगर्भादीनां गंधमाल्यादिनाराध मि॰
नं पादशौचं द्विजानां समानाधिकानां वा॥तेषामेवोच्छिष्टस्य संमार्जनं॥एतान्यनंतरोक्तगोदानेन समानि ५५
॥११॥

दृष्टि॥भूः फलप्रदा दीपो देवतायतनादिषु प्रतिश्रयं प्रवासिनामाश्रयः॥निवेशनाय गृहं स्वार्थं यत्कन्यादिदीयते त
न्नैवेशिकं॥स्वर्णं सुवर्णं धुर्यो वाहसमर्थो बलीवर्दः शेषं प्रसिद्धं॥एतान्दीपान्दत्वा स्वर्गलोके पूज्यते स्वर्गफलत्वं
भूमिदानादीनां न फलांतरव्युदासार्थं॥१२॥यत्किंचिदिति॥पापरिफलांतरप्रवणात् गोचर्ममात्रं लक्षणं बृहस्पति

दीपश्चान्नवस्त्रांभस्तिलसर्पिःप्रतिश्रयान्॥नैवेशिकस्वर्णधुर्यान्दत्वा स्वर्गे महीयते॥१२॥यत्किंचित्कु
र्वतः पापं ज्ञानतोऽज्ञानतोपि वा॥अपि गोचर्ममात्रेण भूमिदानेन शुध्यति॥१३॥वारिदस्तृप्तिमाप्नोति सु
खमक्षय्यमन्नदः॥तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमं॥वासोदश्चांद्रसालोक्यमाश्विसालोक्यमश्व
दः॥१४॥दशहस्तेन दंडेन त्रिंशद्दंडानि वर्तनं॥दशतान्येव गोचर्म दत्वा स्वर्गे महीयते॥१५॥गृहधान्याभ
योपानच्छत्रमाल्यानुलेपनं॥यानं वृक्षं प्रियं शय्यां दत्वात्यंतं सुखी भवेत्॥१६॥
नादरिति॥१४॥१५॥दत्वाह
स्नेनेति॥गृह धामानि धान्यानि गोधूमादीनि॥अभयं भीतानां त्राणं॥उपानहौ छत्रं माल्यं मल्लिकादेः अनुले
पनं कुंकुमचंदनादी यानं रथ्यादि वृक्षमुपजीव्यमाम्रादिकं प्रियं यद्यस्य प्रियं धर्म्यादिकं शय्यां च दत्वात्यं
तं सुखी भवति॥न च हिरण्यादिवद्धस्ते दातुमशक्यत्वाद्धर्मस्य दानासंभवात् भूमिदानादीवपि समानत्वात्॥॥
॥१६॥

मि०आ०
५६

स्मत्संतरेपिधर्म्मदानश्रवणात्॥देवतानामिति॥अपुण्यदानेनतद्देवत्वदत्तेप्रतिग्रहितुरपिलोभादीनाप्रवृत्त
स्यपापमवलंहत्वाप्रतिगृह्णातिदुर्म्मतिः॥गर्हिताचरणस्तस्यपापतामाश्रयेसुनः॥समप्रविगुणसाहस्रमा
नंसंप्रदानानिरितिमनुस्मरणात्॥इहचसर्वत्रदेशकालपात्राणिविशेषणान्यत्वविशेषणानुदानफल
रतम्यंद्रष्टव्यं॥१७॥सर्वधर्म्मेति॥यस्मात्सर्वधर्ममयंब्रह्मसर्ववबोधकत्वेनतस्मात्तद्दानंसर्वदानेभ्योधिकंअत

देवतानांगुरूणांचमातापित्रोस्तथैवच॥पुण्यंदेयंप्रयत्नेननापुण्यंनवतिकिंचित्॥१७॥स
र्वधर्म्ममयंब्रह्मप्रदानेभ्योधिकंयतः॥तद्ददत्समवाप्नोतिब्रह्मलोकमविच्युतं॥१८॥प्रतिग्र
हसमर्थोपिनादत्तेयःप्रतिग्रहं॥यल्लोकादानशीलानांसतानाप्नोतिपुष्कलान्॥१९॥ ॥

तद्ददध्यापनादिद्वारेणब्रह्मलोकमवाप्नोति॥अविच्युतंविच्युतिर्नभवति॥आभूतसंप्लवंब्रह्मलोकेवतिष्ठ शिव०
तइति॥अत्रचब्रह्मदानेपरस्वत्वापादानमात्रंदानंतच्चविद्यायांकर्तुमशक्यत्वात्॥१८॥दानफलमुक्तमिदा ५६
नव्यतिरेकेणापिदानफलावाप्तिहेतुमाह॥प्रतीति॥यःपात्रभूतोपिप्राप्तंप्रतिग्रहंसुवर्णादिकंनादत्तेनस्वी
करोति॥असौयएवम्भावंप्रतिपादितत्वेनतत्रदानशीलानांयेलोकास्तान्समग्रानाप्नोति॥१९॥ ॥उनमः॥

दत्तानीसर्वप्रतिग्रहविनिवृत्तिप्रसंगेअपवादमाह॥कुशाइति॥धानाभृष्टाम्लंडुलाः॥क्षितिर्मृत्तिका॥शेषंप्रसिद्धं
॥एतानकुशादिकंस्वयमुपनीतंनप्रत्याख्येयंचकाराद्गृहादिगन्धाग्निपर्ययोगात्तकुशातृणगंधनपःपुष्पमणिदधिम
स्यान्नधानाःपयोमांसंशाकंचैवननिर्णुदेत्॥तथाएधोदकंमूलफलमन्नमभ्युद्यतंचयत्॥सर्वतःप्रतिगृह्णी
यान्मध्वथाभयदक्षिणामितिस्मरणात्॥२०॥किमितिनप्रत्याख्येयंतत्रसाह॥आयाचितेति॥यस्मादयाचि

कुशाःशाकंपयोमत्स्यागंधाःपुष्पंदधिक्षितिः॥मांसंशय्यासनंधानाःप्रत्याख्येयंनवारिच॥२०॥अयाचि
ताहृतंग्राह्यमपिदुःकृतकर्म्मणः॥अन्यत्रकुलटाषंढपतितेभ्यस्तथाद्विषः॥२१॥देवातिथ्यर्चनकृतेगुरुभृ
त्यार्तवृत्तये॥सर्वतःप्रतिगृह्णीयादात्मवृत्त्यर्थमेवच॥२२॥

तामेतत्कुशाद्याहृतंदुष्कृतकारिणोपिसंबंधेग्रा
ह्यं॥किमुतपयोक्तकारिणीनस्मात्नप्रत्याख्येयं॥अन्यत्रकुलटाषंढपतितेभ्यः॥शत्रोश्च॥कुलात्कुलम
टतीतिवेतिकुलासैरिण्यादिकाषंढस्तृतीयाप्रकृतिः॥२१॥प्रतिग्रहनिवृत्तेरपवादांतरमाह॥देवेति॥देवातिथ्यर्च
नादेरावश्यकत्वात्तदर्थं॥अनापत्कारणमतिताद्यसंतकुत्सितवर्जंसर्वतःप्रतिगृह्णीयात्॥गुरवोमातापि
त्रादयःभृत्यानरणीयाभार्यापुत्रादयः॥२२॥ ॥इतिदानधर्म्मप्रकरणं॥ ॥

म०श्रा० इदानीं श्राद्धप्रकरणमारभ्यते॥ श्राद्धं नामात्मीयतत्स्थानं यस्य चाद्धस्य प्रेतोद्देशेनाग्नद्ययासागः॥ तच्च द्विवि
५१ धं पार्वणमेकोद्दिष्टं चेति॥ तत्र त्रिपुरुषोद्देशेन यत्क्रियते तत्पार्वणं॥ एकपुरुषोद्देशेन क्रियमाणमेको
द्दिष्टं॥ पुनश्च त्रिविधं॥ नित्यं नैमित्तिकं काम्यमिति॥ तत्र नित्यं नियतनिमित्तोपाधौ चोदितमहरहःअ
मावास्याष्टकादिषु॥ अनियतनिमित्तोपाधौ चोदितं नैमित्तिकं॥ यथा पुत्रजन्मादिषु॥ फलकामनोपाधौ चो
दितं काम्यं॥ यथा स्वर्गादिकामानां कृत्तिकादिषु नक्षत्रेषु॥ पुनश्च पंचविधं॥ अहरहःश्राद्धं पार्वणं वृद्धिश्रा

अमावास्याष्टकावृद्धिः कृष्णपक्षोयनद्वयं॥ ॥

द्धं एकोद्दिष्टं सपिंडीकरणं चेति॥ तथा च अहरहःश्राद्धमन्नं पितृमनुष्येभ्यः इत्यादिनोक्तं॥ अधुना पार्वणं वृ
द्धिश्राद्धं दर्शयिष्यन् सूर्येन्दोः कालानाह॥ अमावास्येति॥ यत्र दिने चंद्रमा न दृश्यते सा अमावास्या तस्यामहर्द्वयस्या श्रा०
पि सापराह्णव्यापिनी ग्राह्या॥ अपराह्णः पितॄणामिति वचनात्॥ अपराह्णः पंचधा विभक्ते दिने चतुर्थो भागस्त्रि ५१
मुहूर्तः॥ अष्टकाश्चतस्रः॥ हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीश्चाष्टका इत्याश्वलायनोक्ताः॥ वृद्धिः पु
त्रजन्मादिः॥

कृष्णपक्षोऽपरपक्षः॥ अयनद्वयं दक्षिणोत्तरसंज्ञं॥ द्रव्यं कृशरमांसादिकं॥ ब्राह्मणसंपत्तिर्वक्ष्यमाणा॥ विषुवद्वयं मे
षतुलयोः सूर्यगमने सूर्यसंक्रमः॥ आदित्यस्य राश्यंतरगमनं॥ अयने विषुवोः संक्रांतिर्वेति विशेषयुगपादानं
फलातिशयप्रतिपादनार्थं॥ १॥ व्यतीपात इति॥ व्यतिपातो योगविशेषः॥ गजच्छाया यदेन्दुः पित्र्यदैवे तदा हंसश्चै
व करे स्थितः॥ याम्या तिथिर्भवेत्सा हि गजच्छाया प्रकीर्तितेति॥ परिभाषितात् हस्तिच्छायेति केचित् सिंहे हंसगते

द्रव्यं ब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमः॥ १॥ व्यतीपातो गजच्छाया ग्रहणं चंद्रसूर्ययोः॥
श्राद्धं प्रति रुचिश्चैव श्राद्धकालाः प्रकीर्तिताः॥ २॥ अग्र्याः सर्वेषु वेदेषु श्रोत्रियो वेदविद्युवा॥

कालप्रक्रमात्॥ ग्रहणं चंद्रसूर्ययोरुपरागः॥ यदा च कर्तुः श्राद्धं प्रति रुचिर्भवति तदापि च श्राद्धं युगादिश्र
मयः॥ एते श्राद्धकालाः॥ यद्यपि सूर्यचंद्रग्रहणे नाद्यात् ग्रहणे भोजननिषेधः॥ तथापि नोक्तकर्तृदोषो दातुर
मुख्यः॥ २॥ अहरहःश्राद्धव्यतिरिक्तैः वक्ष्यमाणचतुर्विधश्राद्धे ब्राह्मणसंपत्तिमाह॥ अग्र्य इति॥ सर्वेषु वेदेषु
विदादिषु मनस्कतयाप्यस्खलिताध्ययनक्षमाः अग्र्याः॥ श्रोत्रियः श्रुताध्ययनसंपन्नः वक्ष्यमाणब्रह्मयोर्वि
क्षेत्रीति॥

ब्रह्मवित्युवा मध्यमवयस्कः॥ सर्वस्मिंद् विशेषणं॥ मंत्रब्राह्मणयोरर्थं वेत्तीति वेदार्थवित्॥ ज्येष्ठसामेतिसाम
विशेषः॥ तदध्ययनांगव्रतं च तद्व्रताचरणेन यस्तदधीते स ज्येष्ठसामा॥ त्रिमधुर्ऋग्वेदैकदेशस्तद्व्रतं च तद्व्र
ताचरणेन तदध्यायी त्रिमधुः॥ त्रिसुपर्णमिग्यजुषोरेकदेशस्तद्व्रतं च॥ तदाचरणेन यस्तदधीते स त्रिसुपर्णि
कः॥ एते ब्राह्मणाः श्राद्धसंपद इति क्रियासंबधः॥ स्वस्त्रीय इति॥ ३॥ स्वस्त्रीयो भागिनेयः॥ ऋत्विगुक्तल

वेदार्थविज्ज्येष्ठसामत्रिमधुस्त्रिसुपर्णिकः॥ ३॥ स्वस्त्रीयऋत्विग्जामातृयाज्यश्वशुरमा
तुलाः॥ त्रिणाचिकेतदौहित्रशिष्यसंबंधिबांधवाः॥ ४॥ कर्मनिष्ठास्तपोनिष्ठाः पंचाग्निब्रह्मचारि
णः॥

क्षणः॥ जामाता दुहितुर्भर्त्ता॥ त्रिणाचिकेतं यजुर्वेदैकदेशस्तद्व्रतं चास्तद्व्रताचरणेन तदध्यायी त्रिणाचिकेतः॥
श्चन्यत्प्रसिद्धं एते च पूर्वोक्ताः श्रोत्रियाद्यभावे वेदितव्याः॥ अनुकल्पस्तु विशेषः॥ सदासन्निरगर्हितत्
संनिधाय मनुना स्वस्त्रीयादीनाम निहितत्वात्॥ ५॥ कर्म्मनिष्ठा विहितानुष्ठानतत्पराः॥ तपोनिष्ठास्तप
स्विनः॥ सभ्यावसथ्यौ त्रेताग्नयश्च यस्य संति स पंचाग्निः॥ पंचाग्नी वेदाध्यायी च ब्रह्मचारी उप ॥ ॥

उपकुर्वाणको निष्ठकश्च॥ मातृपितृपरास्तच्छुश्रूषापराः चकारात् ज्ञाननिष्ठादयो ब्राह्मणाः नक्षत्रियादयः॥
श्राद्धसंपदः श्राद्धस्य च निःसंपत्ति हेतवः॥ ५॥ वर्ज्यानाह॥ रोगीति॥ रोगी महारोगोपसृष्टः हीनमतिरिक्तं वांगं य
स्यास्तीति स हीनातिरिक्तांगः॥ एकेनाक्ष्णा यो न पश्यति स काणः॥ तस्मादेवांधबधिरविद्धप्रजननखल्वति
दुश्चर्मप्रभृतयो निरस्ताः॥ पुनर्भूः उक्तलक्षणा तस्यां जातः पौनर्भवः॥ अवकीर्णी ब्रह्मचर्यव्रतस्थः स्खलितब्रह्मचर्य
ः॥ कुंडगोलकौ परदारेषु जायेते तेन द्वौ सुतौ कुंडगोलकौ पत्यौ जीवति कुंडस्तु मृते भर्त्तरि गोलकः इत्येवं लक्षणौ कु

पितृमातृपराश्चैव ब्राह्मणाः श्राद्धसंपदे॥ ५॥ रोगी हीनातिरिक्तांगः काणः पौनर्भवस्तथा॥ अवकीर्णी कुंड
गोलौ कुनखी श्यावदंतकः॥ ६॥ भृतकाध्यापकः क्लीबः कन्यादूष्यभिशस्तकः॥ मित्रध्रुक् पिशुनः सोमवि
क्रयी परविंदकः॥ ७॥

नखी संकुचितनखः॥ श्यावदंतकः स्वभावकृष्णदन्तः॥ एते श्राद्धे निंदिता इति वक्ष्यमाणेन
संबंधः॥ भृतकेति॥ वेतनग्रहणेन यो ध्यापयति स भृतकाध्यापकः वेतनदानेन यो धीते सोपि क्लीबो न
पुंसकः॥ असद्भिः सद्भिर्वा दोषैः कन्यादूषयीता॥ कन्यादूषी महापातकादिना नियुक्तो भिशस्तः॥ मित्रध्रु
ङ्मित्रस्यापकारी परदोषसंकीर्त्तनशीलः पिशुनः सोमविक्रयी॥ यत्तु सोमस्य विक्रेता परविंदकः॥ ॥

श्रा० ५९ परिवेत्ता ज्येष्ठे अकृतदारे कृताग्निपरिग्रहे वा यः कनीयान् दारसंग्रहं करोति॥ अग्निपरिग्रहं वा कुर्यात्स परिवे
त्ता ज्येष्ठस्तु परिवित्तिः॥ यथाह मनुः॥ दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते॥ परिवेत्ता स विज्ञेयः परिवित्ति
स्तु पूर्वज इति॥ एवं दानयाजकावपि॥ परिवित्तिः परिवेत्ता च यया च परिविद्यते॥ सर्वे ते नरकं यान्ति दातृयाजकपं
चमा इति वचनात्॥ ७॥ मातेति॥ विना कारणेन यः मातापितृगुरून् त्यजति स मातापितृगुरुत्यागी॥ एवं त्या
ज्यस्तु तत्याग्यपि दृष्टौ च मातापितरौ साध्वी नार्यास्तु तत्त्वशिष्युः॥ अपकार्यन्नानं कृत्वा तत्त्वामनुरब्रवीत् इति

मातापितृगुरुत्यागी कुण्डाशी वृषलात्मजः॥ प
रपूर्वापतिस्तेन कर्मदुष्टाश्च निन्दिताः॥ ८॥ ॥

समाननिर्देशात्॥ वृषलो निर्धर्मास्तत्सुतो वृषलात्मजः॥ परपूर्वा पुनर्भूः पुनर्भूस्तस्याः पतिः स्तेनस्तु दारापहारी स्तेनः॥
कर्मदुष्टाः शास्त्रविरुद्धकारिणः॥ चकारात् कितवदेवलकप्रभृतयः॥ एते श्राद्धे निन्दिताः प्रतिषिद्धाः॥ अत्र सर्वेषु वे शिव० ५९
देषि सादिना श्राद्धयोग्यब्राह्मणानां प्रतिपादनेनैव तद्व्यतिरिक्तानामयोग्यत्वे सिद्धे पुनः केषांचित् रोगादीनां प्रति
षेधवचनमुक्तलक्षणब्राह्मणासंभवे प्रतिषेधरहितानां ग्राह्यमर्थं॥ ८॥ तदेवं श्राद्धकालान् ब्राह्मणांश्चोक्त्वाधुनापा
र्वणप्रयोगमाह॥ ॥

निमंत्रयेदिति॥ पूर्वोक्तान् ब्राह्मणान् श्राद्धे क्षणः क्रियतामिति पूर्वेद्युर्निमंत्रयेत्॥ प्रार्थनायां क्षणमनुपगमाय द
परेद्युर्वा पूर्वेद्युः परेद्युर्वा श्राद्धकर्मण्युपस्थिते निमंत्रयेत् त्र्यवरान् सम्यग्विप्रान् यथोदितान्॥ इति मनुस्मरणा
त्॥ आत्मवांछोकोन्मादरहितः स्वस्थः॥ यथात्मवन्नियतेन्द्रियो न वेत्॥ तैः पितिमंत्रितैर्ब्राह्मणैर्मनोवाक्का
यव्यापारैः संयतैर्भवितव्यमिति॥ ९॥ अपराह्ण इति॥ अपराह्णे उक्तलक्षणान्निमंत्रितान् ब्राह्मणान् गृ

निमंत्रयेत पूर्वेद्युर्ब्राह्मणानात्मवान् शुचिः॥ तैश्चापि संयतैर्भाव्यं मनोवाक्कायकर्मभिः॥ ९॥
अपराह्णे समभ्यर्च्य स्वागतेनागतांस्तु तान्॥ पवित्रपाणिराचान्तानासनेषूपवेशयेत्॥ १०॥
अह्नो मुहूर्ता विख्याता दश पंच च सर्वदा॥ तत्राष्टमो मुहूर्तो यः स कालः कुतपः स्मृतः॥ ११॥ ॥

स्वागतवचनेन पूजयित्वा कृतपादवनामाचान्तान् दर्भेष्वासनेषु पवित्रपाणिरुपवेशयेत्॥ यद्यपि सामान्येना
पराह्ण इत्युक्तं तथापि कुतपारम्भ आदिपंचमुहूर्तेषु परिसमापनं श्रेयस्करं॥ १०॥ अह्न इति॥ मध्याह्ने स
र्वदा यस्मान्मंदीभवति भास्करः तस्मादनन्तफलदस्तत्रारम्भो विशिष्यते ऊर्ध्वं मुहूर्तात् कुतपाद्यन्मुहूर्तं च तुष्टयं मु
हूर्तपंचकं ह्येतत्स्वधाभवनमिष्यते इति वचनात्॥ तत्यामदपि श्राद्धोपयोगि कुतपसप्तकमुक्तं॥ ११॥ ॥

प्र० श्रा० मध्याह्नः खड्गपात्रं च तथा नेपालकंबलः ॥ रूप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृत इति ॥ पापं कुत्सितमि
६० त्याहुस्तस्य संतापकारिणः ॥ अष्टावेते यतस्तस्मात् कुतपा इति विश्रुताः ॥ दैवे इति ॥ दैवे अभ्युदयिके श्राद्धे
युग्मान् समान् ब्राह्मणानुपवेशयेत् ॥ कथं यथाशक्ति शक्तिमनतिक्रम्य तत्र वैश्वदेवे द्वौ मात्रादीनां तिसृ
णामेकैकस्मा द्वौ द्वौ तिसृणां वा द्वौ ॥ एवं पित्रादीनामेकैकस्य द्वौ द्वौ त्रयाणां वा द्वौ ॥ एवं मातामहादीनां त्रया
णामपि वैश्वदेवे द्वौ यथातंत्रं वा ॥ पित्र्ये पार्वणश्राद्धे अयुग्मान् विषमानुपवेशयेत् इति संबध्यते ॥ एतच्च परिश्रु

दैवे युग्मान् यथाशक्ति पित्र्ये ऽयुग्मांस्तथैव च ॥ परिश्रुते शुचौ देशे दक्षि
णाप्रवणे तथा ॥ १२ ॥ द्वौ दैवे प्राक् त्रयः पित्र्ये उदगेकैकमेव वा ॥

ते सर्वतः परिश्रुते आच्छादिते ॥ शुचौ गोमयादिनोपलिप्ते ॥ दक्षिणाप्रवणे दक्षिणतो ऽवनते कार्यं ॥ १२ ॥ द्वौ इति ॥ अ
युग्मानित्यत्र इति पार्वणश्राद्धे ॥ नन्वेवं वैश्वदेवे युग्मप्रसंगः इदमारभ्यते ॥ दैवे वैश्वदेवे द्वौ ब्राह्मणौ प्राङ्मुखावुप त्रि० व०
वेशयेत् ॥ पित्र्ये अयुग्मानिति वचनात् प्रसंगविशेषमुच्यते ॥ त्रयः पश्च इति ॥ पित्रादिस्थाने त्रयः उदङ्मुखानुपवेशये ६०
त् ॥ पक्षांतरमाह ॥ एकैकमेव वा वैश्वदेवे पित्र्ये च एकैकमुपवेशयेत् संभवतो विकल्पः ॥ ॥ ॐ नमः ॥

मातामहानामपि श्राद्धे निमंत्रणादिकौ दैवे प्राक् उदङ्मुखास्त्रयः पित्र्ये एकैकमेव मंतव्यं पितृश्राद्धं च कर्तव्यं
॥ पितृश्राद्धे मातामहश्राद्धे च वैश्वदेविकं वैश्वदेवं तंत्रेण वा कर्तव्यं ॥ यदा तु सर्वत्र ब्राह्मणो लब्धो न दैवे वैश्व
देवपात्रं प्रकल्प्य अन्नं यत्नेनैकैकं ब्राह्मणं नियुंज्यात् ॥ यथाह वसिष्ठः ॥ यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत् ॥
अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य च ॥ देवतायतने कृत्वा ततः श्राद्धं प्रवर्तयेत् ॥ प्रास्येदग्नौ तदन्नं तु दद्याद्वा ब्रह्म

मातामहानामप्येवं तंत्रं वा वैश्वदेविकं ॥ १३ ॥ पाणिप्रक्षालनं
दत्वा विष्टरार्थं कुशानपि ॥ आवाहयेदनुज्ञातो विश्वे देवास इत्यृचा ॥ १४ ॥

चारिणे इति ॥ १३ ॥ पाणीति ॥ तदनंतरं वैश्वदेवार्थं ब्राह्मणहस्ते जलं विष्टरार्थं कुशांश्च युग्मान् द्विगुणिता
न् आसने दक्षिणतो दत्वा ॥ विश्वान् देवानावाहयिष्ये इति ब्राह्मणान् पृष्ट्वा तैरावाहयेत्यनुज्ञातो विश्वे देवास आ
गतेत्यृचा न पाश्चाच्छ्रुतमाहात्म्या ॥ विश्वेदेवा महाबलाः येयत्र विहिताः श्राद्धे सावधाना भवंतु ते ॥ इत्यनेन स्मा
र्तेन मंत्रेणावाहयेत् ॥ एतच्च यज्ञोपवीतिना प्रदक्षिणं कार्यं ॥ अपसव्यं ततः कृत्वा पितॄणां प्रदक्षि
णमिति विशेषश्रवणात् ॥ ॥

।न० श्रा० ६१

पवैइति॥ततोवैश्वदेवार्थब्राह्मणसमीपभूमिंप्रदक्षिणेनयवैराकीर्यानंतरंतैजसादिनोजनेसपवित्रके। कुश
युग्मांतर्हितेशन्नोदेवीरभीष्टयइत्यनयर्चाप्रक्षिप्यायवोसीधान्यराजासिवेत्यादिनामंत्रेणयवान्॥ततोगंधपुष्पा
दिनिचक्षिप्यानंतरमर्घपात्रेपवित्रांतर्हितेपुत्रालक्षणहस्तेषुयादिव्याआपःपयसेत्यादिनामंत्रेणविश्वेदे
वाइदंवोर्घ्यइत्यर्घोदकंविनिक्षिपेत्॥१५॥दत्वोदकइति॥गंधपुष्पधूपदानसदीपकतथाछादनदानंचगंधा

यवैरन्ववकीर्याथ भोजनेसपवित्रके॥शंनोदेव्यापयःक्षिप्त्वायवोसीतिय
वांस्तथा॥यदिव्याइतिमंत्रेणहस्तेत्वर्घंविनिक्षिपेत्॥१५॥दत्वोदकंगंध
माल्यंधूपदानंसदीपकं॥अथकरग्रीवार्घमुदकंदत्वायथाक्रमं॥१६॥

दीनीचसम्यक्तंतरोक्तोविशेषोदृश्यः॥चंदनकुंकुमकर्पूरागुरुपद्मकान्यनुलेपनीयानीतिविष्णुनोक्तपुष्पाणिच॥
श्राद्धेनासःप्रशस्ताःसुमल्लिकाश्वेतयुथिका॥जलोद्भवानिसर्वाणिकुसुमानिचचंपकंइत्याधुक्तानिकर्माणिच शि० ६१
॥उग्रगंधान्यगंधीनिचैत्यवृक्षोद्भवानिच॥पुष्पाणिवर्जनीयानिरक्तवर्णानियानिच॥कंजाटकिजमपिभक्तंसुगं
धिपत्रंदद्यान्नरक्तंदद्यात्रक्तमपिकुंकुमजलजंचदद्यात्॥इत्येवमादीनि[illegible]॥धूपेविशेषोविष्णुनोक्तः॥
नि

प्राण्यंगंसर्वंधूपार्थेनदद्यात्॥घृतमधुसंयुक्तंगुग्गुलश्रीखंडागुरुदेवदारुसरलानि॥दीपेचविशेषः।शंखेनोक्तःघृते
नदीपोदीतव्यस्तिलतैलेनवापुनर्वापुनः॥वसामेदोद्भवंदीपंप्रयत्नेनविवर्जयेत्॥आच्छादनंचशुक्लंनवमहतं
सदशंदद्यादिति॥एतच्चसर्वंवैश्वदेवानुष्ठानकांडस्तुउदङ्मुखःकुर्यादिति॥पित्र्यंकांडंदक्षिणामुखः॥यथाहप्र
तानपः॥उदङ्मासार्वणोसर्वंदैवपूर्वंविधानतः॥इति॥१६॥अपसव्यमिति॥ततोवैश्वदेवकांडानंतरंअपसव्यंयज्ञो
पवीतंप्राचीनावीतंकृत्वाअवततेइतिवदताकांडानुसमयोदर्शितः॥पित्रादीनांत्रयाणामपुष्पात्कुशांद्वि

अपसव्यंततःकृत्वापितॄणामप्रदक्षिणं॥द्विगुणांस्तुकुशान्दत्वा
ह्युशंतस्त्वेतिवापितॄन्॥आवाह्यतदनुज्ञातोजपेदायंतुनस्ततः॥१७॥

णनयाअप्रदक्षिणंवामतोविष्टरार्घमासनेपूर्ववद्दत्वापुनरुदकंदद्यात्अपःप्रदापद्विगुणभुग्नांकुशान्द
त्वापःप्रदापयेत्साम्प्रत्यापनस्मरणात्॥तदाघ्नयोरुदकदानंवैश्वदेवेपित्र्येचप्रतिपादार्थंद्रष्टव्यं॥अ
पपितॄनिमान्पितामहांश्चप्रपितामहांश्चावाहयिष्यइतिब्राह्मणान्पृष्ट्वावाहयेतितैरनुज्ञातउशंतस्त्वानिधी
महीत्यनयर्चापित्रादीनावाह्यायंतुनःपितरइत्यादिमंत्रेणोपतिष्ठेत्॥१८॥ ॥ ॥

।न०श्रा० यवार्थेति॥ यवार्थायवसाध्यानिकार्याणिचवकरणादीनितिलैःकर्त्तव्यानि॥ ततोऽर्घपात्रेसाधनाद्याच्छा
६२ दनांतंपूर्ववत्कुर्यात्॥ तत्रायंविशेषः॥ तिलान्त्रअपहताअसुरारक्षांसीत्यादिनामंत्रेणब्राह्मणान्
रितोऽवदनंनामवकीर्यरजतादिपात्रेषुत्रिषुत्रिषुयुग्मकुशनिर्मितकूर्चांतर्हितेषुशंनोदेवीरिति
मंत्रेणपःक्षिप्त्वातिलोसिसोमदेवेसत्यादिमंत्रेणतिलानांपुष्पाणिक्षिप्त्वास्वधार्घ्याइतिब्राह्मणानांपु
रतोऽर्घपात्राणिस्थापयित्वायादिव्याइतिमंत्रांतेपितृरिदंतेऽर्घ्यंपितामहेदंतेऽर्घ्यंप्रपितामहेदंतेऽर्घ्य

यवार्थास्तुतिलैःकार्याःकुर्यादर्घादिपूर्ववत्॥ दत्वार्घ्यसंस्रवा
न्तेषांपात्रेकृत्वाविधानतः॥ पितृभ्यःस्थानमसीतिन्युब्जंपात्रंकरो
त्वधः॥१२॥

मितिब्राह्मणानांहस्तेत्वर्घ्यंदद्यादेकैकशुनयत्रवेत्यस्मिन्नपिपक्षेपात्रत्रयंकार्यं॥ एवमर्घ्यंदत्वातेषाम शिव०
र्घ्याणांसंस्रवांब्राह्मणहस्तगलितानर्घोदकानिपितृपात्रेगृहीत्वादक्षिणाग्रकुशास्तंबन्भूमौनिधायतस्यो ६२
परिपितृभ्यःस्थानमसीतिमंत्रेणतत्पात्रंन्युब्जमधोमुखंकुर्यात्तस्योपरिपवित्राणिनिदध्यात्॥ अनंतरं
गंधपुष्पदीपाच्छादनानिपितरयंतेगंधःपितरिदंतेपुष्पमित्यादिप्रयोगेणदद्यात्॥१९॥ ॥ ॥

अग्नौइति॥ अनंतरमग्नौकरिष्यन्घृतप्लुतंघृताक्तमन्नमादायब्राह्मणान्पृच्छेदग्नौकरिष्यइतिपृच्छतयहणं
स्रुपणकादिनिष्क्रमर्थं॥ ततस्तैःकुरुष्वेत्यनुज्ञातःप्राचीनावीतीधामुपसमाधायमेक्षणेनादायावदानसं
पदाजुहुयात्॥ सोमायपितृमतेस्वधानमोऽग्नयेकव्यवाहनायस्वधानमइतिपिंडपितृयज्ञकल्पेनाग्नौहुतामे
क्षणमनुप्रहृत्यहुतशेषंमन्नमयंवर्जयथालाभोपपन्नेषुविशेषतोरौप्येषुपित्रादिनाजनेषुदद्यान्नवैश्वदेवेनो

अग्नौकरिष्यन्नादायपृच्छत्यन्नंघृतप्लुतं॥ कुरुष्वेत्यभ्यनुज्ञातोहुत्वाग्नौपितृयज्ञवत्॥१०॥ हुतशेषंप्रदद्या
च्चनेजषुसमाहितः॥ यथालाभोपपन्नेषुरौप्येषुचविशेषतः॥११॥

जनेषुसमाहितोनाममनस्कः॥ अत्रायम्
पग्नाविसविशेषेणोक्तं॥ तथाचाहिताग्नेःसर्वाधानपक्षेपामनाग्नेरभावात्॥ पिंडपितृयज्ञानंतरंनाविनिपा
वणश्राद्धेविहितंदक्षिणाग्नेःसन्निधानान्नो॥ कर्मस्मार्त्तंविवाहाग्नौवित्तस्यापवाददर्शनात्॥ यथाहमार्कंडे
यः॥ आहिताग्निस्तुजुहुयाद्दक्षिणाग्नौसमाहितः॥ अनाहिताग्निस्त्वौपसदेऽग्न्यभावेद्विजेऽप्सुवा॥ अर्धाधानपक्षेतो
पसनाग्निसद्भावात्॥ आहिताग्नेरनाहिताग्नेश्चयौपासनाग्नावग्नौकरणहोमः॥ एवमन्वष्टकादिषुचतुर्थपिपि

उपनिषयत्तकल्पे प्रदेशात्॥ काम्यादिषु चतुर्षु श्राद्धेषु पाणावेव होमः॥ यथा दुर्गाद्यकारः॥ अन्वष्टक्यं पूर्वेद्यु
र्मासि मासि च पार्वणं॥ काम्यमभ्युदये ष्टम्यां एकोद्दिष्टं तथाष्टमं॥ चतुर्ष्वाद्येषु साग्नीनां वह्नौ होमो विधीयते॥ पि
त्र्यब्राह्मणहस्ते स्यादुत्तरेषु चतुर्ष्वपीति अस्यार्थः॥ होमं त्रिनिरयो श्चतुर्णामपरपक्षाणामष्टमी द्वष्टकी इत्यष्ट
कानि दिनानि तत्र नवम्यां यक्रियते तदन्वष्टक्यं॥ सप्तम्यां तु क्रियमाणं पूर्वेद्युः मासि मासि कृष्णपक्षे पंचमीप्रभृति
षु यस्यां कस्यांचित्तिथावष्टकादेशेन यद्विहितं॥ अमावास्यायां पिंडपितृयज्ञानंतरं यद्विहितं तत्पार्वणं॥ सर्वादि
कामानां कृत्तिकादिनक्षत्रेषु यद्विहितं तत्काम्यं॥ अभ्युदये पुत्रोत्सवादिषु तडागारामदेवताप्रतिष्ठादिषु यद्वि
तं अष्टम्यां याष्टका विहिता एकोद्दिष्टं॥ अत्रैकोद्दिष्टशब्देन सपिंडीकरणं लक्ष्यते॥ तत्रैकोद्दिष्टस्यापसव्यत्वा
त् साक्षादेकोद्दिष्टे तदभावात् अग्नौकरणस्याभावादित्यर्थः॥ अथवाग्रहणनाप्यकारस्य साक्षादेकोद्दिष्टस्यापि पाणि हो
मस्य सद्भावात्॥ साक्षादेकोद्दिष्टमेव॥ एतेषामष्टानामाद्येषु चातुर्षु साग्निकस्याग्नौ होमः॥ उत्तरेषु चतुर्षु पितृब्राह्म
णहस्ते पुनिरग्निकस्यापि प्रमीतपितृकस्याहिताग्नेर्यस्य पार्वणं नित्यमिति॥ तस्य पार्वणे वै वह्नौ होमः॥ तन्निर्वपति यः श्राद्धं
प्रमीतपितृको द्विजः॥ इंदुक्षये मासि मासि प्रायश्चित्ती भवेत्तु स इति वचनात्॥ एवं काम्याभ्युदयिक एकोद्दिष्टेषु पा
णावेव॥ अग्निनाशे तु विप्रस्य पाणावेवोपपादयेत् इति मनुस्मरणात्॥ पाणिदत्तमाष्टयग्रासवनिषेधसूक्ष्मा
स्मा

यथा दुर्गाद्यकारकः॥ अन्नं पाणितले दत्तं पूर्वमश्नात्यबुद्धयः॥ पितरस्तेन तृप्यंति शेषान्नं न लभंति ते॥ य
च्च पाणितले दत्तं यच्चान्यदुपकल्पितं॥ एकीभावेन भोक्तव्यं पृथग्भावो न विद्यते इति॥ २१॥ दत्त्वेति॥ तत्र वैश्व
देवे यज्ञोपवीती विष्णो हव्यं रक्षेति प्राचीनावीती विष्णो कव्यं रक्षेति॥ विष्णो हव्यं च कव्यं च ब्रूयात् रक्षेति विक्रमा
दिति स्मरणात्॥ २२॥ संव्याहृतिमिति॥ अनंतरं विश्वेभ्यो देवेभ्य इदमन्नं आतृप्तेरिति यवोदकेन निवेदयेत् तथा पित्रे

दत्त्वान्नं पृथिवी पात्रमिति पात्राभिमंत्रणं॥ कृत्वेदं विष्णुरित्यन्ने द्विजांगुष्ठं निवेशयेत्॥ २२॥
सव्याहृतिकां गायत्रीं मधुवाता इति त्र्यृचं॥ जप्त्वा यथासुखं वाच्यं भुंजीरंस्तेपि वाग्यताः॥ २३॥

अमुकसगोत्रायामुकशर्मणे इदमन्नं परिविष्टं परिवेक्ष्यमाणं चातृप्तेरिति॥ परिवेक्ष्यमाणं चान्नं मे चातृप्ते
रिति॥ तिलोदकप्रदानेन पित्रे निवेद्य एवं पितामहाय प्रपितामहाय निवेदनानंतरमापोशनं दत्त्वा पूर्वोक्तानि
व्याहृतिभिः सहितां गायत्रीं मधुवाता इति त्रिचं मधिसे तत्॥ त्रिकं तथेति पारस्करादिवचनात्॥ भुंजीरंस्ते
पि वाग्यताः ते पि ब्राह्मणाः वाग्यताः मौनिनो भुंजीरन्॥ २३॥ ॥ ॥ श्रीरामायनमः॥ ॥

॥नं०श्रा० ६४

अन्नमिति॥ अन्नं भोज्यं लेह्यचोष्यपेयात्मकं पंचविधं इष्टं॥ यद्ब्राह्मणाय श्रोतायकर्त्तुर्वा रोचते हविष्यं श्रा
द्धे हविर्योग्यं व्रीहिशालियवगोधूममुद्गमाषमुन्यन्नकालशाकमहाशाकेलाशुंठीमरिचहिंगुगुडशर्क
राकर्पूरसैंधवसंभारफलसनालिकेरकदलीबदरगव्यपयोदधिघृतपायसमधुमांसप्रभृतिस्मृत्यंतरे प्रसिद्धं वे
दितव्यं॥ हविष्यमित्यनेनैवायोग्यस्य स्मृत्यंतरप्रसिद्धस्य कोद्रवमसूरचणककुलत्थपुलनिष्पावराजमा
षाकुष्मांडवार्त्ताकबृहतीवृहतीद्वयोपोदकीवंशांकुरपिप्पलीवचाशतपुष्पोषाविडलवणमाहिषचामर

अन्नमिष्टं हविष्यं च दद्यादक्रोधनोऽत्वरः॥ आतृ
प्तेस्तु पवित्राणि जप्त्वा पूर्वजपं तथा॥ २४॥ ॥

क्षीरदधिघृतपायसादीनां निवृत्तिः॥ अक्रोधन क्रोधहेतुमंतरेण त्वरो व्यग्रः॥ आतृप्तेर्दद्यादिति संबंधः
तृप्ताश्चाद्यथा किंचिदुच्छिष्यते॥ तथा दद्यात् तच्छेषणस्य दासवर्गनामधेयत्वात् तच्छेषणं नमितगतमजि
ह्मायात्रावस्य दासवर्ग्यं स्यात् तस्मिन्नेनागधेयं प्रचक्षते इति मनुस्मरणात्॥ तथा आतृप्तेः पवित्राणि पुरुष
सूक्तपवमानप्रभृतीनि जप्त्वा व्याहृत्या पूर्वोक्तं जपं च समव्याहृतिकां मिसाद्युक्तं जपेत्॥ २४॥ श्रिव० ६४

अन्नमिति॥ अनंतरं सर्वं [illegible]र्गमन्नमादाय तृप्ताः स्थेति तान् पृष्ट्वा तृप्ताः स्म इति तैः प्रत्युक्तः॥ शेषमप्यस्ति किं क्रि
यतामिति पृष्ट्वा इष्टैः सहोपभुज्यते॥ इत्यनुज्ञाप्य तदन्नं तस्मिन् स्थाने ब्राह्मणानां पुरस्तादुच्छिष्टसन्निधौ दक्षि
णाग्रदर्भांतरितायां भूमौ तिलोदकप्रक्षेपपूर्वकं॥ ये अग्निदग्धा इत्यनेन निक्षिप्य पुनस्तिलोदकं प्रक्षिपेत्॥
तदनंतरं ब्राह्मणहस्तेषु गंडूषार्थं सकृत्सकृद्दद्यात्॥ २५॥ सर्वमिति॥ पिंडपितृयज्ञकल्पातिदेशेन चरुश्रप

अन्नमादाय तृप्ताः स्थ शेषं चैवानुमन्य च॥ तदन्नं विकिरेद्भूमौ दद्याच्चापः सकृत्सकृत्॥ २५॥
सर्वमन्नमुपादाय सतिलं दक्षिणामुखः॥ उच्छिष्टसन्निधौ पिंडान् दद्याद्वै पितृयज्ञवत्॥ २६॥
मातामहानामप्येवं दद्यादाचमनं ततः॥ स्वस्तिवाच्यं ततः कुर्यादक्षय्योदकमेव च॥ २७॥ ॥

णसमवेशग्नौकरणशिष्टचरुशेषेण सह सर्वमन्नमुपादायाग्निसन्निधौ पिंडान् दद्यात्॥ तदभावे पिंडान्ना
वे ब्राह्मणार्थं सार्ववर्णिकमन्नमुपादाय सतिमिश्रं दक्षिणामुख उच्छिष्टसन्निधौ पितृयज्ञकल्पेनैव पि
डान् दद्यात् दद्यात्॥ २६॥ मातेति॥ मातामहानामपि विश्वेदेवावाहनादि पिंडप्रदानपर्यंतं कर्मैवमेव कर्त्तव्यं
॥ अनंतरं ब्राह्मणानामाचमनं दद्यात्॥ ततः स्वस्ति भवंतु इति ब्राह्मणान् स्वस्ति वाचयेत्॥ स्वस्ति युक्तेः अक्षय्यम

श्रा० ६५

स्वस्तीति कृते विप्रा ब्राह्मणहस्ते पूर्ववदुदकदानं कुर्यात् तैश्चाक्षय्यमिति वक्तव्यं ॥२७॥ दत्त्वेति ॥ अनंतरं यथाशक्ति रजत
हिरण्यादि दक्षिणां दत्त्वा स्वधां वाचयिष्य इत्युक्त्वा तैर्ब्राह्मणैर्वाच्यतामित्यनुज्ञातः प्रकृतेभ्यः पित्रादिभ्यो माता
महादिभ्यश्च स्वधोच्यतामिति स्वधाकारमुदाहरेत् ॥२८॥ ब्रूयुरिति ॥ ते च ब्राह्मणा अस्तु स्वधेति ब्रूयुस्तैरेवमुक्ते
अनंतरं कमंडलुना उदकं भूमौ सिंचेत् ततो जलं विश्वेदेवाः प्रीयंतामिति ब्रूयात् ब्राह्मणाश्च प्रीयंतां विश्वेदेवा इत्यु

दाता तु दक्षिणां दत्त्वा स्वधाकारमुदाहरेत् ॥ वाच्यतामित्यनुज्ञातः प्रकृतेभ्यः स्वधोच्य
तां ॥२८॥ ब्रूयुरस्तु स्वधेत्युक्ते भूमौ सिंचेत्ततो जलं ॥ विश्वेदेवाश्च प्रीयंतां विप्रैश्चोक्त इदं जपे
त् ॥२९॥ दातारो नोऽभिवर्द्धंतां वेदाः संततिरेव च ॥ श्रद्धा च नो मा विगमद्बहुदेयं च नोऽस्त्विति ॥३०॥

क्ते इदमनुवरोच्यमानं जपेत् ॥२९॥ दातार इति ॥ दातारो हिरण्यादिदा नोऽस्माकं कुले वर्द्धंतां बहवो भवंतु ॥ वेदा
श्चाभिवर्द्धंतामध्ययनाध्यापनतदर्थज्ञानानुष्ठानद्वारेण संततिश्च पुत्रपौत्रादिपरंपरया श्रद्धा च पित्र्ये कर्मणा आ
स्था ॥ नोऽस्माकं मा विगमत् मापगच्छतु ॥ देयं च हिरण्यादि बहु अपर्यंतमस्माकं भवतु इति जपेदित्यर्थः ॥३०॥ त्रिव० ६५

इतीति ॥ एवं पूर्वोक्तप्रार्थनमंत्रं जप्त्वा उक्त्वा च प्रियवाचः अभिवाद्य अनंतरं चरणकमलयुगलरजः पवित्रीकृतमस्म
न्मंदिरं ह्याकाद्यन्नं क्षेमं विगणय्य भवद्भिरनुगृहीता वयमित्येवंरूपाः प्रणिपत्य प्रदक्षिणपूर्वकं नम
स्कृत्य विसर्जयेत् इत्याह ॥ वाजे वाजे वत वाजिनो न इत्यनया ऋचा पितृपूर्वं प्रपितामहादि विश्वेदेवांतं द
त्त्वा आरंभणेनोत्तिष्ठतेति प्रीतः सुप्रीतमना विसर्जनं कुर्यात् ॥३१॥ यस्मिन्निति ॥ यस्मिन्नर्घ्यपात्रे

इत्युक्त्वा प्रियवाचा च प्रणिपत्य विसर्जयेत् ॥ वाजे वाज इति प्रीतः पितृपूर्वं विसर्जनं ॥३१॥ यस्मिंस्ते संस्रवाः
पूर्वमर्घ्यपात्रे निवेशिताः ॥ पितृपात्रं तदुत्तानं कृत्वा विप्रान्विसर्जयेत् ॥३२॥ प्रदक्षिणमनुव्रज्य भुंजीत पितृसे
वितं ॥

पूर्वं अर्घ्यदानानंतरं ते संस्रवा ब्राह्मणहस्तगलितार्घोदकानि निवेशिताः स्थापिताः तत् पितृपात्रं उत्तानं कृत्वा
न्यूर्द्ध्वमुखं कृत्वा विप्रान्विसर्जयेत् ॥ एतच्चाचारो मंत्रं जपादूर्ध्वं वाजे वाज इत्यतः प्राक् कर्त्तव्यं कृत्वा विसर्जये
त् इत्युक्तं भवत्यवगमात् ॥३२॥ प्रदक्षिणमिति ॥ अनंतरमासीमांतमनुव्रज्य तैरास्यतामित्यनुज्ञातस्ता
न् प्रदक्षिणीकृत्य निवृत्तः पितृसेवितं ॥ श्राद्धशिष्टमिष्टैः सह भुंजीत ॥ नियमश्चायं न परिसंख्या ॥ मांसे

तुयथारुचिनवतीतिद्विजकाम्यपारणमित्यत्रोक्तं॥यस्मिन्दिनेश्राद्धंकृतंतत्संबंधिनींरात्रिंभोक्तुर्निर्ज्ञा(ब्रा)ह्म
णोःसहकर्त्ता(कर्त्रा)ब्रह्मचारिणभवेत्॥तुशब्दात्पुनर्भोजनादिरहितःपुनर्भोजनमध्वानंचाराध्ययनमैथु
नं॥दानंप्रतिग्रहोमेहोःश्राद्धभुक्तष्टवर्जयेत्इतिवचनात्॥३३॥एवंपार्वणश्राद्धमुक्त्वेदानींवृद्धिश्राद्धमा
ह॥एवमिति॥एवमिति॥वृद्धौपुत्रजन्मादिनिमित्तेवृद्धिश्राद्धे॥एवमुक्तेनप्रकारेणपितॄन्यजेत्पूजयेत्॥त
त्रविशेषमाह॥प्रदक्षिणावृत्कइतिप्रदक्षिणमावृत्अनुष्ठानपद्धतिर्यस्यासौप्रदक्षिणावृत्कः॥प्रदक्षि

ब्रह्मचारिनवेत्रांतुरजनीब्राह्मणोःसह॥३३॥एवंप्रदक्षिणावृत्कोवृद्धौनांदी
मुखान्पितॄन्॥यजेतदधिकर्कंधुमिश्रान्पिंडान्यवैःक्रिया॥३४॥ ॥

णप्रचारइतियावत्॥नांदीमुखाइतिपितृणांविशेषणं॥अत्रआवाहनादौनांदीमुखान्पितॄन्नावाह
यिष्येनांदीमुखान्पितॄनामहादिभ्योऽस्त्व॥कर्यंपनेतेताह॥दधिकर्कंधुमिश्रान्कर्कंधुर्बदरफलं॥द
ध्नाचबदरफलैश्चमिश्रान्पिंडान्दत्वायजेतेतिसंबध्यतेतिजमाध्याःक्रियायवैःकर्त्तव्याः॥अत्र
ब्राह्मणसंख्यादर्शितेःवायुप्यांदैवेयथाशक्तीमत्रप्रदक्षिणावृत्कयवादिपरिगणनं॥नप्प॥ त्रिव० ६६

मेषां॥पित्र्यमंतरेोक्तानांविशेषधर्माणांप्रदर्शनार्थं॥यथाहाश्वलायनः॥अथाभ्युदयिकेयुग्मान्ब्राह्म
णान्॥अमुलादर्शनाप्राङ्मुखोयज्ञोपवीतीस्यात्॥प्रदक्षिणप्रचारोयवैस्तिलार्थोगंधादिदानेद्विद्विः
गुदर्भानासनेदद्यात्॥यवोसिसोमदेवत्योगोसवोदेवनिर्मितः॥प्रयत्नवद्भिःप्रक्तःपुष्ट्यादीनांमुखामिव्
न्द्मांलोकान्प्रीणाहीनःस्वाहेति॥यवावपनेविश्वेदेवाइदंवोअर्चानांदीमुखाःपितरः॥इदंवोअर्चमितिय
पालिगमर्घ्यदानं॥पाणौहोमः॥अग्नयेकव्यवाहनायस्वाहासोमायपितृमतेस्वाहेतिमधुवाताऋतायत
इत्यर्चास्थानउपास्मैगायतेतिपंचमंचमधुमतीःश्रावयेत्॥अक्षन्नमीमदंततिचषष्ठीमानांतेषुत
क्तावायान्गोमयेनोपलिप्तेषुप्राचीनाग्रान्पितृदर्भान्संस्तीर्यतेषुदध्यक्षतमिश्रेणानुक्तवोप
णएकैकस्मैद्वौद्वौपिंडौदद्यादितित्यादि॥यद्यपिपितॄन्यजेतेतिसामान्येनोक्तं॥तथापिश्राद्धत्रय
कर्मश्वस्मृत्यंतरादेवगंतव्यं॥यथाहशातातपः॥मातृश्राद्धंतुपूर्वंस्यात्पितृणांतदनंतरं॥ततोमा
तामातामहानांचवृद्धौश्राद्धत्रयंस्मृतइति॥३४॥ ॥

।म० श्रा०
६७

एकोद्दिष्टमाह ॥ एकोद्दिष्टमिति ॥ एक एव उद्दिष्टो यस्मिन् श्राद्धे तदेकोद्दिष्टमिति कर्मनामधेयं ॥ शेषं पूर्ववदाचरे
दित्युपसंहारात् पार्वणसकलधर्मप्राप्तौ विशेषो निधीयते ॥ दैवहीनं विश्वेदेवरहितं एकार्घपात्रमेकपवि
त्रकं च ॥ आवाहनेनाग्नौकरणेन रहितं त्वपसव्यवत् ॥ प्राचीनावीतिना सव्यवत् ॥ अनेनान्तरश्लोकोक्त
मुद्रयिकेयज्ञोपवीती त्वं सव्यप ॥ ३५ ॥ किं च उपतिष्ठतामिति ॥ यदुक्तं स्वस्तिवाचनं ततः कुर्यादक्षय्यो

एकोद्दिष्टं दैवहीनमेकार्घैकपवित्रकं ॥ आवाहनाग्नौकरणरहितं त्वपसव्यवत् ॥ ३५ ॥ उ
पतिष्ठतामक्षय्यस्थाने विप्रविसर्जने ॥ अभिरम्यतामिति वदेद्ब्रूयुस्तेऽभिरताः स्म ह ॥ ३६ ॥

दकमेव चेति तत्राक्षय्यस्थाने उपतिष्ठतामिति वदेत् ॥ विप्रविसर्जनवाजे वाज इतिजपानन्तरं दर्भाग्रेण रणेनाभि
रम्यतामिति ब्रूयात् ॥ ब्रूयुस्ते चाभिरम्यताः स्म वदेयुः ॥ शेषं प्रसिद्धं ॥ पूर्ववदिति पार्वणवत् ॥ एतच्च मध्याह्ने कर्तव्यं ॥ यथा
हदेवलः ॥ पूर्वाह्ने दैविकं श्राद्धं अपराह्णे च पैतृकं ॥ एकोद्दिष्टं च मध्याह्ने प्रातर्वृद्धिनिमित्तकमिति ॥ भुंजीतवि शि०व० ६७
प्रसेवितमित्यस्यैकोद्दिष्टविशेषेण निषेधो दृश्यते ॥ नवश्राद्धे च पछिष्टं गृहे पर्युषितं च यत् ॥ दंपत्योर्भुक्त

शेषं च न भुंजीत कदाचन ॥ नवश्राद्धं च दशाहं ॥ प्रथमेह्नि तृतीयेऽह्नि पंचमे सप्तमे तथा ॥ नवमैकादशे चैव तन्नव
श्राद्धमुच्यत इति ॥ ३६ ॥ सपिंडीकरणमाह ॥ गंधोदक इति ॥ एतस्य सपिंडीकरणं एकोद्दिष्टं स्त्रिया अपि ॥ गंधोदक
तिलैर्युक्तं पात्रचतुष्टयमर्घ्यसिद्ध्यर्थं पूर्वोक्तविधानात् कुर्यात् ॥ तिलयुक्तपात्रचतुष्टयं वदता पितृपक्षे च
त्वारो ब्राह्मणा दर्शिताः ॥ वैश्वदेवे द्वौ स्थितावेव ॥ तत्र प्रेतपात्रोदकं किंचिदवशेषं विधाय पितृपात्रेषु से

गंधोदकतिलैर्युक्तं कुर्यात्पात्रचतुष्टयं ॥ अर्घार्थं पितृपात्रेषु प्रेत
पात्रं प्रसेचयेत् ॥ ये समाना इति द्वाभ्यां शेषं पूर्ववदाचरेत् ॥ ३७ ॥

चयेत् ॥ ये समाना समनस इति द्वाभ्यां मंत्राभ्यां शेषं विश्वेदेवावाहनादि विसर्जनं पूर्ववत् पार्वणवदाचरेत् ॥
शेतार्घपात्रावशिष्टोदकेन प्रेतस्थानब्राह्मणहस्तेऽर्घं दत्वा शेषमेकोद्दिष्टवत् समापयेत् ॥ पितृषु पार्वणव
त् ॥ एतत्सपिंडीकरणमनंतरोक्तं ॥ एकोद्दिष्टं च नन्तः मोयुक्तं स्त्रिया अपि मातुरपि कर्तव्यं ॥ एवं वदता पार्वण
मातृश्राद्धं पृथक् कर्तव्यमित्युक्तं भवति प्रथक् न कर्तव्यमिति पाठः ॥ अत्र च प्रेतश्राद्धं पितुः प्रपितामहविषयं
केचिद्वर्णयंति ॥ ॥

म॰ श्रा॰ तस्मत्रिंशंतन्नचिन्नसपिंडीकरणेन्नरकालंपिंडदानादिनिवृत्तमुपपत्तेः॥समनंतरमृतस्योत्रसोत्रस्मत्वपिंडोदक
६० दानानुवृत्तेरंतर्न्नावोनयुक्तः॥अत्रतएवाहयमः॥यःसपिंडीकृतंप्रेतंपृथक्पिंडेनियोजयेत्॥विधिघ्नस्तेनभ
वतिपितृहाचोपजायते॥प्रकर्षेणइतःप्रेतःइतिचतुर्थेपिप्रेतत्वाद्ध्वोपपत्तेः॥प्रेतेस्मएवनिवृत्तीयादिनिचश
योगदर्शनात्॥असपिंडीकरणंश्राद्धंदैवपूर्वंनियोजयेत्॥पितॄनेवाशयेत्तत्रपुनःप्रेतंनननिर्दिशेत्॥इतिसपि
डीकरणोत्तरकालंप्रेतस्यश्राद्धादिनिषेधोपपत्तेः॥सचानंतरमृतस्यनसंभवत्यमावास्याद्येश्राद्धविधानात्॥
सपिंडतातुपुरुषेसप्तमेविनिवर्त्ततइतितदपिवचनंचतुर्थस्यत्रिंशंतर्न्नावणवघटनचतुर्थस्यपिंडत्रय
व्यापित्वं॥पंचमस्यपिंडद्वयव्यापित्वंषष्ठस्यैकपिंडव्यापित्वंसप्तमेविनिवृत्तिरिति॥पितृपात्रेप्रेतेत
दपिमुख्यत्वात्॥अस्मिन्नेवपक्षेघटते॥नान्यथापितामहमुख्यत्वात्॥तस्मात्पितृपात्रेषुप्रेतपात्रं
प्रसेचयेदितिपितुःप्रपितामहपात्रंपित्रादिपात्रादिपात्रेषुसेचयेदितिनरस्युक्तं॥नस्वत्रसपिंडसं
योजनमुत्तरत्रपिंडदानादिनिवृत्तिप्रयोजनमपितुःप्रेतत्वनिवृत्त्यापिपितृत्वप्राप्त्यर्थं॥प्रेतत्वंसुदुःखो शिव॰
पजनितात्यंतदुःखातुनवावस्था॥यथाहमार्कंडेयः॥प्रेतलोकेतुवसतिनृणांवर्षमकीर्तितः॥क्षु ६०
त्तृड्भ्यांप्रत्यहंतत्रभवेतांभृगुनंदनेति॥पितृत्वप्राप्तिश्चवस्वादिरूपादिदेवतासंबंधः॥ ॥उनमतो

प्राक्तनैकोद्दिष्टसद्दितेनसपिंडीकरणेनप्रेतत्वविहत्यापिप्रेतत्वंप्राप्तोनीत्यवगम्यते॥यस्येतानिनदत्ता
निप्रेतश्राद्धानिषोडश॥प्रेतत्वंसुस्थिरंतस्यदत्तैःश्राद्धशतैरपि॥तथाचपुरोनिर्वपेत्पिंडान्पूर्वंतुप्रमावपे
त्ततःप्रभृतिवैप्रेतःपितृसामान्यमश्नुतइत्यादिवचनात्॥यःसपिंडीकृतंप्रेतमित्यनेनापिपृथगेकोद्दिष्ट
विधानेनपिंडदाननिषेधात्पार्वणविधानेनसपिंडदानमवगम्यते॥नत्वसवत्सरिकपार्श्वकैकोद्दिष्टविधा
नेनोपपद्यते॥यदपिपुनःप्रेतनिर्देशोदितितदपिप्रेतशब्देनोच्चारापदपितुपितृत्वाद्यवगेत्येवमर्थं॥नच
प्रकर्षगमनात्प्रेतत्वंप्रेतशब्दःयतोवसिष्ठदुःखानुभावावस्थाप्रेतशब्देनरूढ्यंव्यादिनिविधीयतेइ
तुक्तं॥योपिप्रमितमात्रेप्रेतशब्दप्रयोगः॥सोपिभूतपूर्वगत्या॥सपिंडतातुपुरुषेसप्तमेविनिवर्त्ततइ
तिवप्रथमस्यचतुर्थव्यापित्वाद्द्वितीयस्यपंचमव्यापित्वात्तृतीयस्यषष्ठव्यापित्वात्सप्तमेविनिवर्त्ततेइ
त्युपपद्यते॥अपिचनिर्वाप्यपिंडान्वयनसापिंड्यमव्यापकत्वात्॥अपितुएकशरीरावयवान्वयेनतु
क्तं॥पितृशब्दश्चप्रेतत्वनिवृत्त्याश्राद्धदेवतात्वंप्रयुगतेषुवर्त्ततेइतिपितृपात्रेष्वित्यविरुद्धं॥तस्मादनं
तरमृतपात्रोदकस्यतत्पिंडस्यचपितृपात्रेषुतत्पिंडेषुचसंसर्जनमितिस्थितं॥आचार्यस्तुपरमत
मेवोपन्यस्तवान्॥एतच्चपितुःसपिंडीकरणंपितामहादिषुत्रिषुप्रमितेषुवेदितव्यं॥पितरिप्रमिते

मि॰ म॰ श्रा॰ ६९

पितामहे च प्रपितामहे वा जीवति पिंडीकरणं वास्त्येव ॥ व्युत्क्रमाच्च प्रमितानां नैव कार्या सपिंडता इति व
चनात् ॥ यत्तु मनुवचनं पिता यस्य तु वृत्तः स्याज्जीवेच्चापि पितामहः इति ॥ तदपि श्राद्धे पितृशब्दप्रयोग
नियमाय ॥ न पिंडद्वयदानार्थं कथं ध्रियमाणे च पितरि पूर्वेषामेव निर्वपेत् पिता यस्य प्रमीतः स्याज्जी
वेच्चापि पितामहः सोपि पूर्वेषामेव निर्वपेदित्यत्र ॥ पक्षद्वये निर्वपेदित्याह पितुः स नाम संकीर्त्य कीर्तये
त्प्रपितामहमिति ॥ आद्यं तत्र दर्शनेन सर्वत्र पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यः इत्येवं प्रयोगेन कर्तव्य
पितामहस्य प्रपितामहस्य चादितो वा वृद्धप्रपितामहस्य तस्मिंस्तु अंतितमिति ॥ अत एव पित्रादिशब्दानां संबं
धिवचनत्वात् ॥ ध्रियमाणेपि पितरि पितुः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्य इति ॥ पितामहे ध्रियमाणेपि
तामहस्य पितृभ्य इत्यादि ॥ अत एव पिंडपितृयज्ञे शुंधंतां पितर इत्यादिमंत्राणामूहो न भवति ॥ यदपि वि
ष्णुवचनं ॥ यस्य पिता प्रेतः स्यात् स पितृपिंडं निधाय पितामहात्पराभ्यां द्वाभ्यां दद्यादिति ॥ तस्याप्ययमर्थः
॥ पितामहे ध्रियमाणे प्रेते च पितरि पितुरेकं पिंडमेकोद्दिष्टविधानेन विधाय पितुर्यः पितामहस्ततः पराभ्यां
दद्यादिति ॥ पितामहः स्वात्मन प्रपितामहः संप्रदानत्वेन तस्थिन एवेति ॥ प्रपितामहापत ततः पराभ्यां द्वाभ्यां च
दद्यादिति ॥ शब्दः प्रयोगनियमस्तु पूर्ववदेव ॥ एवं गोत्राद्यग्रणादन्यस्यापि सपिंडीकरणं नावेरित्वव ॥ श्रा॰ ६९

यथाह कात्यायनः ॥ ब्राह्मणादिहते ताते पतिते संगवर्जिते ॥ व्युत्क्रमाच्च मृते देयं येभ्य एव ददात्यसाविति ॥ गो
ब्राह्मणादिहतस्य पितुः सपिंडीकरणासंभवेन तत्पुत्रेण पितामहादिभ्यः पार्वणविधानमुपपन्नमिति ॥ सपिं
डीकरणाभावोऽवगम्यते ॥ मातुः पिंडदानाद्यै गोत्रे विभजति पतिनिर्णयेन गोत्रेण पितृगोत्रेण वा दातव्यमिति ॥ उ
भयत्र वचनदर्शनात् ॥ स्वगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे ॥ स्वामिगोत्रेण कर्तव्या तस्याः पिंडोदकक्रि
येत्यादि भर्तृगोत्रविषयवचनं ॥ पितृगोत्रं समुत्सृज्य न कुर्याद्भर्तृगोत्रतः ॥ जन्मन्येव विपत्तौ च नारी
णां पैतृकं कुलमित्यादि पितृगोत्रविषयं ॥ एवं विप्रनिमंत्रणावासुरादिविवाहेषु पुत्रिकाकरणे च पितृगोत्रमे
वं ॥ तत्र तत्र विशेषवचनाद्दानस्य निवृत्तेश्च ॥ ब्राह्मणादिविवाहेषु ब्राह्मादिय वह्नेदत्र यं तत्र वत् ॥ विकल्पश्च ॥
तत्र येनास्या पितरो ज्ञाता येन ज्ञाताः पितामहाः तत्र यास्तत्तामार्गे तेन गच्छन्तु दुष्यतीति ॥ वचनादंग्रापरंप
रया तत्समानाचारेण व्यवस्था ॥ एवं विधविषयव्यतिरेकेण सदात्मनस्तु हेतुरेव व्यवस्थापिका ॥
यथाष्टमे वाब्दे इति मातुः सपिंडीकरणे पि विरुद्धाविनिवचनानि दृश्यंते ॥ तत्र पिता मम मात्रादिनिसार्द्धं स
पिंडीकरणं स्मृतं ॥ तथा भर्त्रा पित्रा पार्थायाः स्वमात्रा सह सपिंडीकरणं कर्तव्यमिति ॥ पैठीनसीराह ॥ अपु
त्रायां मृतायां तु पतिः कुर्यात् सपिंडतां ॥ श्वश्र्वादिभिः सहैवास्याः सपिंडीकरणं भवेदिति यमास सहसहसपि

मि०श्रा० ७० डीकरणंयमस्याहपत्न्याचैकेनकर्तव्यंसपिंडीकरणंस्त्रियाः॥मामन्तोपिहीतेनैकांगनामंत्राहुतिश्चनेरिति॥उ
शनसातुमातामहेनसपिंडीकरणमुक्तं॥पितुःपितामहेयाद्वद्पूर्णेसंवत्सरेसुते॥मातुर्मातामहेतद्वद्देया
कार्यासपिंडता॥तथापितामहेयोज्यःपूर्णेसंवत्सरेसुते॥मातामातामहेनद्वत्स्यादनगवास्त्रियः॥इ
त्येवंविधेपुवचनेपुसत्सुपुत्रायांन्यायांप्रमातायांनत्रांस्वमात्रैवसापिंड्यंकुर्यात्॥अन्वारोहणेतु
पुत्रःस्वपित्रैवमातुःसापिंड्यंकुर्यात्॥आसुरादिविवाहोत्पन्नःपुत्रिकासुतश्चमातामहेनैवब्राह्मादिविवा
होत्पन्नःपित्रामातामहेनपितामह्यावाविकल्पेनकुर्यात्॥अत्रापियदिनियतोवंशसमाचारस्तर्हि
तथैवकुर्यात्॥वंशसमाचारोप्यनियतश्चेत्स्वात्मनस्तुष्टिरेवेचेतियथारुचिकुर्यात्॥अत्रचयेनकेना
पिमातुःसापिंड्येपियत्राष्टकादिषुमातृश्राद्धंपृथग्विहितं॥अन्वष्टकासुवृद्धौचगयायांचक्षयेहनि
॥मातुःश्राद्धंपृथक्कुर्यादन्यत्रपतिनासहेति॥तत्रपितामातामह्यादिभिरेवपार्वणश्राद्धंकर्तव्यं॥क्षेम
त्रपतिनासहतिपिंडेपिंड्यनदंत्वाभागित्वात्॥मातामहसापिंड्येतदंशभागित्वात्तेनैवसह॥यथाहशा त्रि० ७०
तातपः॥एकमूर्तित्वमायांतिसपिंडीकरणेकृते॥पत्नीपतिपितृणांचतस्मात्सोंशभुभागिनी॥एवंचस
तिमातामहेनमातुःसापिंड्येमातामहश्राद्धं पितृश्राद्धंचनित्यमेव॥पत्नापितामह्यावामातुःसापिंड्ये
नमातामहश्राद्धंननित्यं॥कृतेसुरये॥कृतेनत्रामवामइतिनिर्णयः॥१२७॥ ॥

अर्वाकिति॥संवत्सरादर्वाक्यस्यसपिंडीकरणंकृतेप्रतिदिवसंप्रतिमासंवायावत्संवत्सरंतावत्अनुसारेण॥
अन्नमुदकुंभसहितंब्राह्मणायदद्यात्॥अर्वाक्संवत्सरादितिवदतासपिंडीकरणंसंवत्सरेपूर्णे
प्रागेवेतिदर्शितंवावेदितव्यं॥यथाहाश्वलायनः॥अथसपिंडीकरणंसंवत्सरांतेद्वादशाहेवेतिका
मायनोप्याह॥ततःसंवत्सरेपूर्णेसपिंडीकरणंत्रिपक्षेवायदहर्वृद्धिरापद्येत॥द्वादशाहेत्रिपक्षेवा
षण्मासेसंवत्सरेचेति॥चत्वारःपक्षादर्शिताः॥तत्रद्वादशाहेपितुःसपिंडीकरणंसाग्निकेनैवकार्यं॥

अर्वाक्सपिंडीकरणंयस्यसंवत्सराद्भवेत्॥ ॥

सपिंडीकरणंविनापिंडपितृत्वस्यासिद्धेः॥साग्निकस्तुयदाकर्तानिर्वोवाप्यग्निमान्भवेत्॥द्वादशाहे
तदाकार्यंसपिंडीकरणंतदा॥षोडशश्राद्धानिकृत्वासपिंडीकरणंकुर्यात्॥अत्रसपिंडीकरणंकृत्वा
साकालेतानिकर्तव्यानीतिसंप्रदायः॥उत्तरपक्षावचननिर्देशात्॥श्राद्धानिषोडशादत्त्वानतुकुर्यात्
सपिंडतां॥श्राद्धानिषोडशापाद्यविदधीतसपिंडतां॥षोडशश्राद्धानिद्वादशाहेत्रिपक्षेचषण्मासेम

सेमासिकेब्दिके॥श्राद्धानि षोडशैतानि संस्मृतानि मनीषिभिः॥इति दर्शितानियायस्यापि संवत्सरा
दर्वाक् सपिंडीकरणं न भवेत्॥मासिकं चोदकुंभं च देयं तस्यापि वत्सरं॥तत्र सपिंडीकरणं कृत्वा स्वका
ल एव तानि कर्तव्यानि प्रथमः कल्पः॥अत्र प्राप्तकालत्वेन प्रागनधिकारात्॥यदपि च तन्नं षोडशश्रा
द्धानि कृत्वैव सपिंडीकरणं संवत्सरादपि कर्तव्यं॥इति सायमापकल्पः॥यदा त्वापकल्पः॥यदा त्वापक
लत्वेन सप्राक् सपिंडीकरणं त्रिनश्राद्धानि करोति॥तदेकोद्दिष्टविधानेन कुर्यात्॥यदा तु सुख्य

तस्याप्यन्नं सोदकुंभं दद्यात् संवत्सरं द्विजे॥३७॥

कल्पेन स्वकाले करोति तदाब्दिकं श्राद्धं यो यथा करोति॥पार्वणमेकोद्दिष्टं वा तथा मासिकानि कुर्या
त्॥सपिंडीकरणादर्वाक् कुर्वन् श्राद्धानि षोडश॥एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि तु
सपिंडीकरणादूर्ध्वं यदा कुर्यात्॥तदा पुनः॥प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात्सतान्यपि इति स्मरणा
त्॥एतच्च प्रेतश्राद्धसहितं सपिंडीकरणं विभक्तधनेषु नानापुत्रेषु एको नैव च कृते ना जनं सर्वैः कर्तव्यं॥

न च श्राद्धं सपिंडत्वं श्राद्धान्यपि च षोडश॥एकेनैव तु कार्याणि संविभक्तधनैरपि इति स्मरणात्॥एतच्च
प्रेतश्राद्धसहितं सपिंडीकरणं ससमासिनां पुत्रादिभिर्नियमेन कर्तव्यं॥प्रेतत्वविमोक्षार्थत्वात्॥
समासिकं न कर्तव्यं॥तथाह स्नातातपः॥एकोद्दिष्टं न कुर्वीत यतीनां चैव सर्वदा॥अहन्येकादशे प्रा
प्ते पार्वणं च विधीयते॥सपिंडीकरणं तेषां न कर्तव्यं सुतादिभिः॥त्रिदंडग्रहणादेव प्रेतत्वं नैव जाय
ते॥इति पुत्रासन्निधाने येन सगोत्री दीनां दाहसंस्कारः॥कृतस्तेनैव दशाहात् प्रेतकर्म कर्तव्यं॥अस
गोत्रः सगोत्रो वा स्त्री दद्याद्यदि वा पुमान्॥प्रथमेऽह्नि यो दद्यात् स दशाहं समापयेत् इति स्मरणात्॥श्रा
द्धा सम्पत्तौ कर्तव्यम् अमंत्रकं दाहरोक्ति॥एवं सपिंडीकरणं मंत्रवर्जं शूद्राणां दाहरोके कार्याणीति विज्ञेयम्
णात्॥सपिंडीकरणादूर्ध्वं सांवत्सरिकपार्वणादीनि पुत्रस्य नियमेनैव कार्याणि॥अन्येषामनियम
तानि॥२८॥॥

मि०श्रा० ७२

एकोद्दिष्टकालानाह॥मृतेऽहनीति॥मृतेहनि प्रतिमासं वत्सरं यावदेकोद्दिष्टं कार्यं॥सपिंडीकरणादूर्ध्वं प्र
ति संवत्सरमेवमेवैकोद्दिष्टमेव कर्त्तव्यं॥आद्यं सर्वैकोद्दिष्टप्रकृतिभूतमेकादशेऽहनि॥मृतदिवसापरि
ज्ञाने तु तन्मासश्रवणदिवसे अमावास्यायां वा कर्त्तव्यं॥परिज्ञाने मृतेऽहन्यमावास्यायां श्रवणदिवसे वेति स्म
रणात्॥अमावास्यायामिति गमनमाससंबंधिन्याममावास्यायां प्रवासे वासरेऽज्ञेयं॥तन्मासेदुक्तं येः पित्रा

मृतेऽहनि तु कर्त्तव्यं प्रतिमासं तु वत्सरं॥ ॥

इति स्मरणात्॥मृतेऽहनीत्यत्राहिताग्नेर्विशेषो जातूकर्णेनोक्तः॥ऊर्ध्वं त्रिपक्षाद्यच्छ्राद्धं मृताहे तदहन्येव तद्व
दैव॥श्राद्धं तु कारयेद्दाहादाहिताग्नेर्द्विजन्मनः॥इति त्रिपक्षाद्यक्रियते तत्कर्म तद्दाहदिवसादारभ्याहि शिव० ७२
ताग्नेः कार्यं॥त्रिपक्षादूर्ध्वं यत्श्राद्धं तन्मरणदिवस एवेत्यर्थः॥अनाहिताग्नेस्तु सर्वं मृताह एवे॥ ॥

आद्यमेकादशेऽहनीत्यस्याशौचोपलक्षणमिति केचित्॥शुचिना कर्म कर्त्तव्यमिति शुद्धेरनंतरंगत्वात्॥अथा
शौचापगमः इति सामान्येनोपक्रम्यैकोद्दिष्टस्य विष्णुना विहितत्वाच्च तदयुक्तं॥एकादशे क्रियच्छ्राद्धं तस्मा
मासमुदाहृतं॥चतुर्णामपि वर्णानां सूतकं च पृथक् पृथक्॥इति पैठीनसिस्मरणविरोधीत्॥आद्यश्रा
द्धमशुद्धोऽपि कुर्यादेकादशेऽहनि॥कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः॥इति शंखवचनं विरोधाच्च स
मानोपक्रमं विष्णुवचनं॥दशाहाशौचविषयमपि घटते॥इति प्रतिसंवत्सरं चैवमिति प्रतिसंवत्सरं मृते

प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि॥३९॥

हन्येकोद्दिष्टमुपदिष्टं योगीश्वरेण॥तथा च स्मृत्यंतरे॥वर्षे वर्षे तु कर्त्तव्या मातापित्रोस्तु सत्क्रिया॥अदैवं भोज
येच्छ्राद्धं पिंडमेकं च निर्वपेत्॥यमोप्याह॥सपिंडीकरणादूर्ध्वं प्रतिसंवत्सरं सुतैः॥मातापित्रोः पृथक्कार्यमेको
द्दिष्टं मृतेऽहनीति॥व्यासस्तु पार्वणं प्रतिषेधयति॥एकोद्दिष्टं परित्यज्य पार्वणं कुरुते तु यः॥अकृतं तद्विजा
नीयात्स भवेत्पितृघातकः॥इति जमदग्निस्तु पार्वणमाह॥अपाद्य सदपिंडत्वामौरसो विधिवत्सुतः॥कुर्वी
त दर्शवच्छ्राद्धं मातापित्रोः क्षयेऽहनीति॥शातातपोप्याह॥सपिंडीकरणं कृत्वा कुर्यात्पार्वणवत्सदा॥प्र
तिसंवत्सरं विद्वांछागलेयोदितो विधिः॥३९॥ ॥

मि॰ श्रा॰ इत्येवंवचनेविप्रतिपन्नौदाक्षिणात्यास्त्वव्यवस्थामाहुः॥ औरसोक्षेत्रजातोवा मातापित्रोः क्षयाहे पार्वणमेवतु
७२ त्कुर्यादितरेकोद्दिष्टमितिजातूकर्ण्यवचनात्॥ प्रत्यब्दमिति॥ संततिक्षयाहव्यतिरिक्तानिश्राद्धत्वमाहुरित्यस्मात्
क्षयन्तीयामाघीवैश्वदेवीप्रतिनिषुक्तोनक्षयाहविषयपार्वणैकोद्दिष्टव्यवस्थापनयालंगयत्वनुपरापा
रवचनं॥ पितुर्गतस्यादेवत्वमौरसस्यत्रिपौरुषं॥ सर्वत्रानेकगोत्रेणामेकस्यैवास्मतेदनीति॥ तदपिनव्य
वस्थापकंयस्मादस्यायमर्थः॥ देवत्वंगतस्यसपिंडीकृतस्यपितुः सर्वत्रऔरसस्यऔरसेनत्रिपुरुषंपार्व

प्रत्यब्दंपार्वणेनैवविधिनाक्षेत्रजौरसौ॥

णंकार्यं॥ अनेकगोत्राणांभिन्नगोत्राणांचमातुलादीनांक्षयेहनिपत्नीदंतदेकोद्दिष्टंएकस्यैव॥ किं त्रिव॰
चसपिंडीकरणादूर्ध्वमप्येकोद्दिष्टमेवकर्त्तव्यं॥ औरसेनापिसुक्तंपैठीनसिना॥ एकोद्दिष्टंद्विकर्त्तव्यमौ ७२
रसेनमृतेहनि॥ सपिंडीकरणादूर्ध्वंमातापित्रोर्नवार्पणं॥ अद्विचाःपुनरेवस्थापयंति॥ अमावास्यायांना
ष्टपक्षकृष्णपक्षेवाम्रतौहेपार्वणमन्यत्रम्रताहेएकोद्दिष्टमेवेति॥ ॥

अमावास्यादत्तयोपस्यप्रेतपक्षेयवानवेत्॥ पार्वणंतत्रकर्त्तव्यंनैकोद्दिष्टंकदाचनेतिस्मरणात्॥ एतदपि
नाद्रियंतेद्दृष्टाः॥ अनिश्चितमूलेनानेनवचनेननिश्चितमूलानांबहूनांक्षयाहमात्रपार्वणविधायकानाम
वास्याप्रेतमृताहविषयत्वेनातिसंकोचस्यायुक्तत्वात्॥ सामान्यवचनानामर्थसंकोचोनुतत्त्वहिसामान्यवचन
स्यविशेषवचनेनोपसंहारायोयत्रसामान्यविशेषसंबंधज्ञानेनवचनदयमर्थमत्॥ यथासप्रदक्षसा
मिधेनिरस्तुब्रूयादिमनास्माधीतस्यविकृतिमात्रविशेषयस्यसप्रदशावाक्यस्यसामिधेनीलक्षणकार

कर्मानामिनरेकुर्यादेकोद्दिष्टंसुतादृतेति॥ ५०॥

संबंधिनार्यवचनोमित्रवरोदिकरणपविनत्वात्केनमित्रविरोधाधिकारापूर्वसंबंधवाधनार्यवक्तामित्रविरोधादि
प्रकरणउपसंहारा॥ इहतुनतोदमात्रविषयत्वान्यर्थवतेति॥ अतोचपाक्षिकेकोद्दिष्टनिष्ठत्रिफलनया
पार्वणनियमविधानयुक्तं॥ नचैकोद्दिष्टवचनानांमातापित्रृक्षयाहविषयत्वेनपार्वणार्थेवचनानीचत
दन्यक्षयाहवचनेनव्यवस्थापकाः॥ उनयत्रापिमातापित्रुसुतत्रेहणस्याविद्यमानत्वात्॥ ५०॥

मि० आ०
७५

सपिंडीति॥ यद्यपि कैश्चिदुच्यते मातापित्रोः क्षयाहे साग्निः पार्वणं कुर्यात्॥ निरग्निरेकोद्दिष्टं वर्षे वर्षे सुतः कुर्यात्
पार्वणं योऽग्निमान्द्विजः॥ पित्रोः प्रत्यग्निमान्कुर्यादेकोद्दिष्टं मृतेऽहनीति सुमंतुस्मरणात्॥ तदपि संप्रतिपन्नत्वा
दुपेक्षणीयं यत्र श्रूयते विप्रा येवैकात्मनयं एव वा॥ एतेषां सपिंडानामूर्ध्वमेकोद्दिष्टं न पार्वणमिति स्म
रणात्॥ तन्नैव निर्णयः॥ सपिंडीकरणानावास्पार्वणं तस्य सर्वाहारतिप्रचेतस्स्मरणात्॥ अमावास्या

मृते सपिंडीकरणादूर्ध्वं प्रतिसंवत्सरं सुतैः॥ मातापित्रोः पृ
थक्कार्यमेकोद्दिष्टं मृतेऽहनीति॥ आपाद्यसहपिंडत्वं औरसो
विधिवत्सुतः॥ कुर्वीत दर्शवच्छ्राद्धं मातापित्रोः क्षयेऽहनीति॥५२॥

क्षयाहे प्रेतपक्षे क्षयाहे पार्वणमेव॥ अमावास्याक्षयो यस्याः प्रेतपक्षेऽथवा पुनरित्यादिवचनोक्तस्य नियमनि
यमपरत्वात्॥ अन्यत्रापि क्षयाहे पार्वणैकोद्दिष्टयोर्व्रीहियववत्स्य एव॥ तत्रापि वंशसमाचारव्यवस्थायांस
त्यां व्यवस्थितो विकल्पः॥ ससामैच्छत्यनमतिप्रसंगेन॥५२॥ ॥निरस्याद्वंशाप्येवं अग्निधीपते॥५३॥ ॥

त्रि० व०
७५

पिंडामिति॥ निरस्याद्वंशेषमिदमभिधीयते॥ पूर्वोक्तानां पिंडानां प्रतिपत्तिरियं गवे अजाय वा विप्रा
य वा तदर्थिने पिंडं दद्यात्॥ अथवागाधे जले वा प्रक्षिपेत्॥ किंच सत्सु विप्रेषु भोजनदेशाव्यवस्थितेषु द्वि
जोच्छिष्टं न मार्जयेन्नोद्वासयेत्॥५३॥ नोऽन्यविशेषफलविशेषमाह॥ हविष्येति॥ हविष्यं हविर्यो
ग्यं तिलव्रीह्यादि॥ यथाह मनुः॥ तिलव्रीहियवैर्माषैरद्भिर्मूलफलेन वा॥ दत्तेन मासं प्रीयंते विधिव

पिंडास्तु गोऽजविप्रेभ्यो दद्यादग्नौ जलेऽपि वा॥ प्रक्षिपेत्सत्सु विप्रेषु द्विजोच्छिष्टं न मार्जयेत्॥५३॥
हविष्यान्नेन वै मासं पायसेन तु वत्सरं॥ मात्स्यहारिणकौरभ्रशाकुनच्छागपार्षतैः॥५४॥

त्पितरो नृणामिति॥ तदन्नं हविष्यान्नं तेन मासं पितरस्तृप्यंतीत्यनेनागतेनान्वयः॥ पायसेन गव्यपयःसिद्धेन
संवत्सरं॥ ससंवत्सरं च गव्येन पयसा पायसेन चेति स्मरणात्॥ मत्स्यो प्रसिद्धः॥ प्राचीनादित्सिदं मांसं हरिणस्त
त्रमृगः॥ एणः कृष्णस्तूपरोऽतियो हरिणस्तामत्रमुच्यते इत्यायुर्वेदस्मरणात्॥ तस्य हारिणकं अविरूरव्र
स्तसंबंधि औरभ्रकं॥ शाकुनं पक्षिसंबंधि अजच्छागस्तदीयं छागं पृषच्चित्रमृगः तन्मांसं पार्षतं॥५४
॥

ऐणा इति ॥ एणाः कृष्णमृगास्तत्संबंधिनमैणं । रुरुः शंबरस्तत्संबंधि रौरवं । वराहः आरण्यकशूकरस्तत्संबंधि वारा
हं ॥ शाशः शशसंबंधि ॥ एभिर्मांसैः पितृभ्यो दत्तैर्हविष्यान्नेन वै मासमित्युक्तात् तत्र तत्र वृद्ध्या यथाक्रममेकैकमा
सवृद्ध्या पितरस्तृप्यंति ॥ ५५ ॥ किंच खड्गमिति ॥ खड्गो गंडकस्तस्य मांसं महाशल्कः कोमत्स्यभेदः । मधु प्रसिद्धं मु

ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमं ॥ मासवृद्ध्याभितृप्यंति दत्तैरिह पितामहाः ॥ ५५ ॥
खड्गामिषं महाशल्कं मधु मुन्यन्नमेव च ॥ लोहामिषं महाशाकं मांसं वार्ध्रीणसस्य च ॥ ५६ ॥

न्यन्नं नीवारादि ॥ लोहो लोहितश्छागः तदामिषं महाशाकं कालशाकं वा ॥ प्राणसौ वृद्धः श्वेतश्छागः ॥ त्रिपिबन्नि
यज्ञीणं श्वेतो वृद्धस्तु प्रजापतिः ॥ वार्ध्रीणस इति प्रोक्तो याज्ञिकैः पितृकर्मणि ॥ श्राद्धकर्मणीति यावत् ॥ तिकृप्र
सिद्धेः ॥ त्रिपिबत्वं कर्णौ जिह्वा यस्य जलं स्पृशंति ॥ सं त्रिभिः पिबतीति त्रिपिबः तस्य वार्ध्रीणसस्य मांसं यद्
दाति ॥ ५६ ॥

यद्ददाति गयास्थश्च यत्किंचित् शाकादिकमपि गयास्थो ददाति चशब्दात् गंगाद्वारादिषु ॥ गंगाद्वारे प्रयागे च नै
मिषे पुष्करेर्बुदे ॥ सन्निहत्यां गयायां च श्राद्धमक्षयतां व्रजेत् ॥ आनंत्यमश्नुते अनंतफलहेतुत्वं प्राप्नोति ।
आनंत्यमश्नुत इति प्रत्येकं संबध्यते ॥ तथा वर्षात्रयोदश्यां भाद्रपदकृष्णत्रयोदश्यां विशेषतो मघायुक्ता
यां यत्किंचिद्दीयते तत्सर्वमानंत्यमश्नुत इति गतेन संबंधः ॥ अत्र यद्यपि मुन्यन्नमांसमध्वादीनि सर्वेषां
सामान्येन श्राद्धयोग्यानि दर्शितानि ॥ तथापि कुलस्थोक्ताव्यवस्था करणीया ॥ मुन्यन्नं ब्राह्मणस्योक्तं मां

यद्ददाति गयास्थश्च सर्वमानंत्यमश्नुते ॥ तथा व
र्षात्रयोदश्यां मघासु च न संशयः ॥ ५७ ॥ ॥

सं क्षत्रियवैश्ययोः ॥ मधुप्रधानं शूद्रस्य सर्वेषां चाविरोधि यत् ॥ अस्यार्थः मुन्यन्नं नीवारादि यच्छ्राद्धयोग्यमु
क्तं तद्ब्राह्मणस्य प्रधानं समग्रफलदं ॥ यच्च मांसं तत्क्षत्रियवैश्ययोः प्रधानं यत् क्षौद्रमुक्तं तत् शूद्रस्य
॥ एतत्त्रितयव्यतिरिक्तं यदविरोधि यदप्रतिषिद्धं वास्तुकादि यच्च विहितं हविष्यकालशाकादि तत्सर्वे
षां समग्रफलमिति ॥ ५७ ॥ ॥ तिथिविशेषात्फलमाह ॥ कन्यामिति ॥ ॥

मि॰ श्रा॰ ७६

कन्यारूपलक्षणशीलवतीकन्यावेदानाजामातरोबुद्धिरूपलक्षणसंपन्नाःपत्रावःक्षुद्राःअजाप्रयस्सा
ज्ञानसन्मार्गवर्तिनः॥घूतंद्यूतंविजयःकृषिफलं॥वाणिज्यंवाणिज्यलाभः॥द्विशफोगवादयः॥एकशफ
अश्वादयः॥५॥ब्रह्मवर्चस्विनःपुत्रावेदाध्यायनतदनुष्ठानजाप्यवंतः॥तेजोब्राह्मवर्चसंतद्वंतः॥स्वर्ण
रूप्येहेमरजतेतद्व्यतिरिक्तंत्रपुसीसादिकुप्यकं॥ज्ञातिश्रैष्ठ्यंज्ञातिमध्येउत्कृष्टत्वं॥सर्वकामाःकाम्यंतइति

कन्यांकन्यावेदिनश्चपशून्वैसत्सुतानपि॥द्यूतंचकृषिवाणिज्यंद्विशफैकशफांस्तथा॥५८॥ब्रह्मवर्च
स्विनःपुत्रान्स्वर्णरूप्येसकुप्यके॥ज्ञातिश्रैष्ठ्यंसर्वकामानाप्नोतिश्राद्धदस्तथा॥५९॥प्रतिपत्प्रभृतिष्वे
कांवर्जयित्वाचतुर्दशीं॥शस्त्रेणतुहतायेवैतेभ्यस्तत्रप्रदीयते॥५०॥ कामाःस्वर्गपुत्रपश्वादयः॥एतानिक
न्यादीनिचतुर्दशफलानिक्रमेणप्रतिपत्प्रभृतिष्वमावास्यापर्यंतासुचतुर्दशीवर्जितासुचतुर्दशसुतिथिषुश्राद्ध
दोयथाक्रममाप्नोति॥येकेचशस्त्रेणहतास्तेभ्यःकृष्णपक्षेचतुर्दश्यामेकोद्दिष्टविधानेनश्राद्धंदद्यात्
तिथ्यन्तरेहतोनभवति॥समत्वमागतस्यापिपितुःशस्त्रहतस्यवै॥एकोद्दिष्टंसुतैःकार्यंचतुर्दश्यांमहा
लयं॥इतिस्मरणात्॥समागम्यसपिंडीकृतस्यमहालयेनापरपक्षे॥

पक्षेचतुर्दश्यांशस्त्रहतस्यैवनान्यस्येतिनियम्यते॥नपुनःशस्त्रहतस्यचतुर्दश्यामेवेति॥अतश्चकृष्णपाहारे
शस्त्रहतस्यापियथाप्राप्तमेव॥श्राद्धंनचनाद्यपरकृष्णपक्षे॥वायंविधिरितिमंतव्यं॥प्रोष्टपद्यामपरप
क्षेमासिमासिचैवमितिगौतमस्मरणात्॥५०॥नक्षत्रविशेषात्फलविशेषमाह॥स्वर्गमिति॥कृत्तिका
माद्यंकृत्वाभरण्यंतंप्रतिनक्षत्रंयत्श्राद्धंददातियथाक्रमंस्वर्गादीनायुःपर्यंतान्क्रमात्प्राप्नोति॥यथाह
स्वर्गंह्यपत्यमोजश्चशौर्यंक्षेत्रंबलंतथा॥पुत्रश्रैष्ठ्यंससौभाग्यंसमृद्धिंमुख्यतांतथा॥५१॥प्रवृत्तचक्रतां
चैववाणिज्यप्रभृतीनिच॥आरोग्यंयशोवीतशोकतांपरमांगतिं॥५२॥धनंवेदान्भिषक्सिद्धिंकुप्यंगा
अप्यजाविकं॥अश्वानायुश्चविधिवद्यःश्राद्धंसंप्रयच्छति॥५३॥कृत्तिकादिभरण्यंतंसकामानाप्नुयादिमा
न्॥आस्तिकश्रद्दधानश्चव्यपेतमदमत्सरः॥५४॥ कःश्रद्दधानोव्यपेतमदमत्सरश्चभवति॥आस्तिकोविश्वा
सवान्श्रद्दधानआदरातिशययुक्तंव्यापारमदमत्सरः॥मदोगर्वःमत्सरईर्ष्याताभ्यांरहितः॥स्वर्गोनिरति
शयसुखं॥अपत्यमविशेषेण॥ओजआत्मनःशक्त्यातिशयः॥शौर्यंनिर्भयत्वं॥क्षेत्रंफलवत्॥बलंशारीरं॥पुत्रो
गुणवान्॥श्रैष्ठ्यंज्ञातिषु॥सौभाग्यंजनप्रियता॥समृद्धिर्धनादिसुखता॥अग्रता॥श्रेणसामान्येनप्रवृत्तचक्रता
अप्रतिहताज्ञता॥वाणिज्यप्रभृतीकुशीदगोरक्षादिः॥आरोग्यमनामयिता॥य

मिव॰ ७६

मि०आ०
७१

णः प्रख्यातिः वीनत्रीकृताः हृष्टशोकादेर्जनितदुःखीनावपरमानि ब्रह्मलोकप्राप्तिः॥ धनं सुवर्णादि विद्यान्
ऋग्वेदादयः॥ निषेकसिद्ध्यौषधफलावाप्तिः॥ कथं सुवर्णरजतव्यतिरिक्तं ताम्रादि ग्रामसिद्धाः॥ श्रो
जाग्रदवस्थावस्थानवयवस्थावस्थास्वसामुष्टं यजीवनः॥ मासश्राद्धानि तर्पितैरन्नैरिह पितामहइ
त्यनेन पितॄणां श्राद्धेऽन्नैर्नवतिस्मुक्तं॥ तदनुपपन्नं प्रातिस्विकशुभाशुभवशेन स्वर्गनरकादिगतानां
मनुष्याणां पित्रादिनिर्दिष्टैरन्नपानादिभिस्तृप्त्यसंभवात्॥ संभवेपि स्वयमात्मनामपुनीत्वानां कथं सर्वा

वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः॥

दिकफलं प्रयच्छतीत्यत आह॥ ५४॥ वसुइति॥ नक्षत्रदेवतादयः एव श्राद्धकर्मणि संप्रदानभूतापि
त्रादिशब्दैरुच्यंते॥ किंत्वधिष्ठातृत्वासादिदेवतासहिताएवयथादेवदत्तादिशब्दैर्नोत्रशरीरमात्रेना शि०
यात्मनामात्रं॥ किंविशिष्टाश्चात्मनउच्यंते॥ एवमधिष्ठातृदेवतासहिताएवदेवतादयः पित्रादिशब्दै ७१
रुच्यंते॥ अतस्वाधिष्ठातृदेवतानस्तादयपुत्रादिभिर्दत्तेनान्नपानान्तृप्ताः संतस्तानपिदे॥ ॥

वतादस्तादीस्तर्पयंति॥ कर्तॄन् पुत्रादीन् पुत्रादीन् फलेन संयोजयंति॥ यथागर्भिणी गर्भपोषणाया मद
त्तेनदोहदपदान्नपानादिनास्वयमुपभुक्तेनदग्रामस्तीस्वजठरगतमपत्यं तर्पयति॥ दोहदादिप्रदायिनमप्यु
पकारफलेन संयोजयंति तद्वत्॥ वसवो रुद्रा॥ अदितिसुताआदित्याएते पितरः पितृपितामहप्रपितामहनकेवलं देव

प्रीणयंति मनुष्याणां पितॄन् श्राद्धेन तर्पिताः॥ ५५॥ आयुः प्रजां धनं विद्यां
स्वर्गं मोक्षं सुखानि च॥ प्रयच्छंति तथा राज्यं प्रीता नॄणां पितामहाः॥ ५६

दत्तायएवश्राद्धदेवताश्राद्धकर्मणि संप्रदानभूताकिंतु मनुष्याणां पितृदेवदत्तादींस्वयं श्राद्धेतर्पितास्तर्प
यंति॥ तानतश्चानिशायोयागेनकिंचनकेवलं पितॄंस्तर्पयंति॥ अपितु श्राद्धकारिणः आयुः चकारात्
नतलोकवास्तोकमपदपि फलं स्वयंप्रीता पितामहादस्तादयः प्रयच्छंतीति॥ ५६॥ इति श्राद्धप्रकरणं

मि० आ०
१८

दृष्टादृष्टफलसाधनामनिहितामभिधास्यंते॥ तेचतेषांस्वरूपनिष्पत्तिफलसाधनंचाविघ्नेनभवतीत्यविघ्नार्थं
कर्मविधास्यन्विघ्नस्यतद्विघ्नस्यकारकज्ञापकहेतूनाह॥ विनायककर्मसिद्ध्यर्थमित्याद्यनेनग्रंथविधिहे
तुपरिज्ञानाद्विघ्नस्यप्रागभावपरिपालनयोपस्थितस्यध्वंसाद्वासायवापेक्षापूर्वकारिणःप्रवर्तंते॥ योगक्षेमेयोगश्च
विधिहेतुज्ञानात्॥ विनायकइति॥ विनायकोविघ्नेश्वरःपुरुषार्थसाधनानांकर्मणांविघ्नसिद्ध्यर्थंस्वरूपफल

विनायकःकर्मविघ्नसिद्ध्यर्थंविनियोजितः॥ गणानामाधिपत्येचरुद्रेणब्रह्मणातथा
॥१॥ तेनोपसृष्टोयस्तस्यलक्षणानिनिबोधत॥ स्वप्नेवगाहतेत्यर्थंजलंमुंडांश्चपश्यति
॥२॥

साधनत्वविघातनत्वसिद्ध्येविनियोजितेनियुक्तः॥ रुद्रेणब्रह्मणाचकारादिंद्रेणनागगणानांपुष्पदंतप्रभृतीनां
माधिपत्येस्वाम्येच॥१॥ एवंविघ्नस्यकारकहेतुमुक्त्वाज्ञापकहेतुप्रदर्शनार्थमाह॥ तेनोपसृष्टेति॥ तेनवि
नायकोपसृष्टोगृहीतस्तस्यलक्षणानिनिबोधतजानीध्वं॥ हेमुनयःपुनर्मुनीनांप्रत्यवमर्शस्त्रिंशतिप्रक
रणप्रारंभार्थः॥ स्वप्नेस्वप्नावस्थायांजलमत्यर्थमगाहतेस्रोतसाक्रियतेनिमज्जतिवामुंडांश्चपुरुषान्
पश्यति॥२॥ ॥

शि०
१८

कषायइति॥ कषायवाससोरक्तनीलादिवस्त्रप्रचारणांस्तुक्रव्यादानामवासानिनपक्षिणांगृध्रादीन्
मृगांश्चव्याघ्रादीनधिरोहतीति॥ तथांत्यजैश्चंडालादिभिःखरोष्ट्रैःक्रमेयकैःसहपरिवृत्तस्तिष्ठति॥ व्रज
तोगच्छतआत्मानंपरैःशत्रुभिःपृष्ठतोधावद्भिरनुगतमनुसृतमात्मानंमन्यते॥३॥ एवंस्वप्नदर्शनामु
क्त्वाप्रत्यक्षलिंगमाह॥ विमनेति॥ विमनाविक्षिप्तचित्तःविफलारंभःविफलाआरंभायस्यतथोक्तस्य

कषायवाससश्चैवक्रव्यादांश्चाधिरोहति॥ अंत्यजैर्गर्दभैरुष्ट्रैःसहैकत्रावतिष्ठते॥ व्रजन्नपितथात्मानं
मन्यतेनुगतंपरैः॥३॥ विमनाविफलारंभःसंसीदत्यनिमित्ततः॥ तनोपसृष्टोलभतेनराज्यंराजनंदनः॥
॥४॥ कुमारीनचभर्तारमपत्यंगर्भमंगना॥ आचार्यत्वंश्रोत्रियश्चनशिष्योध्ययनंतथा॥५॥

विफलमाप्नोति॥ संसीदत्यनिमित्ततःविनाकारणेनप्यमनस्कोभवति॥ राजनंदनोराजकुलेजातश्श्रु
तसौर्यधैर्यादिगुणयुक्तोराज्यंलभते॥४॥ कुमारीरूपलक्षणाभिजनसंपन्नापिभर्तारंअंगनाग
नागर्भिणयपत्यंकृतुमतीगर्भं॥ अध्ययनतदर्थज्ञानेसत्याप्याचार्यत्वंश्रोत्रियोविनयाचारादियुक्तोपि
शिष्योध्ययनंश्रवणंवानलभतइतिसर्वत्रसंबध्यते॥५॥ ॥

मि०श्रा० ३९ वणिगिति॥वणिज्योपजीवनेऽत्रकुशलोपि धान्यादिक्रयविक्रयादिषु लाभं।कृषिवलः कर्षकस्तत्राभियुक्तः कृ
षिफलं नाप्नोति॥एवं यो यया वृत्त्याजीवति स तत्फलारंभस्त्वेतेनोपसृष्टो वेदितव्यः॥६॥एवं कारकज्ञाप
कहेतुन निधाय विघ्नोपशांत्यर्थं कर्म विधातुमाह॥स्नपनमिति॥तस्य विनायकोपसृष्टस्यानागत
विनायकोपसर्गपरिहारार्थिनो वा स्नपनमभिषेचनं कर्त्तव्यं॥पुण्ये स्वानुकूल्यादिनक्षत्रयुक्ते ह्नि दिवसे

वणिक्लाभं न चाप्नोति कृषिं चापि कृषीवलः॥६॥स्नापनं तस्य कर्त्तव्यं
पुण्येऽह्नि विधिपूर्वकं॥गौरसर्षपकल्केन साज्येनोत्सादितस्य च॥७॥सर्वौ
षधैः सर्वगंधैर्विलिप्तशिरसस्तथा॥भद्रासनोपविष्टस्य स्वस्तिवाच्या द्विजाः शु
भाः॥८॥

नरास्तौ विधिपूर्वकं॥शास्त्रोक्तेतिकर्त्तव्यतासहितं स्नपनविधिमाह॥गौरसर्षपकल्केन सिद्धार्थपिष्टे
न घृतलोलीकृतेनोत्सादितस्योद्वर्त्तितांगस्य ते॥यासर्वौषधैः प्रियंगुनागकेसरादिभिः सर्वगंधैश्चंद
गुरुकर्पूरादिभिर्विलिप्तशिरसो वक्ष्यमाणभद्रासनोपविष्टस्य द्विजाः ब्राह्मणाः शुभाः श्रुताध्ययनसंप
न्नाः शोभनाकृतयश्च वारीयस्य स्वस्ति भवंतो ब्रुवंत्विति वाच्याः॥८॥ ॥ ॥ त्रिव० ३९

समये ग्राह्यक्रमादिमा पुण्याहवाचनं कुर्यादित्याह॥अश्वस्थानादिति॥अश्वस्थान गजस्थानवल्मीक
सरित्संगमाद्धोह्याहृदित्यः आहृतां पंचविधां मृदं गोरोचनां गंधान् चंदनकुंकुमागुरुप्रभृतीन् गुग्गुलं च
देनास्वप्सु निक्षिपेत्॥या आहृता एकवर्णैश्चतुर्भिः कुंभैरव्रणैरस्फुटितैः कालकैर्ह्रदाद्ग्राह्याः संग
मात्तत्र नश्चानडुहे चर्म्मणि रक्ते लोहितवर्णे तत्ररलोमि प्राचीनाग्रीवे भद्रं मनोरममासनं श्रीपर्ण्या

अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात्॥मृत्तिकां रोचनां गंधान्गुग्गुलं चाप्सु नि
क्षिपेत्॥९॥या आहृता ह्येकवर्णैश्चतुर्भिः कलशैर्ह्रदात्॥चर्मण्यानडुहे रक्ते स्थाप्यं भद्रासनं तत
॥१०॥

निर्मितं स्थाप्यं॥ततस्ताभिः कोदकमृत्तिकागंधादिभिः सहितां भ्वतादि पल्लवोपशोभितां नानास्रक्दामवेष्टितकं
ठां चंदनचर्चितां नववाहृतवस्त्रभूषितां चतस्रः पुष्पवादिदिक्षु स्थापयित्वा श्चै सुलिप्ते स्थंडिले रचितं पंच
वर्णस्वस्तिकोलोहितमानडुहं च मौत्तरलोमप्राचीनग्रीवमास्तीर्य तस्योपरिस्थितवस्त्रप्रच्छादितमासनं
स्थापयेदिति सदा भद्रासनागते स्मिन्नुपविष्टस्य स्वस्तिवाच्या द्विजाः॥१०॥ ॥ ॥

मि॰ आ॰ ८०

सहस्राक्षमिति॥स्वस्तिवाचनानंतरं जीववत्पतिपुत्राभी रूपगुणशालिनीभिः सुवेषाभिः कृतमंगलं भ्र
वदिदिशावस्थितं कलशमादायानेन मंत्रेण निषिंचेत्कुरुः॥सहस्राक्षमनेकशक्तिकं शतधारं बहुधा
ऋषिभिर्निर्मितं दिव्यं पावनं पवित्रं कृतमुत्पादितं तेनोदकेन त्वा विनायकोपसृष्टं विनायकोपसृष्टा
स्त्रीं नयेन निषिंचामि पावमान्यः पुनंतु॥तदनंतरं दक्षिणदेशावस्थितं द्वितीयं कलशमादा

सहस्राक्षं शतधारमृषिभिः पावनं कृतं॥तेन त्वामभिषिंचामि पावमान्यः पुनंतु ते॥१॥भगं ते वरुणो
राजा भगं सूर्यो बृहस्पतिः॥भगमिंद्रश्च वायुश्च भगं सप्तर्षयो ददुः॥२॥यत्ते केशेषु दौर्भाग्यं सीमंते य
च्च मूर्धनि॥ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नंतु ते सदा॥३॥ यानेन मंत्रेण निषिंचेत्॥२॥भगमिति॥भगं
कल्याणं ते तुभ्यं वरुणो राजा॥भगं सूर्यो भगं बृहस्पतिः भगमिंद्रं भगं वायुश्च भगं सप्तर्षयश्च ददुरिति॥
३॥ततस्तृतीयं कलशमादायानेन मंत्रेण निषिंचेत्॥यत्ते इति॥ते तव केशेषु यद्दौर्भाग्यं कल्याणं
सीमंते मूर्ध्नि ललाटे कर्णयोरक्ष्णोस्तत्सर्वमापो देव्यो घ्नंतु नाशयंतु सर्वदेति॥ततश्चतुर्थं कलशमादा
य पूर्वोक्तैश्चतुर्भिर्मंत्रैरभिषिंचेत्॥सर्वैर्मंत्रैश्चतुर्भिरिति स्मृतिस्मरणात्॥३॥ ॥ त्रि॰ व॰ ८०

स्नातस्येति॥उक्तेन प्रकारेण कृताभिषेकस्य मूर्ध्नि सव्यपाणिगृहीतकुशैस्तद्धितैः सार्षपतैलमुदुंबर
स्रुवेण स्रुवेण वक्ष्यमाणैर्मंत्रैर्जुहुयादाचार्यः॥४॥मितश्चेति॥मितसंमितशब्दौ विनायकस्य नामभि
स्वाहाकारांतैश्चतुर्थ्यंतैर्जुहुयादिति गतेन संबंधः॥स्वाहाकारयोगाच्चतुर्थीविभक्तिरंतश्च॥ॐ मिताय
स्वाहा॥संमिताय स्वाहा॥शालाय स्वाहा॥कंटकाय स्वाहा॥कुष्मांडाय स्वाहा॥राजपुत्राय स्वाहेति एवं मंत्रा न

स्नातस्य सार्षपं तैलं स्रुवेणोदुंबरेण तु॥जुहुयान्मूर्धनि कुशान्सव्येन परिगृह्य च॥४॥मितश्च संमितश्चैव
तथा शालकटंकटौ॥कुष्मांडो राजपुत्रश्चेत्यंते स्वाहासमन्वितैः॥५॥नामभिर्बलिमंत्रैश्च नमस्कार
समन्वितैः॥दद्याच्चतुष्पथे सूर्पे कुशानास्तीर्य सर्वतः॥कृताकृतांस्तंडुलांश्च पललौदनमेव च॥६॥

वेति॥अनंतरं लौकिकाग्नौ स्थालीपाकविधिना चरुं श्रपयित्वा एतैरेव षड्भिर्मंत्रैस्तस्मिन्नेवाग्नौ हुत्वा
च्छेषं बलिमंत्रैरिंद्राग्नियमनैर्ऋतवरुणवायवसोमेशानब्रह्मानंतानां नामभिश्चतुर्थ्यंतैर्नमो वि
शेषैः बलिं दद्यात्॥५॥अनंतरं किं कुर्यादित्याह॥दद्यादिति॥कृताकृतानुपहारद्रव्यजातं विनायकस्यो॥

मि०आ०
८१

महसंनिधानात्तज्जनन्याश्च शिरसा भूमिं गत्वा तत्पुरुषाय विद्महे। वक्रतुंडाय धीमहि। तन्नो दंती प्रचोदयादित्यनेन मंत्रेण विनायकं। सुभगायै विद्महे। काममालिन्यै धीमहि। तन्नो गौरी प्रचोदयादित्यनेनांबिकां नमस्कुर्यात्॥ ततश्चोपहारो द्रोणमात्रीं शूर्पे निधाय चतुष्पथे निदध्यात्॥ बलिं गृह्णन्त्विमे देवा आदित्या वसवस्तथा॥ मरुतोऽश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः॥ असुरा यातुधानाश्च पिशाचा मातरो नगा।

मत्स्यां पक्कांस्तथैवामान्मांसमेतावदेव तु॥ पुष्पं चित्रं सुगंधं च सुरां च त्रिविधामपि॥१७॥ मूलकं पूरिकापूपाः तथैवोंडेरकस्रजः॥ दध्यन्नं पायसं चैव गुडपिष्टं समोदकं॥१८॥ एतान्सर्वानुपाहृत्य भूमौ कृत्वा ततः शिरः॥ विनायकस्य जननीमुपतिष्ठेत्ततोंबिकां॥१९॥ ॥

॥ शाकिन्यो यक्षवेताला योगिन्यः पूतना शिवाः॥ जृंभकाः सिद्धगंधर्वा माया विद्याधरा नगाः॥ दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः॥ जगतां शान्तिकर्तारो ब्रह्माद्याश्च महर्षयः॥ मा विघ्नं मा च मे पापं मा संतु परिपंथिनः॥ सौम्या भवंतु तृप्ताश्च भूतप्रेताः सुखावहाः॥ इत्येतैर्मंत्रैः। कृताकृतास्तंडुलाः पललं तिलपिष्टं तस्मिन्मिश्रं ओदनं पललौदनं मत्स्याः पक्कामाश्च मांसमेतावदेव तु॥ ॥

वि०
८१

पक्कमपक्कं च पुष्पं चित्रं रक्तपीतादिनानावर्णं चंदनादिसुगंधिद्रव्यं सुरा त्रिविधा॥ गौडी पैष्टी माध्वी चेति॥ मूलकं हाकारो नद्यविशेषः पूरिका प्रसिद्धा॥ अपूपाः स्नेहपक्को गोधूमविकारः उंडेरकस्रजः॥ उंडेरकाः पिष्टमाषादिवेष्टितास्रजः॥ दध्यन्नं दधिमिश्रमन्नं पायसं गुडपिष्टं॥ गुडादिपिष्टं मोदका लड्डुकाः॥ अनंतरं विनायकं तज्जननीं चांबिकां वक्ष्यमाणमंत्रेणोपतिष्ठेत॥१९॥ किं कृत्वेत्याह॥ दूर्वेति॥

दूर्वासर्षपपुष्पाणां दत्वार्घं पूर्णमंजलिं॥२०॥ रूपं देहि यशो देहि भगं भगवति देहि मे॥ पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे॥२१॥ ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः॥ ब्राह्मणान्भोजयेद्दद्याद्वस्त्रयुग्मं गुरोरपि॥२२॥ ॥ ॥

कुसुमोदकेनार्घं दत्वा दूर्वादूर्वासर्षपपुष्पाणां पूर्णमंजलिं दद्यादुपतिष्ठेतेति गतेन संबंधः॥२०॥ उपस्थानमंत्रमाह॥ रूपं देहीति॥२१॥ विनायकोपस्थानेन गतं निःसादः॥ ततः इति॥ ततोऽभिषेकानंतरं यजमानः शुक्लांबरधरः शुक्लमाल्यानुलेपनो ब्राह्मणान्भोजयेद्दद्याद्यथाशक्ति दक्षिणां विनायकोद्देशेन ब्राह्मणेभ्यः॥२२॥

तत्रापि प्रयोगक्रमः चतुर्भिर्ब्राह्मणैः सार्द्धं शुक्लाम्बरो गुरुर्भद्रासनं रचयित्वानंतरं तत्सन्निधौ विना
यकं तज्जननीं चोक्तमंत्रनामाभ्यां गंधपुष्पादिभिः समभ्यर्च्य चरुं श्रपयित्वा भद्रासनोपविष्टस्य यजमा
नस्य पुण्याहवाचनं कृत्वा चतुर्भिः कलशैरभिषिच्य शिरसि हुत्वा चरुहोमं विधायाभिषेकः शालादि
तुलीकपाले भूमौ बलिं दद्यात् ॥ यजमानस्तु स्नानानंतरं शुक्लमाल्याम्बरधरो गुरुणा सहितो विना
यकांबिकाभ्यामुपसंहारं दत्वा शिरसा नमितं गत्वा सुकुसुमोदकेनार्घ्यं दत्वा मार्षपपुष्करेणाम
जलिं च दत्वा विनायकमंबिकां चोपतिष्ठेत् ॥ गुरुरुपहारशेषं सूर्पे कृत्वा चत्वारि निदध्यात् ॥ अ
नंतरं वस्त्रयुग्मं दक्षिणां दत्वा ब्राह्मणान् भोजयेत् ॥ ॥ इति विनायकस्नपनविधिः ॥ ॥

अस्यैव विनायकस्नापनस्योक्तोपसंहारेण संगीतं दर्शयितुमाह ॥ एवमिति ॥ एवमुक्तप्रकारेण विनाय
कं संपूज्य कर्म्मणां फलमविघ्नेन प्राप्नोतीत्युक्तोपसंहारः ॥ संयोगांतरमाह ॥ श्रियं चोत्कृष्टतमामाप्नोति
श्रीकामस्यानेन विधानेन च विनायकं संपूजयेदित्यर्थः ॥ आदित्यादिग्रहपीडायां निकमस्य लक्ष्म्यादिका
मस्य च ग्रहपूजा कर्म्मं विधास्यन् ग्रहपूजास्तु पक्रमति ॥ महांश्चैव विधानेन इति ग्रहानादित्यादीन् वक्ष्यमाण

एवं विनायकं पूज्य ग्रहांश्चैव विधानतः ॥ कर्म्मणां फलमाप्नोति श्रियं प्राप्नोत्यनुत्तमां ॥ १ ॥ आ
दित्यस्य सदा पूजां तिलकं स्वामिनस्तथा ॥ महागणपतेश्चैव कुर्वन्सिद्धिमवाप्नुयात् ॥ २ ॥ ॥

विधिना संपूज्य कर्म्मणां सिद्धिमाप्नोति श्रियं चाप्नोतीति ॥ २ ॥ निष्कामस्य संयोगेनाह ॥ आदित्यस्य भगवतः स
दा प्रतिदिवसं सदा प्रतिदिवसं रक्तचंदनकुंकुमादिभिः पूजां कुर्वन् यथा स्कंदस्य महागणपतेश्च तिलकं कु
र्वन्सिद्धिं मोक्षमाप्नोति ॥ आत्मज्ञानद्वारेण प्राप्नोतीति निष्कामसंयोगः ॥ आदित्यस्कंदगणपतीनामन्यतम
स्य सर्वेषां वा तिलकं स्वर्णनिर्मितं वा कुर्वन् सिद्धिमभिलषितामाप्नोति ॥ तथा च स्मृषि चेति काम्यसंयोगः ॥ २ ॥
इति गणपतिकल्पः ॥

ग्रहांश्चैवविधानतःकर्मणांफलमाप्नोतिश्रीयंप्राप्नोत्यनुत्तमामित्यनेनग्रहपूजापाकर्मणाविघ्नेनफलसि
द्धिश्चस्वफलमित्युक्तमिदानींफलांतराण्याह॥श्रीकामइति॥पूर्वोक्तस्यानुवादः॥शांतिकामश्चापुष्प
शांतिकामस्स्यादिहग्रथेंत्रवर्षणांद्दष्टिः॥आयुरपमृत्युजयेनदीर्घकालजीवनंपुष्टिरनवद्यत्वारी
रत्वमेतान्कामयतइतिद्दष्ट्यायुःपुष्टिकामः॥एतेकामादयोग्रहयज्ञंग्रहपूजांसमाचरेयुः॥तथाचर

कौश्री॥कामःशांतिकामोवाग्रहयज्ञंसमाचरेत्॥वृष्ट्यायुःपुष्टिकामोवातथैवाभिचरन्न
पि॥३॥सूर्यःसोमोमहीपुत्रःसोमपुत्रोबृहस्पतिः॥शुक्रःशनैश्चरोराहुःकेतुश्चेतिग्रहाःस्मृता
॥४॥ताम्रकात्स्फाटिकाद्रक्तचंदनात्स्वर्णकादुभौ॥रजतादयसःसीसात्कांस्यात्कार्याग्रहाःक्रमा
त्॥५॥

त्पिअद्दष्टोपायेनपरपीडाचरेस्तत्कामश्चग्रहयज्ञमाचरेत्॥३॥ग्रहानाह॥सूर्येति॥४॥ग्रहाःपूज्याइ
त्युक्तंकिंरूपास्तइत्याह॥ताम्रकादिति॥सूर्यादीनांमूर्तयःताम्रादिनिर्यथाक्रमंकार्याःस्वस्ववर्णैर्वर्णकै
ःपटेलेख्यानेमंडलकेषुवा॥गंधैश्चरक्तचंदनादिभिःयथावर्णंलेख्याइत्यन्वयः॥द्विजन्तवादिविरे॥॥

स्तुमत्स्यपुराणोक्तोद्दष्टव्यः॥यथाह॥पद्मासनःपद्मकरःपद्मगर्भसमद्युतिः॥सप्ताश्वसप्तरज्जुश्चद्वि
जःस्यात्सदारविः॥श्वेतःश्वेतांबरधरोदशाश्वश्वेतभूषणः॥गदापाणिर्द्विबाहुश्चकर्तव्योवरदःशशी॥रक्तमा
ल्यांबरधरःशक्तिशूलगदाधरः॥चतुर्भुजोमेषगमोवरदःस्याद्धरासुतः॥पीतमाल्यांबरधरःकर्णिकार
समद्युतिः॥खड्गचर्मगदापाणिःसिंहस्थोवरदोबुधः॥देवदैत्यगुरूतद्वत्पीतश्वेतौचतुर्भुजौ॥दंडिनौवर
दौकार्यौसाक्षसूत्रकमंडलू॥इंद्रनीलद्युतिःशूलीवरदोगृध्रवाहनः॥बाणबाणासनधरःकर्तव्यो

सुवर्णैर्वापटेलेख्यागंधैर्मंडलकेषुच॥६॥

र्कसुतःसदा॥करालवदनःखड्गचर्मशूलीवरप्रदः॥नीलसिंहासनस्थश्चराहुरत्रप्रशस्यते॥धूम्रा
द्विबाहवःसर्वेगदिनोविकृताननाः॥गृध्रासनगतानित्यंकेतवःस्युर्वरप्रदाः॥सर्वेकिरीटिनःकार्याग्रहा
लोकहितावहाः॥अंगुलेनोच्छ्रिताःसर्वेशतमष्टोत्तरंसदेति॥एतेषांस्थापनोदेशश्चतत्रोक्तः॥मध्ये
तुभास्करंविद्याच्छशिनंपूर्वदक्षिणे॥दक्षिणेलोहितंविद्याद्बुधंपूर्वोत्तरेणतु॥उत्तरेणगुरुंविद्यात्पू
र्वेणैवतुभार्गवं॥पश्चिमेनशनिंविद्याद्राहुंदक्षिणपश्चिमे॥पश्चिमोत्तरतःकेतुंस्थापयेच्छुक्लतंडुलैरि
ति॥६॥

मि०क्षा०
८४

पूजाविधिमाह॥यथावर्णमिति॥यथावर्णं यस्य ग्रहस्य यो वर्णस्तद्वर्णानि वस्त्रगंधपुष्पाणि देयानि॥ब
लयश्च धूपस्तु सर्वेभ्यो गुग्गुलो देयः चरवः प्रतिदैवतं॥अग्निप्रतिष्ठापनाज्यादिपूर्वकं चतुरस्रचरो मुष्टिनि
र्वपति॥अमुष्मै त्वा जुष्टं निर्वपामि त्वामित्यादिविधिना कार्याः॥अनंतरं तु समिद्धोमविधानाच्चरोस्तत्कर्मकत्वा
आदित्याद्युद्देशेन यथाक्रमं वक्ष्यमाणाः समिधो वक्ष्यमाणप्रकारेण हुत्वा चरवो होतव्याः॥७॥मं

यथावर्णं प्रदेयानि वासांसि कुसुमानि च॥गंधाश्च बलयश्चैव धूपो देयश्च गुग्गुलः॥७॥कर्तव्या
मंत्रवंतश्च चरवः प्रतिदैवतं॥७॥आकृष्णेन इमं देवा अग्निर्मूर्धा दिवः ककुत्॥उद्बुध्यस्वेति च ऋचो
यथासंख्यं प्रकीर्तिताः॥८॥बृहस्पते अति यदर्यस्तथैवान्नात्परिस्रुतः॥शन्नो देवीस्तथा कांडात्केतुं कृ
ण्वन्निमांस्तथा॥९॥अर्कः पलाशः खदिरोऽपामार्गस्तु पिप्पलः॥उदुंबरः शमी दूर्वा कुशाश्च स
मिधः क्रमात्॥१०॥

त्रानाह॥आकृष्णेनेति॥आकृष्णेन रजसा वर्तमानः इत्यादयो नव मंत्रा वेदितव्याः॥
सूर्यादीनां यथाक्रमं॥८॥९॥१०॥इदानीं समिध आह॥अर्क इति॥अर्कपलाशादयो यथाक्रमं सूर्यादी
नां समिधो भवंति तत्र च सार्द्रा अनुन्नासत्वच प्रादेशमात्राः कर्तव्याः॥१०॥ ॥

शिवं
८४

किंच एकैकस्येति॥आदित्यादीनामेकैकस्याष्टशतसंख्याता॥अष्टाविंशतिसंख्याता वा यथासंभवं म
धुना सर्पिषा दध्ना च क्षीरेण वा युता अर्कादिसमिधो होतव्याः॥११॥गुडेति॥गुडमिश्र ओदनो गुडौद
नः पायसं हविष्यं मुन्यन्नादि। क्षीरषाष्टिकं क्षीरमिश्रः षाष्टिकोदनः दधिमिश्र ओदनः॥एतानि गुडौदनादीनि
यथाक्रममादित्याद्युद्देशेन भोजनार्थं द्विजेभ्यो ब्राह्मणेभ्यो दद्यात्॥ब्राह्मणसंख्या च यथाविभवं द्रष्टव्या

एकैकस्याष्टशतमष्टाविंशतिरेव वा॥होतव्या मधुसर्पिर्भ्यां दध्ना क्षीरेण वा
युताः॥११॥गुडौदनं पायसं च हविष्यं क्षीरषाष्टिकं॥दध्योदनं हविश्चूर्णं मांसं चि
त्रान्नमेव च॥दद्याद्ग्रहक्रमादेतद्द्विजेभ्यो भोजनं ततः॥१२॥धेनुः शंखस्तथानड्वा
न्हेम वासो हयः क्रमात्॥कृष्णा गौरायसं छाग एता वै दक्षिणाः स्मृताः॥१३॥

॥गुडौदनाद्यन्नावेतु यथालोभमोदनानि पादप्रक्षालनादिविधिपूर्वकं सत्कृत्य सन्मार्गपुरःसरं दद्यात्
॥१२॥दक्षिणामाह॥धेनुरिति॥एताश्च मन्वादिभिः एतच्च संभवे सति असंभवे तु यथोक्ताशक्तितोऽन्य
देव किंचिद्देयं॥शांतिकामेन विशेषेण ग्रहाः सर्वे पूजयितव्याः॥१३॥ ॥ ॥

मि॰श्रा॰ ८५ इत्युक्तं तत्र विशेषमाह ॥ यस्येति ॥ यस्य यो ग्रहो यदा दुष्टोऽष्टमादिदुष्टस्थानस्थितः स तं ग्रहं तदा यत्नेन
विशेषेण पूजयेत् ॥ यस्मादेषां ग्रहाणां ब्रह्मणा पूर्वं वरो दत्तः पूजिताः संतो यूयमिष्टप्रापणेनानिष्टनिर-
सनेन पूजितारं पूजयिष्यथेति ॥ अविशेषेण द्विजानधिकृत्य शांतिकपौष्टिकादीनि कर्माण्युक्तानि
नि ॥ तथा निषेकगुणमुक्त्वा राज्ञो विशेषेणाधिकार इति दर्शयति ॥ ग्रहेति ॥ ९ ॥ नरेंद्राणामभिषेकश्च

यस्य यस्य यदा दुःस्थः स तं यत्नेन पूजयेत् ॥ ब्रह्मणैषां वरो दत्तः पूजि
ताः पूजयिष्यथ ॥ ९ ॥ ग्रहाधीना नरेंद्राणामुच्छ्रायाः पतनानि च ॥ ॥

याणां ग्रहाः ग्रहादिपूज्यतमाः अनेनामीषामपि पूज्या इति गम्यते ॥ तत्र पूज्यत्वेऽपि हेतुमाह ॥ ग्रहाणामभ्यु-
दयविनिपातौ ग्रहाधीनौ यस्मात्तस्मादस्मादधिकारिणः पूज्याः ॥ किंच जगतः स्थावरजंगमात्मकस्य भाव-
भावयोरुत्पत्तिनिरोधौ ग्रहाधीनौ तत्र यथा ते पूजिताः सदा सुखकाः जगदुत्पत्तिनिरोधौ ग्रहाधीनौ तत्र ग्रहपद्ये
ते पूजिताः स्वस्वकालोत्पत्तिनिरोधौ भवतः स्थितिसमये नो पातकाले निरोधश्च जगमहाश्च
रत्वाच्च नरेंद्राणां योगक्षेमकारिणां ॥

शिव॰ ८५

पूज्यतमा ग्रहा इति ॥ तेषां विशेषेण शांतिकादिष्वधिकारः ॥ तथा च गौतमेन ॥ राजा सर्वस्येष्टे ब्राह्मणवर्जं सा-
ति राजानमकृत्य वर्णानाश्रमांश्च न्यायतोऽभिरक्षेच्चलतश्चैनान्स्वधर्मे स्थापयेत् सादीनां कांडिकर्मानुक्रम्य ।
निवर्द्देष्योऽमात्यविघ्नतकाप्यनुसु ॥ तान्यां क्रियेते तेन दधीनमपि योगक्षेमं प्रतिजानत इति शांतिक-
पौष्टिकाद्यनुष्ठानहेतुमभिधाय शांतिपुण्याहस्वस्त्ययनपुण्यमंगलं संयुक्तान्यानुदयिकानि विद्वेषेसंत-
तानि चारबलिगिरिवृद्धियुक्तानि चकुर्याज्ञो पादिति कादिनिदर्शितानि ॥ १० ॥ इति ग्रहशांतिप्रकरणं

भावाभावौ च जगतस्तस्मात्पूज्यतमा ग्रहाः ॥ १० ॥ इति ग्रहशांतिः ॥ महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः ॥
विनीतः सत्वसंपन्नः कुलीनः सत्यवाक्शुचिः ॥ ११ ॥ साधारणेन गृहस्थधर्मानुक्त्वा इदानीं राज्ञामभिषेकादि-
गुणयुक्तस्य गृहस्थधर्मविशेषधर्मानाह ॥ महोत्साहेति ॥ पुरुषार्थसाधनकर्मारंभेऽध्यवसाय उत्साहः महानु-
त्साहो यस्यासौ महोत्साहः ॥ बहुदेयार्थदर्शी स्थूललक्षः परकृतोपकारापकारौ न विस्मरतीति कृतज्ञः ॥ तपो-
ज्ञानादिवृद्धानां सेवकः विनयेन युक्तो विनीतः विनयश्चाध्यात्मविनयः पूर्वोक्तः स्यात् कस्मात् धर्मकल्पना पच्यते ॥ न संवार्थ-
यपयेत ॥ नाकस्माच्च प्रपंचदेहितादिनो तत् सत्वसंपन्नः संपदापदापद्योर्हर्षविषादरहितः ॥ मातृपितृश्चाभिजन-
न यान् कुलीनः सत्यवाक् सत्यवदनशीलः ॥ शुचिर्बाह्याभ्यंतरशौचयुक्तः ॥ ११ ॥

अदीर्घेति॥ अनल्पकार्याणां कर्मणामारंभे प्रारब्धानां च समापने ऽलसावदीर्घसूत्रः॥ अवगतार्थाविस्मरणशीलः स्मृतिमान्॥ अक्षुद्रो ऽसद्गुणद्वेषी॥ अपरुषः परदोषकीर्त्तन॰ धार्मिको वर्णाश्रमधर्मान्वितः॥ न विद्यंते व्यसनानि यस्यासौ अव्यसनः॥ व्यसनानि चाष्टादश॥ यथाह मनुः॥ मृगयाक्षा दिवास्वप्नः परिवादः स्त्रियो मदः॥ तौर्यत्रिकं वृथाट्या च कामजो दशको गणः॥ पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणं॥ वाग्दंडजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः॥ तत्र सप्त कष्टतमानि यथाह॥ पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमं॥ एतत्कष्ट

अदीर्घसूत्रः स्मृतिमानक्षुद्रोऽपरुषस्तथा॥ धार्मिकोऽव्यसनश्चैव प्राज्ञः शूरो रहस्यवित्॥२॥ स्वरंध्रगोप्ताऽऽन्वीक्षिक्यां दंडनीत्यां तथैव च॥ विनीतस्त्वथ वार्त्तायां त्रय्यां चैव नराधिपः॥३॥

तमं विंद्याच्चतुष्कं कामजे गणे॥ दंडस्य पातनं चैव वाक्पारुष्यार्थदूषणे॥ क्रोधजेऽपि गणे विद्यात्कष्टमेकं त्रिके सदेति॥ प्राज्ञो गंभीरार्थविधारणक्षमः॥ शूरो निर्भयः॥ रहस्यवित् गोपनीयार्थगोपनचतुरः॥ स्वरंध्रगोप्ता स्वस्य मंत्रराज्यांगेषु परप्रवेशद्वारं छिद्रं तत्स्वरंध्रं तस्य गोप्ता प्रच्छादिता॥ आन्वीक्षिकात्मविद्यायां दंडनीत्यामर्थयोगक्षेमोपयोगिन्यां वार्त्तायां कृषिवाणिज्यापशुपालनरूपायां धनोपचयहेतौ त्रय्यामृग्यजुःसामरूपा॥

त्रय्यां च विनीतः तत्तद्विज्ञैः शिक्षां नीतः॥ यथाह मनुः॥ त्रिविधेभ्यस्त्रयीं विद्यां दंडनीतिं च तद्विदः॥ आन्वीक्षिकीं चात्मविद्यां वार्त्तारंभांश्च लोकत इति॥ नराधिपो राज्याभिषिक्तः स्यादिति संबंधः॥३॥ एवमभिषिक्तगुणयुक्तः स्वांतरंगान्धर्माननिधायेदानीं बहिरंगानाह॥ स मंत्रिण इति॥ मोहोत्साहादिगुणैर्युक्तो राजा मंत्रिणः कुर्वीत॥ कथंभूतान् प्राज्ञान् हिताहितविवेककुशलान्॥ मौलान् स्ववंशपरंपरायातान् स्थिरान्म

स मंत्रिणः प्रकुर्वीत प्राज्ञान्मौलान् स्थिराञ्छुचीन्॥
तैः सार्द्धं चिंतयेद्राज्यं विप्रेणाथ ततः स्वयं॥४॥ ॥

ह्यपि हर्षविषादस्थाने विकाररहितान्॥ शुचीन् धर्मार्थकामासूपधाशुद्धान्॥ ते च सप्ताष्टौ वा कार्याः॥ यथाह मनुः॥ मौलान् शास्त्रविदः शूराँल्लब्धलक्षान् कुलोद्गतान्॥ सचिवान्सप्त चाष्टौ वा प्रकुर्वीत सुपरीक्षितान्॥ एवं मंत्रिणः पूर्वं कृत्वा तैः सार्द्धं राज्यं संधिविग्रहादिलक्षणं कार्यं॥ चिंतयेद्व्यस्तैः समस्तैश्च तदनंतरं तेषामभिप्रायं ज्ञात्वा सकलशास्त्रार्थविचारकुशलेन पुरोहितेन सह कार्यं विविच्य ततः स्वयं बुद्ध्या कार्यं चिंतयेत्॥४॥ ॥

मि० आ०
८७

किंभूतं पुरोहितं कुर्यादित्याह ॥ पुरोहितमिति ॥ पुरोहितं सर्वेषु दृष्टादृष्टार्थेषु कर्मसु पुरस्तान्निहितं दानमा
नसत्कारैरात्मसंबंधं कुर्यात् ॥ कथंभूतं दैवज्ञं ग्रहोत्पातनक्षत्रमर्मादिवेदितारं उदितोदितं विद्याभिजना
नुष्ठानादिभिरुदितैः शास्त्राकरुदितं समृद्धं दंडनीत्यां अर्थशास्त्रे कुशलं अथर्वाङ्गिरसे च शान्तादिकर्मणि
॥५॥ श्रौतेति ॥ श्रौतं अग्निहोत्रादि स्मार्तं औपासनादि तत्क्रियाहेतोर्निष्पत्त्यर्थं अनुष्ठानसिद्ध्यर्थं ऋत्विजो वृ

पुरोहितं च कुर्वीत दैवज्ञमुदितोदितं ॥ दंडनीत्यां च कुशलमथर्वाङ्गिरसे तथा ॥५॥
श्रौतस्मार्तक्रियाहेतोर्वृणुयादेव चर्त्विजः ॥ यज्ञांश्चैव प्रकुर्वीत विधिवद्भूरिदक्षिणान् ॥
॥६॥ भोगांश्च दद्याद्विप्रेभ्यो वसूनि विविधानि च ॥ अक्षयोयं निधी राज्ञां यद्विप्रेषूपपादितं ॥७॥

णुयात् ॥ राजा अश्वमेधराजसूयादीन् विधिवद्यथाविधानं भूरिदक्षिणान् बहुदक्षिणान् यज्ञान् कुर्यात् ॥६॥ किंच शिव०
भोगानिति ॥ ब्राह्मणेभ्यो भोगान् सुखानि तत्साधनद्वारेण दद्यात् ॥ वसूनि वर्णरूप्यादीनि विविधानि ८७
नानाप्रकाराणि यस्मादेष राज्ञामक्षयो निधिः सर्वाधार्यं ब्राह्मणेभ्यो दीयते साधारणधर्मत्वेनिदानत्व
स्योक्तस्य राज्ञां दानप्राधान्यप्रतिपादनार्थं पुनर्वचनं ॥७॥ ॥

किंच अस्कन्नेति ॥ यत्नेनासत्कन्नं स्खलनरहितं अव्ययं क्षयरहितं सारहितं प्रायश्चित्तैरदूषितं प्रायश्चित्तापास्र
हितं ॥८॥ वसूनि विप्रेभ्यो दद्यादित्युक्तं कथं परिपाद्य दद्यादित्याह ॥ अलब्धेति ॥ अलब्धं लाभोपद्
र्मशास्त्रानुसारेण यत्नेन पालयेत् ॥ लब्धं च स्वयमवेक्षया रक्षेत् तं नीत्या वाणिज्यादिकया वृद्धि
नयेत् ॥ वृद्धिपात्रेषु धर्मार्थकामयुक्ते त्रिविधे सुपात्रेषु निक्षिपेद्दद्यात् ॥९॥ पात्रे निक्षिप्य किं कुर्या

अस्कन्नमव्ययं चैव प्रायश्चित्तैरदूषितं ॥ अग्नेः सकाशाद्विप्राग्नौ हुतं श्रेष्ठमिहोच्यते
॥८॥ अलब्धमीहेद्धर्मेण लब्धं धर्मेण पालयेत् ॥ पालितं वर्धयेन्नित्यं वृद्धं पात्रेषु निक्षि
पेत् ॥९॥ दत्वा भूमिं निबंधं च कृत्वा लेख्यं च कारयेत् ॥ आगामिभद्रनृपतिपरिज्ञानाय पा
र्थिवः ॥१०॥

दित्याह ॥ दत्वेति ॥ यथोक्तविधिना भूमिं दत्वा निबंधं कृत्वा भूमिनिबंधं वा एकस्य भांडनरकस्य एतावन्तो
पत यस्ते षामनेन प्रतिगृहीतमिति परिज्ञानाय पार्थिवो नृपतिरनेन भूपतेरेव भूमिदाने निबंध
दाने वाधिकारो पत्नो गपतिरिति दर्शितं ॥१०॥ लेख्यं कारयेदित्युक्तं कथं कारयेदित्याह ॥ ॥

मि०प्रा० ८३ पटेइति॥कार्पासिके पटे तीम्रपटेताम्रपलकेवात्मानोवंश्यानूम्प्रपितामहपितामहपितामहपितृन्बहु
चनस्यार्थवत्वायवंशवीर्यश्रुतादिगुणोपवर्णनपूर्वकमभिलिख्यात्मानंचशब्दान्प्रतिग्रहीतारंप्रतिग्र
हपरिमाणंदानछेदोपवर्णनंनामनिलिख्यप्रतिगृह्यइति॥प्रतिग्रहोनिबंधुस्यहूपकादिपरिमाणंदीय
तइतिदानंक्षेत्रादिस्तस्यछेदछिद्यतेःविथ्यातेःनेनतिछेदोनघाघाघाटनिवर्त्तनपरिमाणंतस्योपनयनंप्र

पटेवाताम्रपटेवास्वमुद्रोपरिचिह्नितं॥अभिलेख्यात्मनोवंश्यानात्मानंचमही
पतिः॥१२॥प्रतिग्रहपरिमाणंदानंछेदोपवर्णनं॥ ॥श्रीरामयनमः॥१॥

मुकनयादक्षिणतोयंग्रामक्षेमंवापूर्वतोःमुकग्रामस्यैतावंतिनिवर्त्तनमित्यादिपरिमाणंचलेख्यमेव
॥आघारस्वनदीनगरपत्मादिःश्वानरिखेनन्यूनसर्जनाधिकनावसंनवात्रन्लिहत्पर्यं॥स्वहस्तेनस्वहस्तलि
खितेनमतंमेमुकपुत्रस्यघदत्रोपरिखितं॥इत्यनेनसंपन्नंयुक्तकालेनविधिविधेनत्राकत्रयानोतसंवत्स त्रिव० ८४
रूपेणदाताकालेनचंद्रसूर्योपरागादिनासंपन्नंस्वमुद्रयागरुडवाहादिरूपयोपरिबहिश्चिह्नितंमं॥

कितंस्थिरंदृढंकृतंत्रासनंसंख्यांतनविघ्नंतोन्तपनयोनेनादानाछेद्योनुपालनमिति॥त्रासनंकारयेन्महीप
तिनीनागपतिसंधिविग्रहादिकारिणंतयंकिंचित्संधिविग्रहकारितुनवेधुस्तस्यलेखकस्त्वयंराज्ञासम
दिष्टःपलिखितन्नत्रासनमितिस्मरणात्॥दानमात्रेणोवदानफलेसिद्धेत्रासनकारणंन्लोगान्त्रिव्रा
तित्रायार्थः॥१३॥इदानींराज्ञोनिवासस्थानमाह॥रम्यमिति॥रमणीयमवनोकंचणकादिनिःप्रवाव्यपशु

स्वहस्तकालसंपन्नंत्रासनंकारयेत्स्थिरं॥१२॥रम्यंपशव्यमाजीव्यं
जांगलंदेशमाविशेत्॥ तत्रदुर्गाणिकुर्वीतजनकोशात्मगुप्तये॥१३॥

मोहितंपशुइद्धिकरं॥आजीव्यमुपजीव्यं॥कंदमूलपुष्पफलादिभिर्जांगलं॥यद्यप्यल्पोदकतरुपर्वतोदे
शोजांगलंतथाप्यत्रसमजलचरपर्वतोदेशोजांगलशब्देनाभिधीयते॥तंदेशमाविशेदधिवसेत्॥
तत्रैवविविधदेशेजनानांकोशस्यसुवर्णादेरक्षणार्थमात्मनश्चदुर्गंकुर्वीतेति॥दुर्गंचषड्विधं॥यथाहम
नुः॥धनुदुर्गंमहीदुर्गंदुर्गंचाद्यमेववा॥न्टदुर्गंगिरिदुर्गंचसमाश्रित्यवसेत्पुरमिति॥१३॥

मि०आ०
८१

किंचतत्रेति॥तत्रतत्रधर्म्यार्थरक्षादिषु अध्यक्षान्योग्यान्विकारिणः प्रकुर्यात्॥ नियुंजीत धर्मकृत्येषु धर्मज्ञा
नर्थकृत्येषु स्त्रीषु क्लीबान्नियुंजीत नीचान्नीचेषु कर्मसु इति॥ कीदृशान्निष्णातान्नूनं तत्तद्व्यापारान्कुश
लान्तद्व्यापारचतुरान्॥ शुचीन् शुचिर्विधोपधाशुद्धान्॥ आयुःकर्मसु सुवर्णादिषु उत्पत्तिस्थाने व्ययकर्मसु
सुसुवर्णादिदानस्थानेषु च तत्स्थानं अन्नसारवचनाद्वात्मात्तत्तदादिगुणयुक्तान्॥ तथा च॥ यथाहं च

तत्र तत्र च निष्णातानध्यक्षान्कुशलाञ्छुचीन्॥ कुर्यादायव्ययकर्मान्तव्ययकर्मसु चोद्यतान्॥१४॥
नातःपरतरो धर्मो नृपाणां यद्रणार्जितं॥ विप्रेभ्यो दीयते द्रव्यं प्रजाभ्यश्चाभयं सदा॥१५॥

पपधायुधिरप्रमादो नियुक्त॥ कार्येषु व्यसनानावस्थापितक्रियोऽर्प्यते॥१४॥ भोगांश्च दद्याद्विप्रेभ्यो वसू
निविविधानि चेति सामान्येन स्वस्वदानमुक्तमिदानीं नृपाणां विक्रमार्जितस्य दानविशेषमाह॥ नातःप्रति
॥नास्मादुत्तरतरो धर्मो नृपाणां यद्धावंति विप्रेभ्यो दीयते यद्द्रव्यं प्रजाभ्योऽभयप्रदानं॥१५॥ रणार्जितं देयमित्युक्तं
द्रव्यार्जनापरेण प्रवृत्तस्य विघ्नविपत्तिसंभवतीति न धर्मो निरर्थधर्म इति न ततो निवृत्तिरेव श्रेयसी सत आह॥

त्रि०व०
८१

येति॥ ये भूम्यर्थमाहवेषु प्रहन्यन्ते अपराङ्मुखाः अभिमुखा वध्यंते मार्यंते ते स्वर्गं यांति॥ योगाभ्यासरता यथा अ
घातकूटैरविषदिग्धैरकर्णिभिरायुधैर्याधारो भवंति॥१६॥ किंच पदानीति॥ स्वबलेषु करितुरगरथपदातिषु भ
ग्नेषु निवर्त्तिनां॥ परबलाभिमुखयायिनां पदानि क्रतुतुल्यानि॥ विपर्यये दोषमाह॥ विपलायिनां पराङ्मुखानां
हतानां राजा सुकृतमादत्ते॥१७॥ तवाहमिति॥ तवाहमिति यो वदति क्लीबं नपुंसकं निर्हेतिं निरायुधं परसंग

य आहवेषु वध्यंते भूम्यर्थमपराङ्मुखाः॥ अकूटैरायुधैर्यांति स्वर्गं ते योगिनो यथा॥१६॥ पदानि क्रतुतुल्या
नि भग्नेष्वविनिवर्त्तिनां॥ राजा सुकृतमादत्ते हतानां विपलायिनां॥१७॥ तवाहंवादिनं क्लीबं निर्हेतिं पर
संगतं॥ न हन्याद्विनिवृत्तं च युद्धप्रेक्षणिकं यथा॥१८॥
तोऽन्येन सह युध्यमानं विनिवृत्तं युद्धादिति ह
त्तं युद्धप्रेक्षणो युद्धदर्शनागतं न हन्यादिति सर्वत्र संबंधः॥ आदिग्रहणादश्वसारथ्यादीनां ग्रहणं॥ यथाह
गौतमः॥ न दोषो हिंसायामाहवेऽन्यत्र व्यश्वसारथ्यनायुधकृताञ्जलिप्रकीर्णकेशपराङ्मुखोपविष्टस्थले
वृक्षारूढदूतगोब्राह्मणवादिभ्य इति॥ तथा शंखोऽप्याह॥ न पानीयं पिबंतं न भुंजानं नोपानहौ मुंचंतं नाव
र्माणं सवर्माणं स्त्रियं न करेणुं न वाजिनं न सारथिनं सूतं न दूतं न ब्राह्मणं न राजानमराजा हन्यादिति॥१८॥

मि० ध्या०
८१

कृतरक्ष इति ॥ कृतरक्षः पुमान्मनस्वी रक्षां विधाय प्रतिदिनं प्रातःकाले त्र्यायस्य यमेवाय व्ययौ पश्येत् तत
तो व्यवहारं दृष्ट्वा मध्याह्नकाले स्नात्वा कामतो रुचिं भुंजीत ॥ १९ ॥ हिरण्यमिति ॥ तदनंतरं हिरण्यादि
कं व्याप्टतैः हिरण्याद्यानयनन्नियुक्तैरानीतं स्वयमेव निरीक्ष्य भांडागारे तु निक्षिपेत् ॥ ततश्चारान्स्वरा
ष्ट्रसागतान्पश्येत् ॥ ये परराजहृत्तांत परिव्राजकतापसादिरूपेण गूढचारिणो वोचितास्तांश्च

कृतरक्षः समुत्थाय पश्येदायव्ययं स्वयं । व्यवहारांस्ततो दृष्ट्वा स्ना
त्वा भुंजीत कामतः ॥ १९ ॥ हिरण्यमाहृतानीतं भांडागारे तु निक्षिपे
त् ॥ पश्येच्चारांस्ततो दूतान्प्रेषयेन्मंत्रिसंगतः ॥ २० ॥

द्गाक चिन्निवेन्नायेत् ॥ तदनंतरं दूतांश्च पश्येत् ॥ दूतस्तु प्रकरण एव राजांतरे प्रतिगता गतमाचरंति
॥ ते च त्रिविधा निसृष्टार्थाः स्तां त्रासनं हस्ताश्लोकः ॥ तत्र निसृष्टार्थाः राजकार्याणि देशकालोचितानि
स्वयमेव कथयितुं क्षमाः ॥ मुक्तमात्रं ये रस्मै प्रेषितानागतान्मंत्रिसंयतः पश्येत तदा तन्मात्रकल्प्य पु
नः प्रेषयेत् ॥ २० ॥ ॥

त्रि० व०
८०

तत इति ॥ तदनंतरमपराह्णे स्वैरं यथेष्टं एकांतःपुरविहारी स्यात् ॥ मंत्रिभिर्यो विश्वासिभिः कलाकुशलै
ः परिहासवेदिभिः परिवृतः स्त्रीभिः स्वरूपयौवनसंपन्नैर्वैदग्ध्यशालिनीभिः ॥ तु कदाचन विरहैश्चैव स्त्रीभि
रंतःपुरं सह विहृत्य च यथाकामं पुनः कार्याणि चिंतयेत् इति मनुस्मरणात् ॥ ततो विशिष्टैर्वस्त्रकुसु
मविलेपनालंकारैः कृतो हस्त्यश्वरथपदातिबलानि दृष्ट्वा सेनान्या सेनापतिना सह तत्क्षणं देशका
लोचितं चिंतयेत् ॥ २१ ॥ संध्यामिति ॥ ततः सायंकाले संध्यामुपास्य सामान्ये तत्रापि पुनर्वचनेन

तस्वीरविहारी स्यान्मंत्रिभिर्वा समागतः ॥ बालानां दर्शनं कृत्वा सेनान्या सह चिंतयेत् ॥ २१ ॥ संध्यामुपा
स्य शृणुयाच्चारणान्मूढभाषितान् ॥ गीतं नृत्यं च भुंजीत पठेत्स्वाध्यायमेव च ॥ २२ ॥ पक्कलवादविस्मर
णार्थं ॥ तदनंतरं ये पूर्वं दृष्टाः किंचित्स्थाने निवेशनात्तेषां चारणानां गूढभाषितं मंतर्वेत्रमनित्राणस्त्रपाणिं
शृणुयात् ॥ तत्कं च सध्याचोपास्य शृणुयाद्दंतवेत्रमनित्रास्त्रनृत्त् ॥ रहस्याख्यापिनां चैव प्रणिधानां च चेष्टि
तमिति ॥ ततो नृत्यगीतादिभिः किंचित्कालं क्रीडित्वा कक्ष्यांतरं प्रविश्य भुंजीत ॥ ततो बादक्षांतरं तन्मसम
नुज्ञाप्य तं जनं प्रविश्य भोजनार्थं च स्त्रीभिरंतःपुरं सहेति ॥ ततो विस्मरणार्थं यथायात्राक्रिया स्वाध्यायं जपेत
॥ २२ ॥

मि॰ आ॰
९१

संविशेदिति॥ तदनंतरं संस्वबलतूर्यादिघोषेण संविशेत् स्वप्यात्॥ तथैव तूर्यादिघोषेण प्रतिबुध्येत विबुध्य
च शास्त्राणि विद्धि विश्वासिभिः सहैकाकी वा पश्चिमे यामे शास्त्राणि चिंतयेत्॥ स्वधर्मकर्तव्यताश्च सर्वकार्या
णि चरानतछस्वछं प्रसूचयेत्॥ अस्वस्थः पुनः सर्वकार्येष्वमात्यं नियोजयेत्॥ एतदुक्तं समानिष्टेदरोगः पृथिवीप
तिः॥ अस्वस्थः सर्वमेवं तु मंत्रिमुख्ये नियोजयेत्॥ विषयस्ततस्वाराज्ञात्वेषन्सुसादरान्॥ २२॥ कृत्वि
कीति॥ अनंतरं तत्र स्वएव विश्वस्तास्वारान्नदानमानसत्कारैः पूजितास्तेषु मामंतादधिकारादिषु महीप

संविशेत्तूर्यघोषेण प्रतिबुध्येत्तथैव च॥ शास्त्राणि चिंतयेद्बुध्वा सर्वकर्तव्यतास्तथा॥ २३॥ कृत्विक्पुरोहित
चार्यैराशीर्भिरभिनंदिताः॥ दृष्ट्वा ज्योतिर्विदो वैद्यान्दद्याद्गां कांचनं महीं॥ नैवेशिकानि च ततः श्रोत्रियाणां
गृहाणि च॥ २४॥ निषुन्नेषु महीपतिं प्रेरयेत्॥ चिकीर्षितपरिज्ञानाय ततः प्रातः संध्यामुपास्याग्नीन्हुत्वा हि
त्वा पुरोहिताचार्यत्विगादिभिरभिनंदितो ज्योतिर्विदो दृष्ट्वा तेभ्यश्च महादक्षिणां संच दत्त्वा गांतिका
दीनि पुरोहितायादिग्रहवेद्यांश्च दृष्ट्वा तेभ्यश्च स्वशरीरस्थितिं विनिवेद्य प्रतिविधानं चादिश्य तेभ्यो गां कांचनं महीं
नैवेशिकानि विवाहोपयोगीनि कन्यालंकारादीनि गृहाणि च सुधाधवलितानि श्रोत्रियेभ्यो ब्राह्मणेभ्यो दद्यात्
इति मन्त्रैकं संबध्यते॥ २४॥

त्रिव॰
९१

किंच॥ ब्राह्मणेति॥ ब्राह्मणेष्वधिक्षिपत्सु क्षमी क्षमावान्॥ स्निग्धेषु स्नेहवत्सु मित्रादिष्वजिह्मः अवक्रः शिष्ट
न क्रोधनत्वं भृत्यवर्गेषु प्रजासु च हितारणाहितनिवर्तनेन पितेव दयावान्स्यादित्येकं संबध्यते॥ २५॥ पुण्यादिति॥
यस्माद्राजा नयेन धर्मशास्त्रोक्तमार्गेण प्रजाः परिपालित प्रजापविष्टः तत्पुण्यात्षड्भागं षष्ठं भागमादत्ते॥
यस्माच्च सर्वेभ्यो भूम्यादिदानेभ्यः प्रजानां पालनमधिकफलं तस्मात्प्रजासु यथा पितेति यत्नवान्स्यादिति॥ चाटेति

ब्राह्मणेषु क्षमी स्निग्धेष्वजिह्मः क्रोधनोऽरिषु॥ स्याद्राजा भृत्यवर्गेषु प्रजासु च यथा पि
ता॥ २५॥ पुण्यात्षड्भागमादत्ते न्यायेन परिपालयन्॥ सर्वदानाधिकं यस्मात्प्रजानां परिपालनं॥ २६॥ चा
टतस्करदुर्वृत्तमहासाहसिकादिभिः॥ पीड्यमानाः प्रजा रक्षेत्कायस्थैश्च विशेषतः॥ २७॥

न संबंधः॥ २६॥ चाटेति॥ चाटाः प्रतारका विश्वास्य ये परधनमपहरंति॥ प्रच्छन्नापहारिणस्तस्कराः॥ दुर्वृत्ता
ऐंद्रजालिककितवादयः॥ महाबलं सहसा बलेन साहसं तत्साहसं च महासाहसं तेन वर्तंत इति महासा
हसिकाः प्रसह्यापहारिणः॥ आदिशब्दान्मौलिककुहकवृत्तयः॥ एतैः पीड्यमानाः प्रजा रक्षेत्॥ तेषां रा
यात्तच्चतिमायावित्वाच्च दुर्निवार्यत्वाच्च॥ २७॥ ॥

मि० प्रा०
८२

अरक्ष्यमाणेति॥अरक्ष्यमाणाप्रजायत्किंचित्किल्बिषंचौर्यपरगमनादिकुर्वंति॥तस्मात्साधार्द्धंनृपतेर्भवति
॥यस्मादसौराजारक्षणार्थंप्रजाभ्यःकरान्गृह्णाति॥२८॥येइति॥राष्ट्रेराज्ञास्वाधिकारेषुयेनियुक्तास्तेषां
विचेष्टितंचरितंचारैःकलक्षणैःसम्यग्ज्ञानंनयेत्॥साधून्दानमानसत्कारैःपूजयेत्विपरीतान्

अरक्ष्यमाणाःकुर्वंतियत्किंचित्किल्बिषंप्रजाः॥तस्मात्तुनृपतेरर्द्धंयस्माद्गृह्णात्यसौकरान्॥२८॥
येराष्ट्राधिकृतास्तेषांचारैर्ज्ञात्वाविचेष्टितं॥साधून्संमानयेद्राजाविपरीतांश्चघातयेत्॥२९॥उत्को
चजीवितोद्रव्यहीनंकृत्वाप्रवासयेत्॥सदानमानसत्कारैःश्रोत्रियान्वासयेत्सदा॥३०॥अन्याये
ननृपोराष्ट्रात्स्वकोशंयोभिवर्द्धयेत्॥सोचिराद्विगतश्रीकोनाशमेतिसबांधवाः॥३१॥ नचरित्रान्

सम्यक्विदित्वातयेदपराधानुसारेणयत्पुनरुत्कोचजीवितस्तान्द्रव्यरहितान्कृत्वास्वराष्ट्रात्प्रवासयेत्॥ राम०
श्रोत्रियान्दानसत्कारैःसहितान्कृत्वास्वराष्ट्रेसदैववासयेत्॥२९॥३०॥अन्येति॥योसौराजास्वराष्ट्रादन्याये ८२
नमादायस्वकोशंवर्द्धयति॥साविरुध्यमेवविगतश्रीकोविनष्टलक्ष्मीकोबंधुभिःसहविनाशंप्राप्नोति॥३१॥

प्रजाइति॥प्रजानांतस्करादिकृतपीडानःसंतापस्तदुद्भूतोहुताशनस्तद्वत्संतापकारित्वाद्गुणपराजिहुता
शनंशब्देनोच्यते॥सुराज्ञःकुलंश्रियंप्राणांश्चादग्ध्वानाशमनीत्वानिवर्त्तनेनोपशाम्यति॥३२॥यइति
मायतःस्वराष्ट्रपरिपालनेराज्ञोयोधर्मस्तंसंकलंवक्ष्यमाणन्यायेनपरराष्ट्रंवशंनयतश्चात्मसात्कु
र्वतःप्राप्नोतिधर्म्मांशभागंच॥३३॥किंतुयस्मिन्निति॥यथापरदेशोवशमुपगतस्तदानस्तदेशाचारादिसं

प्रजापीडनसंतापात्समुद्भूतोहुताशनः॥राज्ञःकुलंश्रियंप्राणान्नादग्ध्वाविनि
वर्त्तते॥३२॥यएवधर्मोनृपतेःस्वराष्ट्रपरिपालने॥तमेवकृत्स्नमाप्नोतिपरराष्ट्रंवशंनय
न्॥३३॥यस्मिन्देशेयआचारोव्यवहारःकुलस्थितिः॥तथैवपरिपाल्योसौयदावशमुपाग
तः॥३४॥

करेयः॥यस्मिन्देशेयश्चाचारःकुलस्थितिर्व्यवहारोयथैवप्रागासीत्॥तथैवासौपरिपाल
नीयोयदिदेशस्वाविरुद्धोनभवति॥यदावशमुपागतेस्मिन्नेनवशोपगमात्प्राक्ययानियमेनदर्शितं
॥यथोक्तंउपरुध्यारिमासीतराष्ट्रंचास्योपपीडयेत्॥दूषयेच्चास्यसततंयवसान्नोदकेधनमिति॥३४॥

मंत्रमूलमिति॥ यस्मान्मंत्रिभिःसार्द्धंचिंतयेद्राज्यमिसाधुकंमंत्रमूलंराज्यंतस्मान्मंत्रंयत्नेनतथासुरक्षि
तंकुर्यात्॥ यथास्यपरातःकर्मणांसंधिविग्रहादीनामाफलोदयात्फलनिष्पत्तेःप्राक्तन्नमेमंत्रंनजानंति॥
३५॥ किंचअरिरिति॥ अरिःशत्रुःमित्रंसुहृत्तयोर्नयविलक्षणउदासीनस्तेचत्रयस्त्रिविधाःसहजाःप्राकृ
ताःकृत्रिमाश्चेति॥ तत्रसहजास्तेजोरिसापत्नाःपितृव्यसुतादिःकृत्रिमोरिर्यस्यस्वापकृतंयेनस्यापकृतं
॥ प्राकृतस्त्वनंतरदेशाधिपतिः॥ सहजंमित्रंभागिनेयपितृष्वसेयादिकृत्रिममित्रंयेनोपकृतंयस्योपकृतं

मंत्रमूलंयतोराज्यमतोमंत्रंसुरक्षितं॥ कुर्याद्यथास्यनविदुःकर्मणामा
फलोदयात्॥३५॥ अरिर्मित्रमुदासीनोनंतरंतत्परःपरः॥ ॥

वा॥ प्राकृतमित्रमेकांतरितदेशाधिपतिःसहजकृत्रिमशत्रुमित्रलक्षणरहितोसहजकृत्रिमोवासी
नोप्राकृतोदासीनोव्यंतरदेशाधिपतिःअरिः॥ पुनश्चतुर्विधः॥ यातव्यउच्छेत्तव्यःपीडनीयःकर्शनीयश्चेते
तेदेनतत्रयातव्योभिपतिर्व्यसनीहीनबलोविरक्तप्रकृतिः॥ विंदुर्गामित्रहीनोदुर्बलश्चोच्छेत्तव्य
॥ पीडनीयोमंत्रबलविहीनःप्रबलमंत्रयुक्तःकर्शनीयः॥ निर्मू

लनार्हामूच्छेदंपीडनंबलनिग्रहः॥ कर्शनंतुपुनःशीघ्रकोशदंडोपकर्शनात्॥ इतिमित्रंचद्विविधंहृद्गी
पंकर्शनीयःकोशबलादिकंकर्शनीयं॥ अनंतरस्तत्परःपरइतिप्राकृतारिमित्रोदासीनानाह॥ अनंतरं
प्राकृतेरिस्तत्परःप्राकृतंमित्रंतस्मात्परःप्राकृतउदासीनःशेषापुनःप्रसिद्धतान्नोक्ता॥ एतद्राजमंडलंक्रमश
ःपूर्वादिक्रमेणनिर्मंते॥ तेषांचेष्टितंज्ञात्वायज्ञात्वाचसामादिभिःउपायैर्वशमर्थेरितिसंबंधयेत्एवंपुरतःद
क्षपार्श्वतश्चत्रयःत्रयःआत्माचैकइतित्रयोदशराजकमिदंराजमंडलंपश्चात्पार्ष्णिग्राहआक्रंदासारा

क्रमशोमंडलंचिंत्यंसामादिभिरुपक्रमैः॥३६॥ उपायाःसामदानंचभेदोदंडस्तथैवच॥ सम्यक्प्रयुक्ताःसि
ध्येयुर्दंडस्त्वागतिकागतिः॥३७॥ दयस्त्वरिर्मित्रोदासीनस्तेवांतर्भवंतीति॥ संज्ञानेदमात्तंग्रंथांतरेदर्शि
तं॥ योगीश्वरेणाप्युक्तं॥ उपायाइति॥ सामादिभिरुपक्रमैरित्युक्तमिदानींतानुपानाह॥ साम
प्रियवाक्यणदानंसुवर्णादिभेदोभेदनंतत्सामंतादीनांपरस्परतोवैरस्पतोवैरस्योत्पादनं॥ दंडउपांशु
कारागारसाधनापहारादिर्वधपर्यंतोपकारः॥ एतेसामादयःपरिपंथ्यादिसाधनोपायाः॥ एतेचदेशकालाद्य
नुसारेणसम्यक्प्रयुक्ताःसिद्ध्युः॥ तेषांमध्येदंडस्त्वगतिःकागतिःउपायांतरंन्नवेन्नप्रयोक्तव्यः॥ एतच्चपीड
नीयानिग्राह्येणनत्वोच्छेत्तव्यायास्तुदंडएवमुख्यः॥३७॥ ॥

मि०श्रा०
५४

एतेच सामादयो राजव्यवहारविषयानकेवलं अपितुसकलंकंलोकव्यवहारविषयाअधीयपुत्रक्रा
धीपुद्दामितवमोदकान्नयदाम्यस्मैन्नदास्यामिकर्णमुत्पाटयामितिइति॥संधीति॥संधिव्यवस्थाकरणंवि
ग्रहोपकारः यानेपरंप्रतियात्राआसनमुपेक्षा॥संश्रयोबाधसंश्रयं द्वैधीभावस्तबलस्यद्विधाकरणं॥
एतान्संधीप्रभृतीन्गुणान्यथावदेशकालशक्तिमित्रादिवशेनकल्पयेत्॥३६॥यानकालानाह॥य

संधिचविग्रहंयानमासनंद्वायनंतथा॥द्वैधीभावंगुणानेतान्यथावत्परिकल्पयेत्
॥३६॥यदासम्पगुणोपेतंपरराष्ट्रंव्रजेत्तदा॥परश्चहीनमात्माचहृष्टवाहनपुरुष॥३७॥

देति॥यदापरराष्ट्रंमस्मैत्रीघात्रिगुणोश्वसमंजलैधनन्तृणादिभिःरूपेतुंसंपन्नंशत्रुश्चहीनोवलादिभि
रात्माचहृष्टवाहनपुरुषःवाहनानिहस्त्यश्वादीनिचपुरुषान्तवाहनपुरुषाहृष्टावाहनपुरुषायस्यत
तथोक्तः तदापरराष्ट्रमात्मसात्कर्तुंव्रजेत्॥३७॥प्राणिनामभ्युदयविनिपातानांदैवायत्तत्वाद्दैव
मस्तितदायमेवपरराष्ट्रविस्मीनविप्रतिपन्नःस्तिकृतेपिपौरुषेणनविप्रतिपन्नोन्यर्थएवाप्ययात्राप्र
पासस्याह॥

शिव०
५४

दैवेति॥केचिद्दैवमत्रायाचकालापुरुषकारतःकर्मफलप्राप्तिरिष्टानिष्फलकरणात्मानकेवलैर्दैवेव्यव
स्थितापितुःपुरुषकारेतुलोकेनयादर्शनात्॥चिकित्सादिनाव्याधेर्यथा॥अपिचपुरुषाकारानंतरम
वैदैवमेवाहनास्तीत्याह॥नत्वदैवमिति॥यतःपूर्वदेहार्जितपौरुषमेवदैवमुच्यतेअल्पपुरुषाकारानंत
रमहाफलोदयानियतं॥तस्मात्पुरुषकारतःकेचिद्दिष्टानिष्फलत्वात्फलंदैवादैवेच्छंति॥केचित्तत्र

दैवेपुरुषकारेचकर्मसिद्धिर्व्यवस्थिता॥तत्रदैवमभिव्यक्तंपौरुषंपूर्वदैहिकं॥४०॥संयोगेकेचिदिच्छं
तिफलंकुशलबुद्धयः॥रथ्यास्वेकेनचक्रेणरथस्यनगतिर्भवेत्॥एवंपुरुषकारेणविनादैवंनसिध्यति॥
४१॥

वातत्स्वयमेवनवतिनकारणमपेक्षतइतिकेचित्कालात्केचित्पुरुषकारतएवेति॥४०॥स्वमतमाह॥सं
योगेइति॥दैवादीनांसमुच्चयेफलंभवतीतिकुशलबुद्धयोमन्त्रादयोमन्यंते॥एकैकस्मात्फलंनभवती
त्यत्रदृष्टांतमाह॥रथ्येति॥नात्रतिरोहितमस्तिलोनायमपरराष्ट्रंगतव्यस्तुक्तं॥लाभश्चत्रिविधः॥हिर
ण्यलाभोभूमिलाभोमित्रलाभश्चेति॥तेषुमित्रलाभोज्यायान्तस्मात्प्रयत्नोविधातव्यः॥४१॥तत्रापु
पायश्चमन्यवचनमित्याह॥ ॥

मि॰श्रा॰
७५

हिरण्येति॥ यस्माद्धिरण्यभूम्यादिलाभो मित्रलब्धिश्च राज्ञः श्रेष्ठा॥ तस्मात्तत्प्राप्तौ यत्नेन यत्नं कुर्यात्॥ समाहि-
तः सततं रक्षेत् समाहितः सावधानः सततमुत्तमलब्धमित्रलाभस्तस्मात् तयो मूलकारणानि॥५२॥ इदानीं राज्याङ्गा-
न्याह॥ स्वामीति॥ महोत्साहत्वादियुक्तलक्षणो महीपतिः स्वामी॥ अमात्याः मन्त्रिपुरोहितादिनियतः जनो ग्रा-
मादि भवनानि॥ दुर्गं धन्वदुर्गादि कोशः सुवर्णादिद्रव्यराशिः दण्डो हस्त्यश्वरथपत्तिलक्षणं चतुरङ्गबलं मित्रा-
णि सहजकृत्रिमादीनि॥ एतान्यप्यष्टौ राज्यस्य प्रकृतयो मूलकारणानि॥ एवं राज्यं सप्ताङ्गमुच्यतेति

हिरण्यधान्यभूमिभ्यो मित्रलब्धिर्विशिष्यते॥ अतो यत्नेन तत्प्राप्तौ रक्षेत्तां च समाहितः॥५२॥ स्वाम्यमात्यजना
दुर्गकोशाः दण्डस्तथैव च॥ मित्राण्येताः प्रकृतयो राज्यं सप्ताङ्गमुच्यते॥५३॥ तदेवाप्य नृपो दण्डं दुष्टेषु निपातये-
त्॥ धर्माद्धि दण्डरूपेण ब्रह्मणा निर्मिताः पुरा॥५४॥ ॥तदेवाप्येति॥ तदेवंविधं राज्यं प्राप्य दुष्टेषु पंचकृता

त्मधूर्त्तपरदारद्रव्यापहारिहिंसाकादिषु नृपो दण्डं पातयेत् प्रयोजयेत्॥ हि यस्माद्धर्म्मा एव दण्डरूपेण प्र- टि॰व॰
र्वं ब्रह्मणा निर्मितोऽस्य वदण्ड इति यौगिकी संज्ञा॥ दण्डो दमन इत्याहुः स्तेनादन्तान् दमयेत् इति गौरवचनात् ७५
॥ स नेतुं न्यायतः शक्यो लुब्धेनाकृतबुद्धिना॥ पूर्वोक्तो दण्डो लुब्धेन परेणाकृतबुद्धिना न्यायानुसारेण नेतुं प्र-
योक्तुं शक्यो न भवति॥५५॥

कीदृशेनात नत्याह स नहीत्यादि॥ स नेति॥ सत्यसंधेनाप्रमादकरेण स्वविनाजितारिषड्वर्गेण सुसहायेन श्रो-
त्रसहायसहितेन सीमन्तनयनोपनयकुशलेन स दण्डो न्यायतो धर्म्मानुसारेण नेतुं शक्यः॥५५॥ यथा-
शास्त्रमिति॥ स दण्डः शास्त्रोक्तेन मार्गेण प्रयुज्यमानः सदेवासुरमानवैः सहितं जगदानंदयत् हर्षयेत् अन्यथा
यथाशास्त्रातिक्रमेण प्रयुक्तश्चेज्जगत् प्रकोपयेत्॥५६॥ धनकेवलमधर्मदण्डेन जगत् प्रकोपितुं प्रयोक्तुं

सत्यसंधेन शुचिना सुसहायेन धीमता॥५५॥ यथाशास्त्रं प्रयुक्तस्तु सदेवासुरमानुषं॥ जगदानंदये-
त् सर्वमन्यथा तु प्रकोपयेत्॥५६॥ अधर्मदण्डनं लोके स्वर्गकीर्तिविनाशनं॥ धर्मेण दण्डनं राज्ञः स्वर्गकी-
र्त्तिविवर्द्धनं॥५७॥ अपि भ्राता सुतोऽर्घ्यो वा श्वशुरो मातुलोऽपि वा॥

श्राद्धइदानीमपीत्याह॥ अधर्मे-
ति॥ यः पुनः शास्त्रातिक्रमेण लोभादिना दण्डः कृतः॥ स पापहेतुर्न भवति॥५७॥ अर्घ्याः पूज्याः हि आचा-
र्यादयः प्रसिद्धाः॥ एते भ्रातृसुतप्रभृतयोऽपि धर्माच्चलिता दण्ड्याः॥ किमुतान्ये यतः स्वधर्माच्चलितो दण्ड्यो न
म राज्ञः कोऽपि नास्ति॥ एतच्च मातृपित्रादिव्यतिरेकेण॥ तथा च मन्वन्तरे॥ अदण्ड्यो मातापितरौ स्नात-
क

मि॰ आ॰ ९६

पुरोहितपरित्याजकवानप्रस्थाः। श्रुतशीलवृत्ताचारवंतः स्वविधर्माधिकारिण इति॥५८॥ यो दंडति॥ यस्तु रा-
जा दंड्यान् स्वधर्मचलनादिना दंडयोग्यान् सम्यक्शास्त्रधर्ममार्गेण विमृश्य न दंड्यानिति दंडयति। वध्यान् वधार्हा-
न् घातयति। तेन राज्ञा भूरिदक्षिणैः क्रतुभिरिष्टं स्यात्। बहुदक्षिणाक्रतुफलं प्राप्नोतीत्यर्थः॥ न च फलश्रव-
णाद्दंडप्रणयनं काम्यमिति मंतव्यं॥ अकरणे प्रायश्चित्तस्मरणात्। यथाह वसिष्ठः। दंड्योत्सर्गे राजैक-

नादंड्यो नाम राज्ञोऽस्ति धर्माद्विचलितः स्वकात्॥५८॥ यो दंड्यान् दंडयेद्राजा सम्यग्वध्यांश्च घातयेत्। इ-
ष्टं स्यात् क्रतुभिस्तेन समाप्तवरदक्षिणैः॥५९॥ इति संचिंत्य नृपतिः क्रतुतुल्यफलं पृथक्। व्यवहारान् स्वयं
पश्येत् सभ्यैः परिवृतोऽन्वहं॥६०॥ रात्रमुपवसेत्॥ त्रिरात्रं पुरोहितः कृच्छ्रमदंड्यदंडने पुरोहितस्त्रिरात्रं
राजेति। दुष्टे सम्यग्दंडः प्रायोक्तम्। इत्युक्तं दुष्टपरिज्ञानं च व्यवहारमंतरेण न भवतीति तत्परिज्ञानाय व्य-
वहारदर्शनमहः स्वयं कर्तव्यमित्याह॥५९॥ इतीति॥ इत्युक्तेन प्रकारेण क्रतुतुल्यफलं दंड्यदंडने स्वर्गा-
दिनाशं वा दंडेन सम्यक्संचिंत्य पृथक् पृथक् वर्णादिक्रमेण सभ्यैः व्यवहारलक्षणैः परिवृतः॥ प्रति-
दिनं व्यवहारान् वक्ष्यमाणमार्गेण दुष्टादुष्टपरिज्ञानार्थं राजनार्थं राजा स्वयं पश्येत्॥६०॥ ॥ त्रिव॰ ९६

कुल्यानीति। कुलानि ब्राह्मणादीनां जातयो मूर्धावसिक्तादयः। श्रेणयस्तांबूलिकादीनां गणाः हेडाबुकादी-
नां जानपदाः कारुकादयः॥ एतान् स्वधर्माच्चलितान् प्रच्युतान् राजा विनीय यथापराधं दंडयित्वा पथि
स्थापयेत्॥ दंडदुष्टत्वेषु निपातयेदित्युक्तं। सच दंडो द्विविधः शारीरोऽर्थदंडश्चेति। यथाह नारदः॥ शारीरश्चार्थ-
दंडश्च दंडस्तु द्विविधः स्मृतः॥ शारीरस्ताडनादिस्तु मरणांतः प्रकीर्तितः॥ काकिण्यादिस्त्वर्थदंडः सर्वस्वांतःस्त॥

कुलानि जातीः श्रेणीश्च गणान् जानपदानपि। स्वधर्माच्चलितान् राजा विनीय स्थापयेत्पथि॥६१॥ जाल-
सूर्यमरीचिस्थं त्रसरेणू रजः स्मृतं॥ तेऽष्टौ लिक्षा तु तास्तिस्रो राजसर्षप उच्यते॥६२॥ येव चेति॥ द्विविधपरा-
नुसारेणानेकतानवति॥ आह स्म शारीरो दशधा प्रोक्तो ह्यर्थदंडोऽस्त्यनेकधेति॥ तत्र कृष्णलमाषसुवर्णपला-
दिशब्दैरर्थदंडो वक्ष्यते च प्रतिदेशं भिन्नपरिमर्यादोऽस्येकस्मिन्नपराधेऽपि देशभेदेन न्यूनाधिकदंडो मा भूदिति
कृष्णलादिशब्दानां नियतपरिमाणविषयत्वं दंडव्यवहारे दर्शयितुमाह॥६२॥ जालेति॥ जालकांतरप्रविष्टा-
दित्यरश्मिस्थितं पद्मजस्त्रसरेणुरित्युक्तं योगीश्वरादिभिः स्मृतं त्रसरेणवो लिक्षोऽस्येदं जंतूकांडं तालि॥

क्षास्तिस्रो राजसर्षपो राजिका ते राजसर्षपास्त्रयो गौरसर्षपः सिद्धार्थस्ते गौरसर्षपाः षड्यवो मध्यमस्त्वो
नलघुसूक्ष्मः॥ एतेन गौरसर्षपास्त्वपि मध्यमा इति गम्यते॥ तथा राजसर्षपा इति मध्यमग्रहणादेव सर्षपा
दिशब्दा न केवलमुन्मानवचनाः॥ किं तु तदुन्मितद्रव्यवचना इति गम्यते॥ तथा त्रसरेणुपरिमिता यवाः त्र
स्विाच्यंते॥ एवं सर्षपाद्युन्मितं द्रव्यं सर्षपादिशब्दैः सर्षपादिशब्दानां केवलोन्मानवचनत्वे त्रसरेणु
नामुपसंख्यानमानुरूप्यं स्यात्तद्द्वारेण कृष्णलादिव्यवहारो न स्यात् अत्र स्थूलतरस्थूलतमः सूक्ष्मतन

गौरस्तु ते त्रयः षड्भिर्यवो मध्यस्तु ते त्रयः॥ कृष्णलः पंच ते माषस्ते सुवर्णास्तु षोडश॥५३॥ ॥

रसूक्ष्मतमः मध्यसर्षपास्तु उन्मानेनेदे नन्नतिदेशं व्यवहारस्थितिव्यवहारे दंडव्यवहारे मध्यम इति निय
म्यते॥ ते मध्यमा यवास्त्रयः कृष्णलः ते कृष्णलाः पंचैको माषः षोडशैकः सुवर्णाश्चत्वारः पलं पंच वापि
पलं कीर्तितं नारदादिभिः॥ तत्र स्थूलयवैः कृष्णलपरिकल्पनायां व्यावहारिककनिष्ठः षोडशांशः कृष्ण
लो भवति ते पंचभिर्निर्मितो माषैः षोडशभिः सुवर्णः स च व्यावहारिकैः पंचभिर्निष्कैरेकः सुवर्णो भवति॥ ते च
त्वारः॥

फलमिति निष्काणां विंशतिः फलं यदा तु सूक्ष्मैर्यवैस्त्रिभिः कृष्णलः परिकल्प्यते॥ तदा व्यावहारिकनिष्क
स्य विंशतितमो भागः कृष्णलो भवति॥ तस्मिन्पक्षे सुवर्णमाषाद्वितीयद्वयं भवति॥ पलं च दशनिष्कं परमनुम
ध्यमपरैव कृष्णलमानं तदा निष्कस्य विंशतितमो भागः कृष्णलः सुवर्णश्च तुष्कः षोडशनिष्कं पलं पंचसुव
र्णपलमिति पक्षे विंशतिनिष्कं पलं॥ एवमन्यदपि निष्कस्य चत्वारिंशो भागः कृष्णलो द्विनिष्को सुवर्णो॥ष्टा

पलं सुवर्णाश्चत्वारः पंच वापि प्रकीर्तितं॥५४॥ द्वे कृष्णले रूप्यमाषो ध
रणं षोडशैव ते॥ शतमानं च दशभिर्धरणैः पलमेव च॥५५॥ ॥

निष्कं पलमित्यादि लोकव्यवहारानुसारेणास्मादेव सूत्रं ग्रहणीयं॥५३॥५४॥ एवं सुवर्णस्योन्मा
नं प्रतिपाद्येदानीं रजतस्याह॥ द्वे इति निष्कः सुवर्णाश्चत्वारः द्वे कृष्णले पूर्वोक्ते रूप्यसंबंधी माषाः षोडश
धरणं पुराणः इत्यस्यैव संज्ञांतरं ते षोडश धरणं पुराणश्चैव राजतेन इति मनुस्मरणात् ते दश धरणैः श
तमानं फलमित्यभिधीयते॥ पूर्वोक्ताश्चत्वारः सुवर्णापकोरजतो निष्को भवति॥५५॥ ॥

इदानीं ताम्रिकस्योन्मानमाह ॥ कार्षिक इति ॥ कर्ष इति लोकप्रसिद्धः कर्षेणोन्मितः कार्षिकः ॥ ताम्रस्य वि
कारः ताम्रिकः कर्षसंमितस्ताम्रविकारः पणसंज्ञो भवति ॥ कार्षापणसंज्ञश्च कार्षापणस्तु विज्ञेयः ॥ ता
म्रिकः कार्षापणिकः इति मनुवचनात् ॥ पंचसुवर्णपक्षे विंशतिमाषः पणो भवति ॥ तथा सति माषे
विंशतितमो भागः पणस्य पुरिकी त्रितः इत्यादिव्यवहारो भवति ॥ चतुःसुवर्णपलपक्षे तु षोडशमाषः ॥

कार्षिकः ताम्रिकः पणः पलस्य चतुर्थांशः ॥५५॥
साशीतिपणसाहस्रो दंड उत्तमसाहसः ॥ ॥

भवति ॥ अस्मिंश्च पक्षे सुवर्णकार्षापणं पणशब्दवाच्यं नमस्मानाद्यश्चित्तादिकार्षापणशब्दो नाम विष
यावेव ॥ एवं तावद्धेमरूप्यताम्राणां उन्मानमुक्तं दंडव्यवहारे उपयोगि ॥ बालकाशीरिनिकादीनामपि
लोकव्यवहारो गन्तव्यानामुन्माने द्रष्टव्यं ॥५५॥ स्वशास्त्रपरिभाषामाह ॥ साशीतीति ॥ पणानां साहस्रं
परिमाणमस्येति पणसहस्रः ॥ अशीत्या सह वर्तत इति साशीतिः अधिकपणसहस्रपरिमितो यो दंडः स उत्त
मः साहसं ज्ञातव्याः ॥ ॥

तदर्द्धमिति ॥ तदर्द्धं मध्यमस्तस्य साशीतिपणसहस्रस्यार्द्धं चत्वारिंशदधिकपणपंचशतपरिमिता मध्यम
साहसस्य संज्ञितः ॥ तदर्द्धमस्यास्य चत्वारिंशदधिकपणपंचसप्ततमार्द्धं सप्तत्यधिकं पणशतद्वयपरिमि
तो दंडो प्रथमसाहससंज्ञया स्मृतः ॥ उक्तो मन्वादिभिः ॥ यत्तु पणानां द्विशते सार्द्धे प्रथमः साहसः स्मृतः ॥
मध्यमः पंच विज्ञेयः सहस्रं त्वेव चोत्तमः ॥ इति मनुनोक्तं च ॥ पक्षांतरं पूर्वापराधविषयं द्रष्टव्यं ॥५६॥ दं

तदर्द्धं मध्यमः प्रोक्तः तदर्द्धमधमः स्मृतः ॥५६॥ धिग्दंडस्त्वथ वाग्दंडो ॥ ध
नदंडो वधस्तथा ॥ योज्या व्यस्ताः समस्ता वा ह्यपराधवशादिमे ॥५७॥

डभेदानाह ॥ धिग्दंड इति ॥ धिग्दंडो धिगिति कुत्सनं ॥ वाग्दंडस्तु परुषशापवचनात्मकः ॥ धनदंडो धनापहारात्मकः ॥ वधदं
डः शारीरो वरोधादिजीवितांतः ॥ एते चतुर्विधा दंडा व्यस्ताः ॥ एकैकशः समस्ता वा द्वित्रिचतुरो अपरा
धानुसारेण प्रयोक्तव्याः ॥ उक्तक्रमेण पूर्वासाध्ये उत्तरः प्रयोक्तव्यः ॥ यथाह मनुः ॥ धिग्दंडं प्रथमं कुर्याद्वा
ग्दंडं तदनंतरं ॥ तृतीयं धनदंडं च वधदंडमतः परं इति ॥५७॥ ॥

दंडव्यवस्थानिमित्तान्याह॥ज्ञात्वेति॥यथापराधंज्ञात्वातदनुसारेणदंडप्रणयनंकार्यमेवदेशकालब
लवयःकर्मज्ञात्वावित्तानिचतदनुसारेणदंड्येषुदंडार्हेषुदंडप्रणयनंकुर्यात्॥तथाचबुद्धिपूर्वाबुद्धि
पूर्वसकृदावृत्त्यनुसारेण च॥यद्यपिराज्ञामधिकृत्यायंराजधर्मकलापउक्तः॥तथापिवर्णांतरस्या
पिविषयमंडलादिपरिपालनाधिकृतस्यायंराजधर्मोविदितव्यः॥राजधर्मान्प्रवक्ष्यामियथाहृतेन

ज्ञात्वापराधंदेशंचकालंदंडमथापिवा॥वयःकर्मचदंडंदंड्ये
षुपातयेत्॥५८॥ ॥इतिराजधर्म्मप्रकरणं॥

वेन्नृप॥इतिनृपग्रहणात्करग्रहणात्करग्रहणम्परत्वाद्वाब्राह्मणस्यदंडप्रणयनायत्नैरितित्रि
त्रमोपपदस्येयंशिष्यस्मृतिरात्मनः॥धर्म्मज्ञाम्बस्यविष्टत्रिविज्ञानेश्वरयोगिनः॥५८॥ ॥इति
श्रीपद्मनाभभट्टोपाध्यायात्मजस्यश्रीमत्परमहंसपरिव्राजकाचार्यविज्ञानेश्वरभट्टारककृतौऋजु
मिताक्षरायांश्रीयाज्ञवल्क्यमुनिप्रणीतधर्मशास्त्रविवृतावाचाराध्यायःप्रथमःसमाप्तः॥ ॥ ॥

अस्मिन्नध्यायेप्रस्तुतप्रकरणानि॥इत्युपोद्घातप्रकरणं॥१॥ब्रह्मचारिप्रकरणं॥२॥विवा
हप्रकरणं॥३॥जातिवर्णविवेकप्रकरणं॥४॥गृहस्थाचारप्रकरणं॥५॥स्नातकप्रकरणं॥६॥
नेदानस्यप्रकरणं॥७॥द्रव्यशुद्धिप्रकरणं॥८॥दानधर्म्मप्रकरणं॥९॥शांतिप्रकरणं॥१०॥श्राद्ध
प्रकरणं॥११॥राजधर्म्मप्रकरणं॥१२॥एवंद्वादशप्रकरणानि॥ ॥इतियाज्ञवल्क्यमुनिशास्त्रगता
विवृतिर्नकस्यविहितावितुषः॥अपिनाक्षरापिविपुलार्थवतीपरिषिंचतिश्रवणयोरमृतं॥१॥ ॥
श्रीरस्तु॥ ॥शुभंभवतु॥ ॥कल्याणमस्तु॥ ॥ ॥श्रीपार्वतीपतयेनमः॥ ॥ ॐनमः॥ ॥

वास्तुकं वाकवता कालशाक चिक्कीभाजी आरण्यक फांजी चुका कालीय
कं कालीं देवकीफळ डांगर प्रियंगु राळे

शि०श्रा०
१००

शिव०
१००

प० प्रा० १ ॥श्रीगणेशायनमः॥ ॥अथैवमारभ्यते प्रायश्चित्ताध्यायभाष्यं ब्रह्मचारिगृहस्थाश्रमिणां नित्यनैमित्तिका
धर्मा उक्ताः॥ अत्र निषेकादिगुणयुक्तस्य गृहस्थविशेषस्य गुणधर्माश्च प्रदर्शिताः॥ अधुना तदपि कपसंको
चहेतुभूताः शौचप्रतिपादनमुखेन तेषामपवादः प्रतिपाद्यते॥ आशौचशब्देन च कालस्नानाद्यप
नोद्यः पिंडोदकदानादिविधेरध्ययनादिपर्युदासस्य च निमित्तभूतः पुरुषगतः कश्चनातिशयः कथ्यते
न पुनः कर्मानधिकारमात्रं॥ अस्पृश्यत्वं बांधवाः सर्व इत्यादावस्पृश्यत्वानिधानात्॥ अस्पृश्यत्वस्य च दृष्टमा
द्वारेः नाहिताग्निदीक्षितादीनामनधिकारमात्रे प्रयोगानावात्॥ दीक्षितो न ददाति न जुहोतीत्यादिव्यवस्था
वहारस्यानुत्पत्तिनिबंधनत्वाच्च शावाद्यापि वर्तते॥ किंच यच्चाशौचे विनादिनिषेधदर्शनात् तद्योग्यत्वमाशौचशब्दा
भिधेयं कल्प्यते॥ तर्हि उदकदानादिविधिदर्शनात् तद्योग्यत्वमाशौचं तथाशौचशब्दाभिधेयं स्यात्॥ न चानेका मिता० १
र्थत्वकल्पनादोषप्रसंगः दोषस्तु पेक्षणीयोऽयं पक्षः॥ तत्राशौचिभिः सपिंडाद्यैर्यत् कर्तव्यं तत्तावदाह॥
ऊनद्विवर्षमिति॥ ॥श्रीगोपीजनवल्लभायनमः॥ ॥

ऊनेत्वपरिपूर्णे द्विवर्षे यस्यासौ ऊनद्विवर्षः तं प्रेतं निखनेत्॥ भूमाववटं कृत्वा निदध्यान्न पुनर्दहेदित्यर्थः॥
न च सकुल्यमिति च सुदकमित्यादिनिः प्रेतोद्देशेन विहितमुदकदानादि और्ध्वदेहिकं कुर्यात्॥ अयं च गंध
माल्यानुलेपनादीनिरलंकृतस्य शुचौ भूमौ अश्मशानादन्यत्रास्थिनिचयरहितायां बहिर्ग्रामान्निखनीय
॥यथाह मनुः॥ ऊनद्विवार्षिकं प्रेतं निदध्युर्बांधवा बहिः॥ अलंकृत्य शुचौ भूमावस्थिसंचयनादृते॥ ना
स्य कार्योऽग्निसंस्कारो नापि कार्योदकक्रिया॥ अरण्ये काष्ठवत्त्यक्त्वा क्षपेयुस्त्र्यहमेवत्विति॥ अरण्येका

ऊनद्विवर्षं निखनेन्न कुर्यादुदकं ततः॥ ॥

एवमनेकेन पयमर्थः॥ पथ्यारण्ये काष्ठं त्यक्त्वोदासीनास्तद्विषये॥ तथा ऊनद्विवार्षिकमपरिखातायां भूमौ प
रित्यज्य तद्विषये श्वादाधौर्ध्वदेहिकेषु उदासीनैर्भवितव्यमिति॥ आचारादिग्रामश्मशानाद्यनावः॥ नेन दृष्टं ते
न स्पृश्यते॥ त्रावं च हृते मासजन्य यमगाथाः पवद्भिर्निधातव्यं॥ ऊनद्विवार्षिकं प्रेतं यतनीकं निखनत हि॥ यम
गाथा गायमानो यमसूक्तमनुस्मरन्निति यमस्मरणात्॥ ततस्तस्मादूनद्विवार्षिकादितरः पूर्णः द्वि॥

मि०प्र०
२

वर्षीमृतोऽसौ सौ स्मशानपर्यंतं ज्ञातिभिः सपिंडैः समानोदकैश्च जनैश्च पुरःसरैरनुव्रज्योऽनुगन्तव्यः॥ अस्मादे
ववचनादूनद्विवर्षानुगमनमनियतमिति गम्यते॥ अनुगमने च परेद्युर्भस्मितादियमसूक्तं यमदैव
त्यागाथाश्च जपद्भिर्लौकिकेनाग्निना संपाद्यकार्यमात्रार्थत्वेनोक्तत्वेन॥ लौकिकाग्निश्चात्र ंडजादिकृति
क्रोऽग्राह्यः॥ चांडालाग्निरमेध्याग्निः सूतिकाग्निकर्दिविनाशपातिताग्निश्चिताग्निश्च न शिष्टग्रहणोचि
ताश्चेति देवलस्मरणात्॥ बौधायनोऽपि चात्र विशेषमाह॥ तूष्णीमेवोदकं कुर्यात्तूष्णीं संस्कारमेव च॥ सर्वेषां
जातदंतानामन्यत्रत्वरोत्यवदर्शनेः॥१॥ यमसूक्तं तथा गाथा जपद्भिर्लौकिकाग्निना॥ सदग्धव्य उपे
तश्चेदाहिताग्न्यावृतार्थवत्॥२॥ कृतचूडानामन्यत्रापीच्छयारूपमिति॥ अयमर्थः॥ चौरकर्मानंतरं
तेनियमेनोदकदानं कार्यं॥ अन्यत्रापि नामकरणादूर्ध्वमकृतचूडैः पिच्छयानेनोदकम
नयादयं उदकदानात्मकं तूष्णीं कार्यं॥ तन्नियमेति विकल्पः॥ मनुनाप्यत्र विशेषो दर्शितः॥ नात्रि
वर्षस्य कर्तव्या बांधवैरुदकक्रिया॥ जातदंतस्य वा कुर्युर्नाम्नि वापि कृते सति॥ उदक्य॥ त्रि०प०
॥ २

साहचर्यादग्निसंस्कारस्याप्युपलक्षणं॥ यं॥ नात्रिवर्षस्येति वचनात् कुलधर्मापेक्षया चूडोत्कर्षेऽपि च वर्षादू
र्ध्वं अग्निसंस्कारस्याप्युपलक्षणं॥ तयोर्नियमश्च इति वि
र्ध्वं अमुदकदानादिनियमोऽवगम्यते॥ बौधायनवचनादूर्ध्वं त्रयात्प्रागपि कृतचूडस्य तयोर्नियम इति वि
वेचनीयं॥ उपेतश्चेत् यद्युपनीतस्तर्ह्याहिताग्न्याहृता॥ आहिताग्नेर्दाहप्रक्रियया सगर्भ्यादिप्रसिद्ध्यादे
वेचनीयं॥ उपेतश्चेत्यद्युपनीतस्तर्ह्याहिताग्न्याहृता॥ आहिताग्नेर्दाहप्रक्रियया समग्रादिप्रसिद्ध्याद्वो
किकाग्निनैव दग्धव्यः॥ अर्थवत्प्रयोजनवत्॥ अयमर्थः॥ पथ्यस्मऋग्मंत्रदाहेशारं कार्यं तद्यं प्रयोजनं संतत
लि॥ तूष्णीं जोषणाशोद्धाणादेतदुपादेयं॥ यत्पुनर्लुप्तप्रयोजनं पात्रयोजनादि तन्निवर्तते॥ तथा लौकिका
ग्निविधानेनोपनीतस्यानाहिताग्नेश्चस्य॥ श्यामिनादाहविधानेन च उपहृतप्रयोजनत्वाद्दाहवचनीया
देरपि निवृत्तिरिति॥ अभ्यंतरविधानं च हृदया त्वक्त्वे नोक्तं॥ आहिताग्नेर्यथायांयं रथवास्त्रिनिरग्निभि
॥ अनाहिताग्निरेकेन लौकिकेनापरो जनः॥ इति॥ न च भूदेशस्मशानप्रतिष्ठाग्निकाष्ठादिनियमं कार्यं॥ य
थानपतिशूद्रोऽग्निं तृणं काष्ठं हविश्चिति॥ प्रेतत्वेहि सदातत्समसवाधर्मेणा नियम इतियमस्मरणात्॥ तथा
दाहस्य समनंतरं कर्तव्यं॥ प्रेतं दहेच्छुभैर्गंधैः स्नापितं स्रग्विभूषितं इति स्मरणात्॥ प्रेते च तत्पुत्र
केः॥ स्नानं प्रेतस्य पुत्राद्यैर्वस्त्राद्यैः पूजनं तथा॥ नग्नदेहं दहेन्नैव किंचिद्देयं परित्यजेदिति॥ किंचिद्देयमिति
वावस्त्रैकदेशं स्मशानवासिभ्यो देयं परित्यजेदित्यर्थः॥ तथा प्रेतं निर्हरणेऽपि से मनुना विशेषो॥

मि॰ श्रा॰
३

इत्युक्तिः ॥ न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण हारयेत् ॥ अस्वर्ग्या ह्याहुतिः सा स्यात् शूद्रसंपर्कदूषिता ॥ शूद्रस्ते
षु तिष्ठत्सु इत्यत्र विवक्षितेः ॥ अस्वर्ग्यत्वादिदोषश्रवणात् यद् दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् ॥ पश्चिमोत्त
रपूर्वैस्तु यथासंख्यं द्विजातयः इति ॥ तथा हारीतोपि ॥ नयामा निमुखं प्रेतं हरेयुरिति बांधवाः ॥ अयं दानुप्रा
षितमरणे नारीरं न लभ्यते ॥ तदा अस्थिभिः प्रतिकृतिं कृत्वा तेषामप्यलाभे पूर्णत्रारिरैः शौनकादिग्र
न्थोक्तमार्गेण प्रतिकृतिं कृत्वा संस्कारः कार्यः ॥ आगोत्रं चान्नदत्ता हादिकमेव ॥ आहिताग्निश्चेत् प्रवसन्
म्रियते पुनः ॥ संस्कारं कृत्वा ब्रह्मवरशौचमिति वसिष्ठस्मरणात् ॥ अनाहिताग्नेस्तु त्रिरात्रं ॥ सुपिष्टे जलसं
मिश्रे दग्ध्वा यथावस्त्रं तथा ॥ त्रिभिः ॥ सोसौ स्वर्गाय जीकाय नीका यस्मात् हे पक्कान्नबांधवः ॥ एवं पर्णनारं दा
ह्या त्रिरात्रमशुचिर्भवेदिति वचनात् ॥ तथा यमर्यः नामकरणाद् र्वाक् निखननमेव ॥ न चाग्निदकदाहादि
॥ ततऊर्ध्वं यावत्त्रिवर्षं वैकल्पिकमप्युदकदानं ॥ ततः परं यावत् उपनयनं तूष्णीमेवाप्युदकदानं नियतं ॥ वर्ष
त्रयात् प्रागपि कृतचूडस्य वा उपनयनादूर्ध्वं पुनराहिताग्नेरिव दाहं कृत्वा सर्वमौर्ध्वदेहिकं कार्यं ॥ अ
यं तु विशेषः ॥ उपनीतस्य लौकिकाग्निना दाहः कार्यः ॥ अनाहिताग्नेर्गृह्याग्निना दाहो यथा सनं वपानयो
जनं च कार्यं ॥ १ ॥ २ ॥ ॥

त्रि॰
३

संस्कारानंतरं किं कर्त्तव्यमित्यत आह ॥ सप्तमेति ॥ सप्तमदिवसाद र्वाक् स्नात्वा दद्युः ॥ समानगो
त्रैः सपिंडाः समानोदकाश्च अपनः शोशुचदघमित्यनेन मंत्रेण दक्षिण ॥ निमुखा अनुपयंति ॥ अनुगम
मनेन तत्संयोजनं तूष्णीं उदकदान विधिश्च मनुपगमनेन लक्ष्यते ॥ एवं मातामहाचार्यमरणे तरसुदकस्नान
स्यानिर्देशात् दर्शनात् ॥ एवं चाप्युप्यासु निषिद्धकार्यं ॥ प्रथमतृतीयपंचमसप्तमनवमेषूदकक्रियेति
गौतमस्मरणात् ॥ एवं च स्नानानंतरं कार्यं ॥ शरीरमग्निसंयोज्यानवेक्षमाणा अपोभ्युपयंति इति गौत
मस्मरणात् ॥ तथा प्रचेतसाप्यत्र विशेषो दर्शितः ॥ प्रेतस्य बांधवा यथावद्ध मुदकमवतीर्य नोद्धर्षये

सप्तमादशमाद्वापि ज्ञातयोऽभ्युपयंत्यपः ॥ अप नः शोशुचदघमनेन पितृदिङ्मुखाः ॥ ३ ॥

पुरुदकांते प्रसिंचेयुरुपसव्ययज्ञोपवीतवाससो दक्षिणामुखा ब्राह्मणस्योदङ्मुखाः क्षत्रियस्य राजन्यवैश्ययोरिति ःश्वशुरस्य
॥ सम्मसंतरे तु यावत् सा शौचं दिनानि तावदुदकदानसाहतिरुक्ता ॥ यथाह विष्णुः ॥ यावदाशौचं तावत्प्रेतस्यो
दकं पिंडं च दद्युरिति ॥ यातं प्रचेतसाप्युक्तं दिने दिने जलीनप्रपूर्णां न्दद्यात् प्रेतकारणात् ॥ तावद्वा दिश्यकर्त
व्याः यावत्तवे पिंडः समाप्यते ॥ इति प्रतिदिनं तंजलिनां वृद्धिकार्या यावद्दशमः पिंडः समाप्यत इति ॥ पद्धप
नयोर्गुरुलघुपक्षयोरन्यतरानुष्ठाने नात्र आस्थार्थसिद्धिर्यथापिशीवा बहुत्वेन गुरुतरकल्प प्रथम
उपपन्नो प्रेतस्य ॥ ॥

मि०प्रा०
४

प्रकारातिरात्रयोनविप्पतीतिकल्पनीयं॥अन्यथायुरुतरकल्पाम्नायस्यानर्थक्यप्रसंगात्तद्वसिष्ठेनापि
विशेषोनिर्दिष्टः॥सर्व्वेतरासांपाणिग्राहसमुदकक्रियां उदकक्रियांकुर्वीरन्नितिवृद्धमार्येसकृत्प्र
सेकनामगोत्राद्दिगुणविशिष्टस्योदकदानस्यासमानगोत्रपुमातामह्यादिविषयतिदर्शयितुमाह॥३॥एवमि
ति॥यथासगोत्रसपिंडानांप्रेतानामुदकंदीयते॥तथामातामहानामाचार्याणांचप्रत्यनांति

एवंमातामहाचार्यप्रेतानामुदकक्रिया॥
कामोदकंसखीप्रत्तास्वस्त्रीयश्वशुरर्त्विजां॥४॥

त्समुदकक्रियाकार्या॥सखामित्रंप्रत्ताःपरिणीताःदुहितृभगिन्यादयः श्वशुरःप्रसिद्धः॥ऋत्विजोयाज
काःएषांसख्यादीनांप्रेतानांकामोदकंकार्यं॥कामइच्छाकामेनोदकेदानंकामोदकंकामोदकंप्रेतानामु
दयकामनायासंतामुदकंदेयमसंतांनदेयमित्यकरणे प्रत्यवायोनास्तीत्यर्थः॥४॥ ५॥ शि० ४

प्रेताशमु

उदकदानेगुणविधिमाह॥सकृदिति॥एतच्चोदकदानमिच्छंकर्तव्यं॥सपिंडाःसमानोदकाश्चमौलिनो
दत्वाप्रेतस्यनामगोत्रेणचाचार्यश्चमुंकुगोत्रस्तप्यन्वितिसकृदेवोदकंप्रसिंचेयुरप्त्रिवानिःप्रेतस्यप्रा
विनिप्रचेतसःस्मरणात्॥प्रतिदिनमंजलिवृद्धिस्तुप्रतिप्रादितैव॥तत्रायमपिविशेषस्तेनैवोक्तः॥न

सकृत्प्रसिंचत्युदकंनामगोत्रेणवाग्यताः॥

दीकलंननोगत्वाग्नौचंकृत्वायथापूर्ववत्॥वस्त्रंसंशोधयेदादौततःस्नानंसमाचरेत्॥सचैलस्तुतत
स्नात्वाशुचिःप्रयतमानसः॥पाषाणंतत्रआधायविप्रेद्दद्याद्दशांजलीन्॥द्वादशाहात्रियेद्धाविंशपंचर
त्रात्रया॥त्रिंशात्तया॥त्रिंशात्तस्वस्यपदान्व्यास्ततःसंप्रविशेद्गृहं॥ततःस्नानंपुनःपुनःकार्यंगृहशौचस्यका
रयेदिति॥

मि॰ प्रा॰ ५

सपिंडानां मध्ये केषांचिदुदकदानप्रतिषेधमाह ॥ न ब्रह्मचारिण इति ॥ ब्रह्मचारिणः समाव
र्त्तनपर्यंतं पतिताश्च प्रच्युतद्विजातिकर्माधिकारा उदकादिदानं न कुर्युः ॥ ब्रह्मचर्योत्तरकालं पूर्वमृतानां स
पिंडादीनामुदकदानमाशौचं च कुर्यादेव ॥ यथाह मनुः ॥ आदिष्टी नोदकं कुर्यादाव्रतस्य समापनात् ॥ समा
प्ते तूदकं कृत्वा त्रिरात्रमशुचिर्भवेदिति ॥ आदिष्टी ब्रह्मचारी अस्य योजनं कर्म कुरु दिवा मा स्वाप्सीरित्यादि

न ब्रह्मचारिणः कुर्युरुदकं पतितास्तथा ॥ ५ ॥

व्रतादेशयोगात् ब्रह्मचार्युच्यते ॥ एतच्च पित्रादिव्यतिरेकेणेति वक्तव्यम् ॥ आचार्यपित्रुपाध्यायान्निर्हृत्य
आचार्यपुनरेवं मनसैव ब्रह्मिष्ठी तु प्रक्रांतप्रायश्चित्तः प्रकल्प्यते ॥ तस्यैवायमुदकदानादिनिषेधः ॥ प्रायश्चि
त्तरूपव्रतसमाप्त्युत्तरकालमुदकदानाशौचविधिरिति ॥ तथा जीवादीनां चोदकदायित्वं निषिद्धं ॥ जी
वाद्याश्च नोदकं कुर्युः स्तेना व्रात्या विधर्मिणः ॥ गर्भभर्तृद्रुहश्चैव सुराप्यश्चैव योषितः इति छंदसमनुस्मरणात् ॥ ५ ॥

मिता॰ ५

एवमुदकदाने कर्तृविशेषप्रतिषेधमुक्त्वा संप्रदानविशेषेण प्रतिषेधमाह ॥ पाषंड्य इति ॥ पाषंडं तन्त्रं येषां
ते पाषंडिनः अनाश्रिताः अधिकारे सत्यप्यकृताश्रमविशेषपरिग्रहाः ॥ स्तेनाः सुवर्णादिव्यतिरिक्तद्रव्यहारि
णः ॥ भर्तृघ्न्यः प्रतिघातिन्यः ॥ कामगाः कुलटाः ॥ आदिग्रहणात् स्वगर्भब्राह्मणघातिन्यो गृह्यंते ॥ सुराप्यो या सत्यामु
प्र रां निषिद्धां पिबंति ॥ आत्मत्यागिन्यः विषाद्युद्बंधनादिना आत्मानं यास्त्यजंति ॥ एते पाषंड्यादयस्त्रियंत
दशाशौचेनेति ॥ वक्ष्यमाणस्याशौचस्य उदकदानादेरपि दिकस्य च भाजनानि न भवंति ॥ भाजयंतीति भाजनाः ॥ स

पाषंड्यनाश्रिताः स्तेना भर्तृघ्न्यः कामगादिकाः ॥ सुराप्य आत्मत्यागिन्यो नाशौचोदकभाजनाः ॥ ६ ॥

पिंडादीनामाशौचादिनिमित्तत्वात् न भवंति तस्मान्मरणे सपिंडैरुदकदानादि न कार्यमित्येतत्प्रतिपादयन्नपरं च
ननं ॥ भर्तृघ्न्यः सुराप्य इत्यादि स्त्रीलिंगमविवक्षितं ॥ अनुपादेयगतत्वात् ॥ एतच्च बुद्धिपूर्वकविषयं ॥ यथाह गौत
मः ॥ प्रायोनाशकशस्त्राग्निविषोदकोद्बंधनप्रपतनैश्चेच्छतामिति ॥ प्रायो महाप्रस्थानं ॥ अनाशकं अनशनं ॥ नि
निश्शिखरादथपातः प्रपतनं ॥ इच्छतामिति विशेषणोपादानात् प्रमादकृते दोषो नास्तीत्यवगंतव्यं ॥

मि० प्रा० ६

ऽथ यः कश्चित्प्रमादेन म्रियेताप्युदकादिभिः। तस्याऽशौचं विधातव्यं कर्तव्या चोदकक्रिया इत्यंगिरसः स्मर
णात्। गतयाश्च मृत्युविशेषात् स्पाशौचादिनिषेधः। चांडालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि। दंष्ट्रिभ्यश्च पशु
भ्यश्च मरणं पापकर्मणां। उदकं पिंडदानं च प्रेतेभ्यो यत्प्रदीयते। नोपतिष्ठति तत्सर्वमंतरिक्षे विनश्यति। इ
त्यपीच्छापूर्वमात्महननविषयं। गौतमवचनेनेच्छापूर्वकमेवोदकेन हतस्याशौचवारादिनिषेधस्योक्तत्वा
त्तत्रापि चांडालादुदकात्सर्पादित्यत्र साहचर्यदर्शनात् बुद्धिपूर्वविषयत्वनिश्चयः। अतो दर्पादिना चंडालादी

नरशिरःकपालादिश्रुतिबाह्यलिंगधारणं॥

नहं तु गतो पशुभिर्मारितस्तस्यायं सर्वत्र एवात्मानं गोपयेदिति। विध्यतिक्रमनिमित्तः पिंडदानादिनिषेधः।
एवं उष्ट्रदंष्ट्र्यादिग्रहणात् यमाशिसुखे नद्यास्तत्समरणेऽप्ययं निषेधस्त्वनुसंधेयः। अयं चाशौचप्रतिषे शिव० ६
धोदकदानादिकाज्ञानवृत्तिस्ससविप्रगोनृपहतानामत्वृहं ब्राह्मणघातिनामिति मध्यः। शौचस्य च द्वत्समा
त्वात्। तथा दाहादिकमप्येषां न कार्यं। नाशौचं नोदकं नाश्रुर्नदाहाद्यं कर्म चरेत्। ब्रह्मदंडहृ॥ ॥

तानां चन कुर्यात्कटधारणमिति। प्रमस्मरणात्। ब्राह्मणैर्दंडहता ब्राह्मणहताः श्वेतवहनासाधनं खड्गादिकर
णं दंनोच्च तेन च वाहिनाग्निमग्निनिर्दहंति युक्तपात्रे श्वेनेतत्तु श्रुतिविहिताग्नियज्ञपात्रादिश्रुतिपतितोपग्र
संगात्। यस्मान्मेदादिनिषेधो विप्रादिहतानामपि विषयं न अस्य केवलमात्रांकनीयः। यत्र श्वांडालादिहताहित
ग्निसंबंधिनामग्निपत्रपात्राणां सम्मतरेण निषिद्धंतरं विधीयते। वैतानं प्रक्षिपेदप्सु आवसथ्यं चतुष्प
थे। पात्राणि तु दहेदग्नौ यजमानेष्टया मृत इति। [illegible] यातः छरास्यापि प्रतिपन्नांतरमुक्तं। आत्मनस्त्यागि
नां नास्ति पतितानां तथा क्रिया तेषामपि तथा गंगातोये संस्थापनं हितमिति स्मरणात्। यस्मादविशे
षेण सर्वेषां दहनादिनिषेधः। अतः स्नेहादिना निषेधातिक्रमे प्रायश्चित्तं कर्तव्यं। [illegible]
कं स्नानं स्पर्शनं वाहनं तथा। कृच्छ्रेणाश्रुपातं च तप्तकृच्छ्रेण शुध्यतीति स्मरणात्। एतच्च [illegible]
द्धिपूर्वं वेदितव्यं। अबुद्धिपूर्वकरणे तु। तेषामन्तमंत्रे तं यो वहेत् दहेत् वा। कटोदकक्रियां कृत्वा
कृच्छ्रं सांतपनं चरेदिति। संवर्तोक्तं कर्तव्यं। पुनः तच्छवं केवलं स्पृष्टमश्रु वा पातितं यदि। पूर्वोक्तानामक
रीत्वैकरात्रमभोजनमिति स्मृत्यश्रुपातयोरुपवास उक्तः। असौ कृच्छ्रस्तत्र कस्तथा बंधनछेदने रज्ज
ने वा मासं निक्षाहारस्त्रिषवणं [illegible] ते तिसु मंतु नानिष्ठा [illegible] मुक्तं। तत्र प्रकारांतरसेवा। एवमन्यानपि॥ ॥

मि॰ श्रा॰
७

तद्विषयाणि स्मृतिवाक्यानि व्यवस्थापनीयानि अयं च रागादिप्रतिषेधोऽनुष्ठानासमर्थजीर्णवानप्रस्थादिव्यति
रिक्तविषयस्तेषामनुज्ञादर्शनात् ॥ वृद्धः ॥ गौतमस्मृतेऽप्युक्तः प्रसाख्यानविषक्रियः ॥ आत्मानं घातयेद्यस्तु
भृग्वग्न्यनशनाम्बुभिः ॥ तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसंचयः ॥ तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमाचरेदि
ति स्मरणात् ॥ एवं येन येनोपाधिना हननं न शास्त्रतोऽनुज्ञायते ॥ तत्तद्व्यतिरिक्तमार्गेणात्महननेऽश्रा
द्धीयोर्ध्वदैहिके तु निषिद्धेषु सत्सु किं पुनस्तेषां कार्यमित्यपेक्षायां षट्त्रिंशन्मतेऽप्युक्तं ॥ ना
रायणबलिः कार्यो लोकगर्हाभियान्नरैः ॥ तथा तेषां भवेच्छौचं नान्यथेत्यब्रवीद्यमः ॥ तस्मात्तेभ्योऽपि दातव्यम
न्नमेव सदक्षिणमिति ॥ व्यासेनाप्युक्तं ॥ नारायणं समुद्दिश्य पवित्रं वायव्यरीयस्त्रीयने ॥ तस्य शुद्धिकरं
मतञ्चेदन्नेनतर्दन्यथेति ॥ एवं नारायणबलिश्च तस्य शुद्धिसंपादनद्वारेण श्राद्धादिसंप्रदानत्वयोग्यतां जनयती
त्यौर्ध्वदैहिकमपि सर्वं कार्यमेव ॥ अत एव षट्त्रिंशन्मते त्यौर्ध्वदैहिकस्यानुषंगत्वाद्गुरूपत्वे गोब्राह्मणह
तानां च पतितानां तथैव च ॥ ऊर्ध्वं संवत्सरात्कुर्यात्सर्वमेवौर्ध्वदैहिकं ॥ इत्येवं संवत्सरादूर्ध्वं नारायणबलिं
कृत्वा ऊर्ध्वदैहिकं कार्यं ॥ नारायणबलिश्चैवं कर्तव्यः ॥ कस्मिंश्चिद्विष्णुक्षेत्रे एकादश्यां विष्णुं वैवस्वतं यमं च यथा
वदभ्यर्च्य तत्समीपे मधुघृतप्लुतान् तिलमिश्रान् दश पिण्डान् विष्णुरूपेण प्रेतमनुस्मरन् ॥ प्रेतनामगोत्रं

त्रि॰
७

उच्चार्य दक्षिणाग्रेषु दर्भेषु दक्षिणाभिमुखो दत्त्वा गन्धादिभिरभ्यर्च्य पिण्डप्रवाहणं कृत्वा नद्यां प्रक्षिपेत् तत्र
द्वितीयदिवसे तस्मिन्नेव रात्र्याममुष्मान् ब्राह्मणानामंत्र्यापोपितः श्वो भूते मध्याह्ने विष्णुमाराध्य एकोद्दि
ष्टविधिना ब्राह्मणपादप्रक्षालनं कृत्वा पिण्डपितृयज्ञावृतोल्लेखनादि ततस्तेन तूष्णीं कृत्वा विष्णवे ब्रह्म
णे शिवाय यमाय यमाय च सपरिकरसहिताय चतुरः पिण्डान् दत्त्वा नामगोत्रसहितं प्रेतं संस्मृत्य विष्णोर्नाम
संकीर्त्य पंचमं पिण्डं दद्यात् ॥ ततो विप्रानाचांतान् दक्षिणाभिस्तोषयित्वा तन्मध्ये एकं गुणवत्तमं प्रेतबुद्ध्या
संस्मरन् गोभूहिरण्यादिभिरतितरां येन संतोष्य ततः पवित्रपाणिभिर्विप्रैः प्रेताय तिलादिसहितमुदकं
दापयित्वा स्वजनैः सार्धं भुंजीत ॥ स्मृत्यन्तरे त्वयं विशेषः ॥ संवत्सरं यावत् पुराणोक्तविधिना पंचत्वम्प्रागत
स्यैवं विधाय पूर्णे संवत्सरे नारायणबलिं कृत्वा सौवर्णं नागं दद्यात् ॥ गां च प्रसद्यात् ततः सर्वमौर्ध्वदैहिकं
कुर्यात् ॥ नारायणबलिस्वरूपं च वैष्णवे निर्दिष्टं ॥ यथा एकादश्यां समासाद्य शुक्लपक्षस्य वै तिथिं ॥ वि
ष्णुं समर्चयेद्देवं यममेव वैवस्वतं तथा ॥ दश पिण्डान् घृताभ्यक्तान् दर्भेषु मधुसंयुतान् ॥ तिलमिश्रान् प्रदद्याद्वै
संयतो दक्षिणामुखः ॥ विष्णुबुद्ध्या समाधाय नद्यंभसि ततः क्षिपेत् ॥ नामगोत्रग्रहणं तत्र पुष्पैरभ्यर्चनं तथा ॥ धू
पदीपप्रदानं च भक्ष्यभोज्यं तथा परं ॥ निमंत्रयेत विप्रांश्च पंच सप्त नवापि वा ॥ विद्यातपःसमृद्धांश्च कुलोत्पन्नांस्

सि॰ प्रा॰
८

स्नानं समाहितान् ॥ अपरेह्नि संप्राप्ते मध्याह्ने समुपोषितः ॥ विष्णोरभ्यर्चनं कृत्वा विप्रांस्तानुपवेशयेत्
॥ उदङ्मुखान् यथाज्येष्ठं विष्णुरूपमनुस्मरन् ॥ मनो निवेश्य विष्णौ वै सर्वं कुर्यादतंद्रितः ॥ ब्राह्मणा
दिपर्यंतं देवपूर्वं समाचरेत् ॥ नत्वा तान् भोजयित्वा तु विप्रानुद्दिष्टं यथाविधि ॥ हविष्यं जनेनैव तोषिता
न् सहितेन च ॥ पंच पिंडान् प्रदद्याच्च देवरूपमनुस्मरन् ॥ प्रथमं विष्णवे दद्यात् ब्रह्मणे च शिवाय च ॥ य
माय सपार्षदाय चतुर्थं पिंडमुत्सृजेत् ॥ मृतं संचिंत्य मनसा गोत्रपूर्वमतःपरं ॥ विष्णोर्नाम गृहीत्वैवं पं
चमं पूर्ववत् क्षिपेत् ॥ विधिवद्दक्षिणाभिस्तान् समभ्यर्च्य पितॄन् ॥ एकं वृत्तमं विप्रं तु हिरण्येन समर्चयेत् ॥ गवा वा
स्त्रेण भूम्या वा प्रेतं मनसा स्मरन् ॥ ततस्तिलांभो विप्रास्तु हस्तैर्दर्भसमन्वितैः ॥ क्षिपेयुर्गोत्रपूर्वं तु ना
म बुद्धौ निवेश्य च ॥ हविर्गंधतिलांभस्तु तस्मै दद्युः समाहिताः ॥ मित्रभृत्यजनैः सार्द्धं पश्चाद्भुंजीत वाग्यतः ॥
एवं विष्णुमते स्थित्वा यो दद्यादात्मघातिने ॥ समुद्धरति तं क्षिप्रं नात्र कार्या विचारणा ॥ सर्पदंष्ट्रानिमित्तं च सौव
र्णं नागदानं प्रतिकृतिकृतिरूपेण नविसुराणसुमंतुना निर्दिष्टं ॥ सुवर्णेनारनिष्पन्नं नागं कृत्वा तथैव
गां ॥ व्यासाय सप्रत्तानि शिवमितितुरानृणमाप्नुयात् ॥ ६ ॥ ॥ श्रीरामाय नमः ॥ गोपीजनवल्लभाय नमः ॥

शि॰
८

एवमुदकदानस्यापवादमभिधायानंतरं किं कार्यमित्यत आह ॥ कृतोदकानिति ॥ कृतमुदकदानं यैस्तान्
कृतोदकान् स्नातान् समुत्तीर्णान् मृदुशाद्वले नवोद्गततृणान्वयाद्यते नूतनांगे सम्यक् स्थिता
न् पुत्रादीन् कृतस्नानान् पुरातनैरितिहासैर्वक्ष्यमाणैरपवदेयुः शोकनिरसनसमर्थैर्वचनैर्बोधयेयु
ः ॥ ७ ॥ शोकनिरसनसमर्थेतिहासस्वरूपमाह ॥ मानुष्ये इति ॥ मनुष्यत्वाख्ये न जरायुजांडजादिचतु

कृतोदकान् समुत्तीर्णान् मृदुशाद्वलसंस्थितान् ॥ स्नातानप
वदेयुस्तानितिहासैः पुरातनैः ॥ ७ ॥ मानुष्ये कदलीस्तंभ
निःसारे सारमार्गणं ॥ करोति यः स संमूढो जलबुद्बुदसन्निभे ॥ ८ ॥

र्विधं भूतजातं जन्यांते ॥ तस्मात् वो मानुष्यं तस्मिन् संसरणधर्मित्वेन कदलीस्तंभवदसारं हि ते
जलबुद्बुदवदस्थिरं विनश्वरे संसारे सारस्य स्थिरस्य मार्गणमन्वेषणं यः करोति स संमूढो तं तं नष्ट
चित्तस्तस्मात्संसारासारस्वरूपं वेदनिर्विकल्पिरिति शोकं न कार्यं ॥ ८ ॥ ॥ ॐ नमः ॥ ॥

मि० प्रा० ९

किंच ॥ पंचधेति ॥ जन्मांतरात्मीयशरीरजनितैः कर्मबीजैः स्वफलोपभोगार्थं पंचधा पृथिव्यादिपंचमहाभूतात्मकतया पंचप्रकारं संभृतः निर्मितः कायः ॥ स यदि फलोपभोगनिवृत्तौ पंचत्वमागतः ॥ पृथिव्यादिरूपंतां प्राप्तस्तत्र तत्तां किमर्थं परिदेवना निःप्रयोजनकत्वान्नानुशोचनं कार्यं ॥ वस्तुनस्तथास्थितित्वान्नहि केनचिद्वस्तुस्थितिरतिक्रमितुं शक्यते ॥ ९ ॥ किंच ॥ गंत्रीति ॥ नेदमाश्चर्यं मरणं नाम यतः पृथि

पंचधा संभृतः कायो यदि पंचत्वमागतः ॥ कर्मभिः स्वशरीरोत्थैस्तत्र का परिवेदना ॥ ९ ॥ गंत्री वसुमती नाशमुदधिर्दैवतानि च ॥ फेनप्रख्यः कथं नाशं मृत्युलोको न यास्यति ॥ १० ॥ श्लेष्माश्रु बांधवैर्मुक्तं प्रेतो भुंक्ते यतो वशः ॥ अतो न रोदितव्यं हि क्रियाः कार्याः स्वशक्तितः ॥ ११ ॥ ॥

शि० ९

वी निम्नगा सप्त भूतानि नाशं गच्छंति ॥ तथा समुद्रा अपि जरामरणविरहिणो अमरा अमरा अपि पिप्पलयम पेक्षवसानं गच्छंति कथमिवास्थिरतया फेनसन्निभो मरणधर्मा भूतसंघो विनाशं न यास्यति ॥ उचितमेव हि मरणं प्राणिनां प्रायाणां अतो निःप्रयोजनः शोकसमावेशः ॥ १० ॥ अनिष्टापादकत्वादप्यनुशोचनं न कार्यमित्याह ॥ श्लेष्मेति ॥

यस्माद्रुदितो नाशे बांधवैर्दत्तं नयननिर्गमितं श्लेष्माश्रु वा अकामोपि प्रेतो भुंक्ते ॥ तस्मान्न रोदितव्यं ॥ किंतु प्रेतहितेषु निःस्वशक्त्यनुसारेण श्राद्धादिक्रियाः कार्याः ॥ ११ ॥ इतीति ॥ एवं कुलवृद्धवचांसि सम्यगाकर्ण्य लक्शोकाः संतो बाला नग्रतः कृत्वा गृहं गच्छेयुः ॥ गत्वा च वेश्मनो द्वारि स्थित्वा नियताः संयतमनस्काः निंबपत्राणि विदश्य दशनैः खंडयित्वा आचम्य कृत्वा उदकगोमयगौरसर्षपानालभ्याग्न्यादि गृहं त

इति संश्रुत्य गच्छेयुर्गृहं बालपुरःसराः ॥ विदश्य निंबपत्राणि नियता द्वारि वेश्मनः ॥ १२ ॥ आचम्याग्न्यादि सलिलं गोमयं गौरसर्षपान् ॥ प्रविशेयुः समालभ्य कृत्वाश्मनि पदं शनैः ॥ १३ ॥ प्रवेशनादिकं कर्म प्रेतसंस्पर्शिनामपि ॥

दुर्वाप्रवालमग्निं वृषभं चेति त्रिषु स्थानेषु दूर्वांकुरवृषभावपि स्पृष्ट्वा अश्मनि च पदं निधाय शनैरस्खलितं वेश्म प्रविशेयुः ॥ १३ ॥ अतिदेशमाह ॥ प्रवेशनादिकमिति ॥ यदेतदुक्तं निंबपत्रदशनादिवेशनांतं तन्न केवलं ज्ञातीनां ॥ अपितु परेषामपि धर्मार्थं प्रेतालंकारनिर्हरणादिकं कुर्वतां भवति ॥ प्रवेशनादिकमित्यत्रादिशब्दः मांगलिकत्वात् प्रतिलोमक्रमाभिप्रायः तेषां च धर्मार्थं निर्हरणादि

मि॰प्रा॰
१०

दहनानंतरंतत्क्षणात्शुद्धिमिच्छतामसपिंडानांस्नानप्राणायामाभ्यामेवशुद्धिः॥यथाहपराशरः॥अनाथं
ब्राह्मणंयेवहंतितेद्विजातयः॥पदेपदेयज्ञफलमनुपूर्वंलभंतिते॥नतेषामशुभंकिंचित्पापंवाशु
भकर्मणां॥जलावगाहनात्तेषांसद्यःशौचंविधीयते॥स्नेहादिनानिर्हरणेतुमनुनोक्तोविशेषः॥अस
पिंडंद्विजंप्रेतंविप्रोनिर्हृत्यबंधुवत्॥विशुध्यतित्रिरात्रेणमातुराप्तांश्चबांधवान्॥यद्यन्नमत्तितेषांतुद
शाहेनैवशुध्यति॥अनदन्नन्नमह्नैवनचेत्तस्मिन्गृहेवसेत्॥अत्रेयंव्यवस्था॥यःस्नेहादिनाचा

इच्छतांतत्क्षणात्शुद्धिःपरेषांस्नानेनसंयमात्॥१४॥

निर्हरणंकृत्वातदीयमेवान्नमश्नातितद्गृहेचवसति॥तस्यदशाहेनैवशुद्धिः॥यस्तुकेवलंतद्गृहेवसतिनपु
नस्तदन्नमश्नातितस्यत्रिरात्रं॥यःपुनःनिर्हरणमात्रंकरोतिनतद्गृहेवसतिनचाश्नातितस्यैकाहःइतिएतच्चस
जातीयविषयं॥विजातीयविषयेपुनर्योयज्जातीयंप्रेतंनिर्हरतिसतज्जातिप्रयुक्तमाशौचंचकार्यं॥यथाहगौत
मः॥अवरश्चेद्वर्णःपूर्ववर्णमुपस्पृशेत्॥पूर्वोवावरंतच्छावोक्तमाशौचमितिउपस्पर्शनंनिर्हरणं॥विप्रस्य
शूद्रनिर्हरणेमासमाशौचं॥शूद्रस्यतुविप्रनिर्हरणेत्रिरात्रमित्येवंशौचंकार्यमित्यर्थः॥१४॥ ॥ ॥

प्रा॰
१०

ब्रह्मचारिणंप्रत्याह॥आचार्यउक्तलक्षणःमाताचपिताचपितरौ॥उपाध्यायश्चपूर्वोक्तः॥एतान्निर्हृत्या
पिव्रतीब्रह्मचारीव्रत्येवनपुनरस्यव्रतभ्रंशः॥कटशब्देनाशौचंलक्ष्यते॥तत्सहचरितमन्नंसकटान्नंत
द्ब्रह्मचारीनाश्नीयान्नचाशौचिभिःसहसंवसेत्॥एवंचवदताआचार्यादिव्यतिरिक्तप्रेतनिर्हरणेब्र
ह्मचारिणोव्रतलोपइत्यर्थादुक्तंभवति॥अतएववसिष्ठेनोक्तं॥ब्रह्मचारिणःशवकर्मणाव्रतान्नि

आचार्यपित्रुपाध्यायान्निर्हृत्यापिव्रतीव्रती॥सकटान्नंचनाश्नीयान्नच
तैःसहसंवसेत्॥१५॥क्रीतलब्धाशनाभूमौस्वपेयुस्तेपृथक्पृथक्॥

वृत्तिरस्यमातापित्रोरिति॥१५॥आशौचिनांनियमविशेषमाह॥क्रीतलब्धाशनेति॥क्रीतमयाचित
लब्धंवाअशनंयेषांतेक्रीतलब्धाशनाःस्युरितिशेषः॥क्रीतेलब्धेवान्ननियमात्तदलाभेअनशनम
र्थसिद्धंभवति॥अतएववसिष्ठः॥गृहान्नंवर्जयित्वाअधःप्रस्तरेत्र्यहमनश्नन्त आसीरन्॥क्रीतोत्पन्नेनवावर्तेरन्नि
ति॥अधःप्रस्तरःआशौचिनांशयनासनार्थंतृणमयःप्रस्तरः॥तेचसपिंडाःभूमावेवपृथक्पृथक्शयीरन्नसं
हतो

मि॰ प्रा॰
११

मनुनाप्यत्र विशेषो दर्शितः ॥ अक्षारलवणान्नाः स्युर्निमज्जेयुश्च ते त्र्यहं ॥ मांसाशनं च नाश्नीयुः शयीरंश्च पृथ
क्क्षिताविति गौतमवचनेनापि विशेष उक्तः ॥ अधःशय्यासनो ब्रह्मचारिणः सर्वत इति ॥ तथा पिंडपितृय
ज्ञप्रक्रियया प्राचीनावीतिना वितिचास्त्रिपयाश्रेनाय दिनत्रयं पिंडरूपमन्नं तद्दीक्षितो देयं ॥ यथाह मरीचि
ः ॥ प्रेतपिंडं बहिर्दद्याद्दर्भमंत्रविवर्जितं ॥ प्रागुदीच्यां चरुं कृत्वा स्नातः प्रयतमानसः ॥ इति दर्भवर्जितत्वमनुप
नीतविषयं ॥ असंस्कृतानां भूमौ पिंडं दद्यात्संस्कृतानां कुशेष्विति प्रचेतसः स्मरणात्‌ ॥ तथा कर्तृनियमश्चा स

पिंडयज्ञावृता देयं प्रेतायान्नं दिनत्रयं ॥ १६ ॥

परिशिष्टादितेयः ॥ असगोत्रो वा यदि स्त्री यदि वा पुमान्‌ ॥ प्रथमेऽहनि यो दद्यात्स दशाहं समापयेदिति ॥ येत
थाऽप्यनियतमश्वशुनःपुच्छेन दर्शितः ॥ शालिना सक्तुभिर्वापि शाकैर्वाप्यथ निर्वपेत्‌ ॥ प्रथमेऽहनि यद्द्रव्यं
तदेव स्याद्दशाहिकं ॥ तदुष्णीषसेकं पुष्पं च धूपं दीपं तथैव चेति ॥ पिंडश्च पाषाणे देयः ॥ तमोमाल्यं पिंडपाती
यमुपले वा रघुरिति शिरोधेः स्मरणात्‌ ॥ न च रघुरिति बहुवचनेनोदकदानवत्‌ सर्वैः पिंडदानं कार्यमि शिव॰ १०

त्यर्थं कनीयं । किंतु पुत्रेणैव कार्यं ॥ तदभावे प्रत्यासन्नेन सपिंडेन ॥ मन्मतमेन तदभावे मातृसपिंडादिना का
र्यं ॥ पुत्राभावे सपिंडा मातृसपिंडाः शिष्याश्च रघुस्तदभावे ऋत्विगाचार्याविति गौतमस्मरणात्‌ ॥ पुत्रबहुत्वे पु
नर्ज्येष्ठेनैव कार्यं ॥ सर्वैरनुमतिं कृत्वा ज्येष्ठेनैव तु यत्कृतं ॥ द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेदिति मरीचि
स्मरणात्‌ ॥ पिंडसंख्यानियमश्च ब्राह्मणस्य दश पिंडाः क्षत्रियस्य द्वादश एवं स्वे स्वे आशौचदिनसंख्यया वि
ष्णुना विहितः ॥ यावदाशौचं प्रेतस्योदकं पिंडमेकं च दद्युरिति ॥ तथा स्मृत्यंतरेऽपि ॥ नवभिर्दिवसैर्दद्यान्नव पि
डान्समाहितः ॥ दशमं पिंडमुत्सृज्य रात्रिशेषे शुचिर्भवेदिति शुचित्ववचनमपरेद्युः क्रियमाणैकादशाहश्राद्धब्राह्म
णनिमंत्रणाभिप्रायेण ॥ योगीश्वरेण तु पिंडत्रयदानमभिहितं ॥ अनयोश्च गुरुलघुकल्पयोरुदकदान
विषयो कालवस्थाविति यावत्‌ ॥ अत्रापरः शातातपीयो विशेषः ॥ आद्येन च सवकासे पि पिंडान्न दद्यात्‌ दशैवे
ति ॥ त्रिरात्राशौचे विना पुनः पारस्करेण विशेषो दर्शितः ॥ प्रथमदिवसे देयास्त्रयः पिंडाः समाहितैः ॥ द्वितीये च
तुरो दद्यादस्थिसंचयनं तथा ॥ त्रींस्तु दद्यात्तृतीये वा वस्त्रादिक्षालनं तथेति ॥ १६ ॥

मि० त्रा० किंच॥ जलमिति जलं क्षीरं च मृन्मये पात्रे दृपे इष्टपणाकारे शिक्यादावेकादं स्थापनीयं॥ विशेषानुपादानात्त्र
१२ यमेदृनिवा कार्यं॥ तथा पारस्करवचनात्प्रेतात्र स्नाही तुदकं संस्थाप्य पिव चेदमिति क्षीरं॥ तथा अस्थि
संचयन प्रथम दिने कार्यं पश्चात्संवर्त्तः॥ प्रथमे ह्नि तृतीये वा सप्तमाष्टमे नवमे नवमे तथा॥ अस्थि संचय
नं कार्यं दिने तद्गोत्रजैः सहेति॥ क्वचिद्विनीये तु अस्थिसंचयनमुक्तं वेदितव्यं तु॥ चतुर्थे दिवसे अस्थिसंचयनं
कुर्यात्त्रिषां वर्णानामिति प्रक्षेपस्तु इति॥ अनोन्मनमस्मिन्नदिने स्वगृह्योक्तविधिना अस्थिसंचयनं कार्यमेव

जलमेकाहमाकाशे स्थाप्यं क्षीरं च मृन्मये॥ ॥

गिरसा चान्न विशेषोदर्शितः॥ अस्थिसंचयने यागो देवानां परिकीर्त्तितः॥ प्रेतीभूतं तयोर्दिष्टयः श्रुचिं न करो
तिचेत्॥ देवतानां तु यजनं तत्र पंथ्ये ये देवताः॥ देवतास्त्वात्र श्मशानवासिन्यस्तत्र पूर्वदग्धाः श्मशानवा
सिनां देवाः शवानां परिकीर्त्तिताः इति तेनैवोक्तं॥ अतस्तीर्थे देवानृत्त्वा चिरस्तं च प्रेतमुद्दिश्य धूपदीपादि दि० व० ति
पिंडरूपेणाचान्ने न तत्र पूजा कार्येत्युक्तं भवति॥ तथा वपनं च कार्यं दशमेहनि संप्राप्ते स्नानं ग्रामाद्बहिर्भ १२
वेत् गात्रस्नानिवासांसि केशश्मश्रुनखानि चेति देवलस्मारणात्॥ तथा स्मृत्यन्तरे॥ द्वितीयेहनि॥

कर्त्तव्यं क्षुरकर्म प्रयत्नतः॥ तृतीये पंचमे वापि सप्तमे वाप्रदानतः इति श्राद्धप्रदानात्पूर्वाग नियम इति या
वत्॥ वपनं च केषामित्याकांक्षायां आपस्तंबेनोक्तं॥ अनुनाविनां च परिवापनमिति॥ अयमर्थः॥ शो
॥ स्वमनुभवंतीत्यनुनाविनः सपिंडास्तेषां वा विशेषेण वपनमुक्तान्त्र न्यं वपनमिति संपृक्षायां इदमेवोपदि
ष्टं तेष्वनुनाविनां परिवापनमिति॥ अनुपश्चाद्भवंतीत्यनुनाविनस्तु वयसस्तेषां वपनमिति॥ अनुना
विनः पुत्रा इति केचित्संमतेन गंगायां भास्करक्षेत्रे मातापित्रोर्गुरोर्मृतौ॥ आधानकाले सोमे च वपनं स

वैतानोपासनाः कार्याः क्रियाश्च श्रुतिचोदनात्॥ १॥

मुक्तमिति नियमदर्शनात्॥ अथ विधिनस्तु श्रौतस्मार्त्तकर्माधिकारनिरूपणेषु कार्येषु
पुविदमनुतानार्थमाह॥ वैतानोपासना इति॥ वितानोः स्थीनां विस्तारः तत्र नावा वैताग्निसाध्या अ
ग्निहोत्रदर्शपूर्णमासाद्याः क्रियाश्च प्रते॥ प्रतिदिनमुपासनं उपासनं॥ गृह्योग्निस्तत्रभावा औ
पासनाः सायंप्रातर्होमक्रियाश्चप्रते॥ वैतानोपासनावैदिकाः किं क्रियाः कार्याः॥ कथं वैदिकत्वमि
तिचेत् श्रुतिचोदनात्॥ तथा हि॥ यावज्जीवमग्निहोत्रं जुहुयात् इत्यादि श्रुतिविहितानां चोदना
दे वा॥ तथा स्वहरहः स्वाहाकृपर्यन्तमावे

मि० प्रा०
१३

केनचित्सकाष्ठादितिश्रुतौपासनहोमोपिचोद्यते॥ अत्र च श्रौतत्वविशेषणोपादानात्स्मार्त्तक्रियाणांदर्श
नादीनामनुष्ठानं॥ अत एव व्याघ्रपादेनोक्तं॥ स्मार्त्तकर्मपरित्यागो राहोरन्यत्र सूतके॥ श्रौते कर्मणि
तत्कालं स्नातः शुद्धिमवाप्नुयादिति॥ श्रौतानां च कार्यत्वाभिधानं तत्र नैमित्तिकाभिप्रायेण॥ यथाह पैठी
नसिः॥ नित्यानि निवर्त्तेरन्वैतानवर्जं शालाग्नौ चैके इति॥ नित्यानि निवर्त्तेरन्नित्युक्त्वा विशेषेण॥ आवश्यकानां नित्य
नैमित्तिकानां निवृत्तौ प्रसक्तायां वैतानवर्जमित्यग्नित्रयसाध्यावश्यकानां पर्युदासः॥ शालाग्नौ चैके इति
गृह्याग्नौ नवानामप्यावश्यकानां पाक्षिकः पर्युदासकः॥ अतस्तेषां शौचेनास्त्येव काम्यानां पुनः शौ
चानाचाराननुष्ठानं॥ मनुनाप्यनेनैवाभिप्रायेणोक्तं॥ प्रसूतेनाग्निपुक्रियाइति॥ अग्निपुक्रिया न च अन्न
दिविपनग्निसाध्यानां पंचयज्ञादीनां निवृत्तिः॥ अत एव संवर्त्तः॥ होमं तत्र न कुर्वीत शुष्कान्नेन फलेन वा
॥ पंचयज्ञविधानं तु न कुर्यान्मृत्युजन्मनोरिति॥ वैश्वदेवस्याग्निसाध्यत्वेपि वचनान्निवृत्तिः॥ विप्रो
देशात्समासीत वैश्वदेवविवर्जितः इति तेनैवोक्तत्वात्॥ मृतके कर्मणां त्यागः संध्यादीनां विधीयतइ
ति॥ यद्यपि संध्याया निवृत्तिः श्रूयते॥ तथाप्यंजलिप्रक्षेपादिकं कार्यं॥ सूतके सावित्र्यंजलिं प्रक्षिप्य प्र
दक्षिणं कृत्वा सूर्यं ध्यायन्नमस्कुर्यादिति पैठीनसिस्मरणात्॥ यद्यपि वैतानोपासनाः कार्याः श्रुतिसामा
मेनोक्तं॥ शि० १३

तथाप्यन्येन कारयितव्यं॥ अन्य एतानि कुर्युरिति पैठीनसिस्मरणात्॥ बृहस्पतिनाप्युक्तं॥ सूतके मृत
के चैव अशक्तौ श्राद्धभोजने॥ प्रवासादिनिमित्तेषु हावयेन्न तु हापयेदिति॥ तथा स्मार्त्तेपि पिंडपितृयज्ञश्र
वणाकर्माश्वयुजादिकं च नित्यहोमः कार्य एव॥ सूतके तु समुत्पन्ने स्मार्त्तं कर्म कथं भवेत्॥ पिंडयज्ञं चरुं
होमं असगोत्रेण कारयेदिति जातुकर्ण्यस्मरणात्॥ यद्यपि सांगे कर्मण्यसूतकवत्वं तथापि स्वद्रव्यत्याग
त्मकं प्रधानं स्वयं कुर्यात्॥ तस्यानन्यनिःपाद्यत्वात्॥ अत एवोक्तं श्रौते कर्मणि तत्कालं स्नातः शुद्धिमवाप्नु
यादिति॥ यत्तु न दर्शं न च निर्गृहो होमः स्वाध्यायश्च निवर्त्तत इति षेधः॥ स काम्याभिप्रायो वैश्वदेवाभिप्रा
यो वा व्यवस्थापनीयः॥ तथा सूतकान्नभोजनमपि न कार्यं॥ उभयत्र दशाहानि कुलस्यान्नं न भुज्यतइ
ति मनुस्मरणात्॥ उभयत्र जननमरणयोः दशाहानीत्याशौचकालोपलक्षणं कुलस्य सूतकयु
क्तस्य संबंध्यन्नं अस्मकुलैर्न भोक्तव्यं॥ अकुल्यानां पुनर्न दोषः सूतके तु कुलस्यान्नमदोषं मनुरब्रवी
दिति तेनैवोक्तत्वात्॥ अयं च निषेधो दातृभोक्त्रोरंतरेण जननमरणोत्पत्तिज्ञाने सति द्रष्टव्यः॥ अज्ञानामाभुरि
ज्ञाते सूतके नैव दोषकृत्॥ एकेनापि परिज्ञाते भोक्तुर्दोषमुपावहेदिति षट्त्रिंशन्मते दर्शनात्॥ तथा
पि विवाहादिषु सूतके तन्नैः श्राद्धब्राह्मणानामर्थे पृथक्कृतमन्नं भोक्तव्यमेव॥ विवाहोत्सवयज्ञेषु अं
तरा॥

मि॰ प्रा॰
१५

मृतसूतके ॥ पूर्वसंकल्पितार्थेषु न दोषः परिकीर्तितः इति वृद्धमनुस्मरणात् ॥ तथा परैर्विप्रैः परिदृष्टान्नमते
पिदत्तमिति ॥ विवाहोत्सवयज्ञेषु त्वंतरा मृतसूतके ॥ परैरन्नं प्रदातव्यं भोक्तव्यं च द्विजोत्तमैः ॥ भुंजानेषु तु
विप्रेषु त्वंतरा मृतसूतके ॥ अन्यगेहोदकाचांताः सर्वे ते शुचयः स्मृताः इति ॥ तथाशौचिपरिग्रहेष्वपि के
षुचित्द्रव्येषु दोषाभावः ॥ यथाह मरीचिः ॥ लवणे मधुमांसे च पुष्पमूलफलेषु च ॥ शाककाष्ठतृणेष्वप्सु
दधिसर्पिःपयःसु च ॥ तिलौषधाजिने चैव पक्वापक्वे स्वयंग्रहः ॥ पण्येषु चैव सर्वेषु नाशौचं मृतसूतके
इति ॥ पक्वं भक्ष्यजातं ॥ अपक्वं तंडुलादि स्वयंग्रह इति स्वयमेव स्वाम्यनुज्ञातो गृह्णीयादित्यर्थः ॥ पक्वा
पक्वान्ननुज्ञातमन्नस्तत्र प्रशस्तविषयं ॥ अन्नमन्त्र प्रशस्तानामाममन्नमगर्हितं ॥ भुक्त्वा पक्वान्नमेतेषां त्रि
रात्रं तु पयः पिबेदिति अंगिरसः स्मरणात् ॥ अत्र पक्वशब्दो भक्ष्यव्यतिरिक्तौदनादिविषयः ॥ शावसंस्पर्श
निमित्ताशौचे तु अंगिरसा विशेष उक्तः ॥ आशौचं यस्य संसर्गादापतेद्गृहमेधिनः ॥ क्रियास्तस्य न लुप्यंते गृ
ह्याणां च न तद्भवेदिति ॥ तदाशौचं केवलं गृहमेधिन एव ॥ न पुनस्तद्गृहे भवानां नापि तदीनां तत्र द्रव्याणां च
न वेदित्यर्थः ॥ अतिक्रांताशौचेष्वप्ययमेवार्थः स्मर्यते नरैरुदाहृतः ॥ अतिक्रांते दशाहे तु पश्चाज्जानाति
चेद्गृही ॥ त्रिरात्रं सूतकं तस्य न तु तद्वस्त्यकर्हिचित् ॥ १७ ॥ ॥

त्रि॰
१५

एवमाशौचिनां विधिप्रतिषेधरूपान्धर्मान्निधायाधुनाशौचे निमित्तकालनियमं चाह ॥ त्रिरात्रमि
ति ॥ शावनिमित्तं शावं ॥ सूतकशब्देन च जननवाचिना तन्निमित्तमाशौचं लक्ष्यते ॥ एवं च वरतो जननम
रणयोराशौचनिमित्तत्वमुक्तं भवति ॥ तच्च जननमरणमुत्पन्नं ज्ञातमेव निमित्तं निर्दिष्टं ज्ञातानि मरणं
त्वा पुत्रस्य जन्म चेत्यादि लिंगदर्शनात् ॥ तथा विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशं ॥ यच्छेषं दशरा
त्रस्य तावदेवाशुचिर्भवेदित्यादिवाक्यारंभसामर्थ्याच्च उत्पत्तिमात्रेणैव तदाशौचे चस्यादशाहाद्याशौच

त्रिरात्रं दशरात्रं वा शावमाशौचमिष्यते ॥ ऊनद्विवर्षं उभयोः सूतकं मातुरेव हि ॥ १८ ॥

कालनियमाश्च नन्दनतिकालश्रवणे तु निर्दशज्ञातिमरणश्रवणे त्रिरात्रं शेषमेवाशौचमर्थात्सिध्य
तीति यच्छेषं दशरात्रस्येत्यादिवचनारंभणीयस्मात् ॥ तस्माद्ज्ञातमेव जननं मरणं च निमित्तं ॥ तच्चोभय
निमित्तमप्याशौचं त्रिरात्रं दशरात्रं चेष्यते मन्वादिभिः ॥ अत्राशौचप्रकरणे ईदृग्गणोत्विग्रहणमाद्
रात्रोपलक्षणार्थं ॥ मन्वादिभिरिष्यत इति वचनं तदुक्तसपिंडसमानोदकरूपविषयभेदप्रदर्शनार्थं
॥ १८ ॥

तथा हि ॥ दशाहं त्र्यहमाशौचं सपिंडेषु विधीयते ॥ जनने प्येवमेव स्यान्निपुणां शुद्धिमिच्छतां ॥ जन्मनैके
दैवोक्तानां तु त्रिरात्रात् शुद्धिरिष्यते ॥ नावस्यस्त्रीविशुद्ध्यति अहान्नुदकदायिनः इत्यनेनैवोक्ते त्रिरात्रं दशरात्र
योः समानोदकसपिंडविषयत्वेन व्यवस्था कृता ॥ अतः सपिंडानां सप्तमपुरुषावधिकानामविशेषेण द
शरात्रं समानोदकानां त्रिरात्रमिति ॥ यत्तु नः स्मृत्यंतरवचनं ॥ चतुर्थे दशरात्रं स्यात् षण्निशाः पुंसि पंचमे
षष्ठे चतुरहं च्छुद्धिः सप्तमे त्वहरेव त्विति ॥ तद्विगीतत्वान्नादरणीयं ॥ यद्यपि विहितं तथापि मधुपर्के गवालंभ
नवल्लोकविद्विष्टत्वान्नानुष्ठेयं ॥ अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न तु इति मनुस्मरणात् ॥ तत्र सप्तमे च
त्यासन्ने सपिंडे एकाहो विप्रकृष्टास्त्वमादि समानोदके षु त्र्यहमिति युक्तं ॥ एवमविशेषेण सपिंडानामा
शौचप्राप्तौ कंचिन्नियममाह ॥ ऊनद्विवर्षे संस्थे तयोरेव मातापित्रोर्दशरात्रमाशौचं न सर्वेषां सपिंडानां
तेषां तु वक्ष्यति ॥ आदंतजन्मनः सद्य इति ॥ तथा च पैठीनसिः ॥ गर्भस्थे प्रेते मातुर्दशाहं ॥ जाते ऽनपाकृते
नाभि सोदराणां चेति ॥ अथवा यमः ॥ ऊनद्विवर्षे संस्थिते मातापित्रोरेव अस्पृश्यत्वलक्षणमाशौ
चं सपिंडानां ॥ तथा च स्मृत्यंतरं ॥ ऊनद्विवर्षे प्रेते मातापित्रोरेव नेतरेषां इति अस्पृश्यत्वलक्षणमभिप्रे
तं ॥ इतरस्य पुनः कर्मण्यनधिकारलक्षणस्य सपिंडेष्वपि आदंतजन्मनः सद्य इत्यादिना विहितत्वात्

॥ अत्र दृष्टांतः सूतकं मातुरेव हीति ॥ तथा सूतकं जननमित्तमस्पृश्यत्वलक्षणमाशौचं मातुरेव तत्तयो
न द्विवर्षोपरमे मातापित्रोरेवास्पृश्यत्वमिति ॥ ऊनद्विवर्षे सपिंडानां अस्पृश्यत्वं प्रतिषेधता अस्पृश्यत्वम
नुज्ञातं भवति ॥ तथा च देवलः ॥ सर्वाशौचकालादुर्ध्वं स्पर्शनं च त्रिभागतः ॥ शूद्रविट्क्षत्रविप्राणा
यथाक्रमशस्त्र्यवचोदितं इति ॥ तच्चानुपनीतमरणनिमित्तेतनिक्तां नाशौचे त्रिरात्रो दैवे दिनत्रयं ॥ उपनीत
विषये तेनैवोक्तं दशाहाद्वित्रिभागेन ह्रते संस्पर्शनं कर्मात ॥ ऊर्ध्वं स्पर्शनमिच्छंति वर्णानां तत्त्वदर्शिनः
॥ त्रिचतुःपंचदशाभिः स्पृश्यत्वं वर्णाः क्रमेण तु ॥ तेत्राह्मोदशान्निर्विप्रः शौचादित्रिषडुत्तरैरिति ॥ पुष्पुत्रैः
दशाहानि षडुत्तरैः पंचदशाहानीति दृष्टव्यं ॥ १८ ॥ ॥

सि०प्रा० जनननिमित्तमस्पृश्यत्वलक्षणमाशौचमाह॥पित्रोरिति॥सूतकं जनननिमित्तमस्पृश्यत्वलक्षणमाशौ
१६ चं पित्रोर्मातापित्रोरेव न सर्वेषां सपिण्डानां तत्रास्पृश्यत्वं मातुरेव दशाहपर्यन्तं स्थिरमित्यर्थः॥कुतः जरस
कृद्दर्शनात्॥तस्याः संबंधित्वेनास्य रजोदर्शनात्॥ग्रजनत्वसिद्धेः॥नाशौचं नैव पिता ते पुंसः संसर्गे स्नानात्
दिति॥रजस्वलायास्तु चितैषं तत्पुंसि न विद्यते इति॥पितुस्तु शुक्रेण ननु इति॥स्नानेन पात्रेणास्पृश्यत्वं निरस्तं तास्प

पित्रोस्तु सूतकं मातुस्तस्याः स्याद्दर्शनाद्ध्रुवं॥
तद्दर्शनप्रदुष्येत पूर्वेषां जन्मकारणात्॥१८॥

याह संवर्त्तः॥जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते॥माता शुध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुरिति॥मा शिव०
तास्तु अशुद्धेः प्रत्यहं दशाहेन सेतसंव्यवहारयोग्यता मात्रं॥ग्रहणादुर्ष्ये पुनः कर्मसु पित्रीतस्मिन्नावशेष उक्तः॥स्मृ १६
तिकां पुत्रवृत्ति विंशतिरात्रेण कर्माणि कारयेत् मासेन स्त्रीजननीमिति॥अंगिरसास्तु सपिंडानामस्पृश्यता
नावांःस्पृष्टिकृतः॥१९॥

सूतकेऽस्ति॥यस्मिन् दिने कुमारजननं तद्दर्शनप्रदुष्येत तन्निमित्तदानाद्यधिकारापहारकत्वं नवतीत्यर्थ
॥यस्मात्तस्मिन् दिने पूर्वेषां पित्रादीनां पुत्ररूपेण जन्म उत्पत्तिस्तस्मात्तद्दर्शनं प्रदुष्येत॥तथा च दृश्या
यवल्कीनोक्तं॥कुमारजन्मदिवसे विप्रैः कार्यः प्रतिग्रहः॥हिरण्यभूगवाश्वाजवासः शय्यासनादिषु॥त
त्र सर्वं प्रतिग्राह्यं कृतान्नं न तु भक्षयेत्॥भक्षयित्वा तु तन्मोहात् द्विजश्चान्द्रायणं चरेदिति व्यासेनाप्यत्र
विशेष उक्तः॥सूतिकावासनिलया जन्मदानाम देवताः॥तासां यागनिमित्तं तु शुद्धिर्जन्मनि कीर्तिता॥

सूतके सूतिकावर्जं संस्पर्शो न निषिध्यते॥संस्पर्शे सूतिकायास्तु स्नानमेव विधीयते॥२०॥

प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा॥त्रिष्वेतेषु न कुर्वीत सूतकं पुत्रजन्मनि॥मार्कंडेयेनापि॥रक्षणीया
तथा षष्ठी निशा तत्र विशेषः पर्वतः॥रात्रौ जागरणं कार्यं जन्मदानां तथा बलिः॥पुरुषाः शस्त्रहस्ताश्च नृत्य
गीतैश्च योषितः॥रात्रौ जागरणं कुर्युर्दशम्यां चैव सूतक इति॥२०॥आशौचमध्ये पुनर्जनने मरणे वा
जाते तन्निमित्तं नैमित्तिकमाशौचं नेति न्यायेन पुनर्दशाहाद्याशौचं प्राप्तं तदपवादमाह॥ ॥

ऽन्तरेति ॥ वर्णापेक्षया वयोवस्थापेक्षया वा यस्य यावानाशौचकालस्तदन्तरा तत्समस्ततोऽल्पस्य वाशौ
चस्य निमित्तस्य जनने मरणे वा जाते पूर्वाशौचविशिष्टेरेवाहोभिर्विशुद्ध्यति ॥ न पुनः पश्चादुत्पन्नजननादि
निमित्तं पृथक्पृथगाशौचं कार्यं ॥ यदा पुनर्वर्तमानाशौचाद्दीर्घकालमाशौचमन्तरापतति तदा न पूर्वशे
षेण शुद्धिः ॥ यथाह देवलः ॥ स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि ॥ न पूर्वेण विशुद्धिः स्यात्स्वकालेनैव
शुद्ध्यतीति ॥ यमोऽप्याह ॥ अघवृद्धिमदाशौचं पश्चिमेन समापयेदिति ॥ अन्तराजन्ममरणइति

अन्तराजन्ममरणेशेषाहोभिर्विशुद्ध्यति ॥ ॥

यद्यप्यविशेषेणाभिहितं तथापि सूतकान्तवर्तिनः शावस्य पूर्वाशौचशेषेण शुद्धिः ॥ यथाहाङ्गिराः ॥
सूतके मृतकं चेत्स्यान्मृतके त्वथ सूतकं ॥ तत्राधिकृत्य मृतकं शौचं कुर्यान्न सूतकमिति ॥ तथा षडशी
त्यामपि ॥ शावाशौचे समुत्पन्ने सूतकं तु यदा भवेत् ॥ शावेन शुध्यते सूतिर्न सूतिः शावशोधिनी
ति ॥ तस्मात्सूतकान्तःपातिनः शावस्य पूर्वशेषेण शुद्धिः ॥ किं तु शावान्तःपातिन एव सूतकस्य ॥ ॥

तथा सजातीयान्तःपातित्वेपि ॥ शावस्य सूतकस्य च पूर्वशेषेण शुद्धेरपवादः स्वल्पान्तरेण दर्शितः ॥ मातर्यग्रेति ॥
अयमर्थः ॥ मातरि पूर्वं मृतायां तन्निमित्ताशौचमध्ये यदि पिता प्रमृतः स्यात्तदा न पूर्वशेषेण शुद्धिः ॥ किं तु पि
तुः प्रयाणनिमित्ताशौचकालेनैव शुद्धिः कार्या ॥ तथा पितुः प्रयाणनिमित्ताशौचमध्ये मातरि स्वर्यातायामपि
न पूर्वशेषमात्रेण शुद्धिः ॥ किं तु पूर्वाशौचं समाप्योपरि पक्षिणीं क्षिपेदिति ॥ तथाशौचसन्निपातकालवि
शेषकृतोऽप्यपवादो गौतमेनोक्तः ॥ रात्रिशेषे च सति द्वाभ्यां प्रभाते तिसृभिरिति ॥ अयमर्थः ॥ रात्रिमात्राव

मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता ॥ पितुः शेषेण शुद्धिः स्यान्मातुः कुर्यात्तु पक्षिणीं ॥ २० ॥

शिष्टे पूर्वाशौचे यद्याशौचान्तरसन्निपाते स्तर्हि द्विरात्रं समाप्यानन्तरं द्वाभ्यां शुद्धिः ॥ प्रभाते पुनस्तस्या रात्रेः
पश्चिमे यामे जननाद्याशौचान्तरसन्निपाते तिसृभी रात्रिभिः शुद्धिर्न पुनस्तच्छेषमात्रेण ॥ शातातपेनाप्यु
क्तं ॥ रात्रिशेषे द्व्यहाच्छुद्धिर्यामशेषे शुचिस्त्र्यहादिति ॥ अत्र च क्रिया पुनः सूतकसन्निपाते न निवर्तते तदुक्तं
तेनैवोक्तं ॥ अन्तर्दशाहे जननात्पश्चात्स्यान्मरणं यदि ॥ प्रेतमुद्दिश्य कर्तव्यं पिण्डदानं स्वबन्धुभिः ॥ आरब्धे प्रे
तपिण्डे तु मध्ये स्याज्जननं यदि ॥ शेषाशौच पिण्डांस्तु शेषान्दद्याद्यथाविधि ॥ तथा शावाशौचयोः स ॥ ॥

पि॰ श्रा॰ १८ निपातेऽपि प्रेतकर्तव्यं कार्यं तुल्यन्यायत्वात्॥ तथा जातकर्मादिकमपि पुत्रजन्मनिमित्तकमन्यपित्राशौचसं
तसन्निपातेऽपि कार्यमेवाप्ययाह प्रजापतिः॥ आशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत्। कर्तुस्तात्कालिकी
शुद्धिः पूर्वाशौचेन शुध्यतीति॥२१॥ पूर्णप्रसवकालजननाशौचमभिधायाधुनाऽप्राप्तकालगर्भनिःस्र
वनिमित्तमाशौचमाह॥ गर्भेति॥ अत्र त्रिपद्यपि लोके द्रवरूपकर्दमके परिस्पंदे पुस्पंदे तथात्र द्रवाव
स्थायां स्रावः अधःपतने वर्त्तते॥ कुतः द्रवत्वस्य प्रथममासएव संभवात्॥ गर्भनामासतुल्यानिरात्राणि

गर्भस्रावे मासतुल्या निशाः शुद्धेस्तु कारणम्॥२२॥

स्तुवचनानुपपत्तेः॥ गर्भस्रावे यावन्तो गर्भस्य मासास्तत्समसंख्या निशाः शुद्धेः कारणं॥ एतच्च त्रि
मासादूर्ध्वं गर्भस्रावे मासतुल्या रात्रयः स्त्रीणां स्नानमात्रमेव पुरुषस्येति वृद्धवसिष्ठस्मरणात्॥ यत्तु गर्भे
तमे नत्र्यहं वेति त्रिरात्रमुक्तं तन्मासत्रयादर्वाग्विदितव्यं॥ गर्भस्रुतौ यथामासमचिरे तूत्तमे त्र्यहः॥ रा
जन्ये तु चतुरात्रं स्यात्पंचाहमेव वा॥ अष्टाहेन तु शूद्रस्य शुद्धिरेषा प्रकीर्तिता॥ इति मरीचिस्मरणात्॥ त्रयोदि
रेमासान्तर्गर्भस्रावे तत्रमेव ... त्रिरात्रमित्यर्थः॥ एतच्च षण्मासपर्यंतं द्रष्टव्यं॥ ॥ ॥ त्रिव॰ १८

सप्तमादिषु पुनः पूर्णमेव जननाशौचं कार्यं॥ तत्र परिपूर्णांगस्य जीवतो निर्गमदर्शनात्॥ तत्र लोके प्रसवव्य
वहारयोगात्॥ षण्मासाभ्यंतरे यावत् गर्भस्रावो भवेद्यदा॥ तदा माससमैस्तासां दिवसैः शुद्धिरिष्यते॥ अत ऊर्ध्वं स्व
जात्युक्तं तासामाशौचमिष्यते॥ सद्यः शौचं सपिंडानां गर्भस्य पतने सति॥ इति स्मरणात्॥ एतच्च सपिंडानां स
द्यः शौचविधानं द्रवत्वे तु गर्भपतने वेदितव्यं॥ यत्तु वसिष्ठवचनं॥ ऊनद्विवार्षिके प्रेते गर्भपतने वा स
पिंडानां त्रिरात्रमिति तत्पंचमषष्ठयोः कठिनगर्भपतनविषयं॥ आचतुर्थाद्भवेत्स्रावः पातः पंचमषष्ठ
योः॥ अत ऊर्ध्वं तु प्रसवो दशाहं सूतकं भवेत्॥ स्रावे मातुस्त्रिरात्रं स्यात्सपिंडाशौचवर्जनं॥ पाते मातु
र्यथामासं पित्रादीनां दिनत्रयमिति मरीचिस्मरणात्॥ सप्तमासप्रभृति मृतजनने जातमृते वा स
पिंडानां जनननिमित्तं परिपूर्णमाशौचं॥ जाते मृते मृते जाते वा सपिंडानां दशाहमिति हारीतस्मरणा
त्॥ अंतः सूतके चेदोत्थानात्सर्वाशौचं सूतकवदिति पारस्करवचनाच्च॥ उत्थानादासूतिकायाः उत्थाना
द्दशाहमिति यावत्॥ सूतकवदिति शिशूपरमनिमित्तोदकदानरहितमित्यर्थः॥ हरदत्तेनापि अस्या
हाभ्यंतरे बाले प्रमीते तस्य बांधवैः॥ शावाशौचं न कर्तव्यं सूत्याशौचं विधीयत इति॥ तथा तस्यांतर
मपि॥ अंतर्दशाहे प्रेतस्य सूतिकाहो निरेवाशौचमिति॥ ॥ एवमादिवचननिचयपर्यालोचनया सपिंड

मि०प्रा०
१९

नांजननिमित्ताशौचसंकोचोनास्तीतिराम्नेः॥ यत्तुनर्द्दृदिस्मृवचनं॥ जातमृतेमृतजातेवाकुलस्यसद्य
शौचमिति॥ तच्छिशुपरमनिमित्ताशौचस्यस्नानात्शुद्धिप्रतिपादनपरं नप्रसवनिमित्तस्य॥ तथा पारस्कर
॥ गर्भेयदिविपपत्तिःस्यात्दशाहंसूतकंनवेत्॥ सपिंडानांप्रसवनिमित्तस्यविद्यमानत्वात्जीवन्नुजातोय
दिवेयोसद्यएवविशुध्यतीतिप्रेताशौचानिप्रायं॥ तथाहिशंखेनोक्तं॥ प्राग्नामकरणात्सद्यःशौचमिति
॥ यत्तुनःकात्यायनवचनं॥ अनिर्दृशेदशाहेतुपंचत्वंयदिगच्छति॥ सद्यएवविशुद्धिःस्यान्नप्रेतंनोदकक्रि
येतितदपिवैश्यत्वेनसमानार्थं॥ यदातुनप्रेतंनैवसूतकमितिपावस्नदासूतकमस्पृश्यत्वेनैवपित्रादी
नांनवतीसर्यः॥ अथवायमर्थः॥ अनिर्दशेदशाहेयदिशिशुपरमस्तदानप्रेताशौचं॥ यदितत्रसपिं
डेजननंतदासूतकमपिनैवकार्यंकिंपुनःशौचनेवत्तुरिति॥ यत्तुवृद्धमनुवचनं॥ जीवन्नजातो
यदितंमृतःसूतकएववु॥ सूतकंसकलंमातुःपित्रादीनांत्रिरात्रकमिति॥ यच्चबृहद्वशिष्ठवचनं॥
मुहूर्तंजीवितोबालःपंचत्वंयदिगच्छति॥ मातुःशुद्धिर्दशाहेनसद्यःशौचास्तुगोत्रिणः इति॥ तत्रैयंव्यवस्था जा
तनानंतरंनालनिवर्त्तनात्प्रागेवपित्रादीनांजननिमित्तमाशौचंत्रिदिनत्रयं॥ सद्यःशौचंतस्मिंहोत्राद्यर्थं ग्र
म्हिहोत्रार्थंस्नानोपस्पर्शनात्तत्कालंशौचमितिशंखवचनात्॥ नालनिवर्तनोत्तरकालंत्रिशुप्रायतोःजन

त्रिव०
१९

ननिमित्तंसंपूर्णमाशौचंसपिंडानां॥ यावन्नछिद्यतेनालंतावन्नाप्नोतिसूतकं॥ छिन्नेनालेततःपश्चा
त्सूतकंतुविधीयतइतिजैमिनिस्मरणात्॥ मनुनाप्ययमर्थोदर्शितः॥ रात्रिभिर्मासतुल्याभिर्गर्भस्रावेवि
शुध्यति॥ रजस्युपरतेसाध्वीस्नानेनस्त्रीरजस्वलेति॥ इदंचागोस्यार्थेदर्शितः॥ उत्तरस्यत्वयमर्थः॥ रज
सिनिःसरणादुपरतेनिवृत्तेरजस्वलास्त्रीस्नानेनसाध्वीदैवादिकर्मयोग्याभवति॥ स्पर्शादिविषयेपु
नस्तुपरतेपिरजसिचतुर्थेहनिस्नानात्शुद्धाभवति॥ तदुक्तंदक्षमनुना॥ चतुर्थेहनिसंशुद्धाभवतिव्या
वहारिकीति॥ तथाचस्मृत्यंतरं॥ शुद्धाभर्त्तुश्चतुर्थेह्निस्नानेननस्त्रीरजस्वला॥ दैवेकर्मणिपित्र्येचपंचमेह
निशुध्यतीति॥ पंचमेहनिनिरजोनिवृत्तिकालोपलक्षणार्थंयदारजोदर्शनादारभ्यपुनःसप्तदशादिना
मंतरेरजोदर्शनं॥ तदाशुचित्वंनास्त्येवाष्टादशेत्वेकाहाच्छुद्धिरेकोनविंशेद्व्यहात्॥ ततऊर्ध्वंत्र्यहात्
शुद्धिः॥ यथाहात्रिः॥ रजस्वलायदिस्नातापुनरेवरजस्वला॥ अष्टादशदिनादर्वाक्अशुचित्वंनविद्यते॥ ए
कोनविंशतेरर्वाक्एकाहंस्यात्ततोद्व्यहं॥ विंशात्प्रभृतिपुनरेषुत्रिरात्रमशुचिर्भवेदिति॥ यत्तुचतुर्दशादिनाद
र्वाक्अशुचित्वंनविद्यतइतिस्मृत्यंतरं॥ तत्रस्नानमात्रंनिवर्तनमभिप्रेतमतोनविरोधः॥ अयंचाशुचित्वप्र
तिषेधोयस्याःविंशतिदिनोत्तरकालमेवप्रायशोरजोदर्शनंतद्विषय॥ यस्याःपुनरष्टादशेदिवसेवार्तवाःप्रा

मि॰प्रा॰ २०

वाष्टादशादिनानन्तरं चतुर्थे रजो निर्गमेस्तस्यास्त्रिरात्रमेवाशौचं ॥ तया च याव त्रिरात्रं स्नानादिरहितया
स्थातव्यं रजस्वला त्रिरात्रमशुचिर्भवति ॥ सा च नांजीत नाप्सु स्नायात ॥ अधःशायी न च दिवास्वप्यात् नानमहा
निरीक्षेत नाग्निं स्पृशेन्न रज्जुं सृजेन्न धावयेन्न मानहसेन्न च किंचिदाचरेद खर्वेण पात्रेण पिबेदंजलिना वा पात्रे
ण पिबेदंजलिना वा पात्रेण लोहितायसेन वेति विज्ञायत इति वसिष्ठस्मरणात् ॥ अंगिरसेपि त्रिरोषः अहस्त्री
यात्मन्नमयेवाह विशुद्धिनिष्ठाविनी ॥ रजस्वला चतुर्थेह्नि स्नात्वा शुद्धिमवाप्नुयादिति ॥ पाराशरोपि विशेषः ॥
स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला ॥ पात्रांतरितनोयेन स्नानं कृत्वा व्रतं चरेत ॥ सिक्तगात्रा न वेदंगि
सांगोपांगा कथंचन ॥ न वस्त्रपीडनं कुर्यान्नान्यद्वासश्च धारयेदिति ॥ तत्रान्न साप्यत्र विशेषो दर्शितः ॥ द्वारा
नितृतीया नारी रजसापि परिप्लुता ॥ कथं तस्याः प्रवेत्तत्रौ शुद्धिः स्यात्केन कर्मणा ॥ चतुर्थेह्नि संप्राप्ते
स्पृशेदन्यां तु तां स्त्रियं ॥ सा सचैलावगाह्यापः स्नात्वा स्नात्वा पुनः स्पृशेत ॥ स्नात्वा स्नात्वा कृतौ [illegible] नेन
पुनःपुनः ॥ शंकेन तासमसां सागतत्स्मृ दानवेच्चमा ॥ दशानां ज्ञा[illegible]नं पुरस्कृत्य विशुद्धिर्भवति ॥ स्त्री त्रिव॰ २०
यंत्रातुरमात्रे स्नानप्रकारो वृद्धस्मरणीये ॥ आतुरे स्नानमुत्पन्ने दशकृत्वो ह्यनातुरः ॥ स्नात्वा स्पृशेत्तेनं ततः शुध्येदे
आतुरेति

पराशरस्मरणात् ॥ यदा तु रजस्वलायाः सूतिकायां वा मृतिर्भवति ॥ तदा पंचस्नानप्रकारः ॥ सूतिकायां मृतायां तु
कथं कुर्वंति याज्ञिकाः ॥ कुंभे सलिलमादाय पंचगव्यं तथैव च ॥ पुण्यर्भिरभिमंत्र्यापो वाचा शुद्धिं लभेत्ततः ते
नैव स्नापयित्वा तु दाहं कुर्याद्यथाविधि ॥ रजस्वलायास्तु ॥ पंचभिः स्नापयित्वा तु गव्यैः प्रेतां रजस्वलां ॥ वस्त्रां
तरावृतां कृत्वा दाहयेद्विधिपूर्वकमिति ॥ ॥ तत्र रजोदर्शने पुत्रजन्मादिषु उदयात्प्रभृति कालमुत्पन्नं तद्दिन
दिवसप्रभृत्या प्रातोऽहोरात्रगणना कार्या ॥ यदा तु रजसा रजोदर्शने पुत्रजन्मादि जातं तदा रात्रेस्त्राक
जननाद्युत्पत्तौ पूर्वदिवसे कर्तव्यापि तद्व्याघ्रोचतत्त्वेवगणना कार्येत्येकः कल्पः ॥ रात्रिं त्रेधा विभ
ज्याद्येभागद्वये जननादौ पूर्वदिनं ग्राह्यमिति द्वितीयः ॥ प्रागुदयादित्यपरः ॥ यथाह काश्यपः ॥ उदिते तु य
दा सूर्ये नारीणां दृश्यते रजः ॥ जननं वा विपत्तिर्वा यस्याहस्तस्य शर्वरी ॥ अर्द्धरात्रावधिः कालः सूतकादौ विधीय
ते ॥ रात्रिं कुर्यात्त्रिभागां तु द्वौ भागौ पूर्ववत्तु ॥ उत्तमांशः प्रभाते न युज्यते सूतकादिषु ते ॥ गचाविव समुत्पन्नेश्वे
स्त्रसि सूतके ॥ पूर्वमेव दिनं ग्राह्यं यावन्नाभ्युदितो रविः ॥ इति ॥ अस्य पांचकाल्यानां देशाचारानुसारतो ॥ व्यवस्था
विशेषाः ॥ देवाग्रैश्च माहितास्नेसूर्येरसेसंस्कार दिवसप्रभृति कर्तव्या ॥ अनाहिताग्नेर्मरणदिवसप्रभृति संस्क
पनन्तयोरपि संस्कारदिवसप्रभृति द्वितीयादिदिवसे कार्यं ॥ यथाह गिराः ॥ अनेनपिमत उक्तं तेसाग्रेः संस्का
रकर्मणः ॥

मि०प्रा०
२१

शुद्धिं संनयनं दाहान्मृताहस्तु यथातिथीति ॥ साग्नेः संस्कारकर्मणः इति श्रवणादाहिताग्नेः पितरिदं ॥ तस्म-
त्तत्पुत्रादीनामासंस्कारात्संध्यादिकर्मलोपो नास्तीत्यनुसंधेयं ॥ तथा च पैठीनसिः ॥ अनग्निमत उत्क्रां-
तेराशौचं हि द्विजातिषु दाहादग्निमतो विद्याद्विदेशस्थे मृते सतीति ॥ २० ॥ सपिंडत्वादिना दशाहादिप्राप्तौ
कचिन्मनुविशेषेऽपवादमाह ॥ हतानामिति ॥ नृपो निषिक्तः क्षत्रियादिः ॥ गोशब्दो दंष्ट्रादितिर्यगुप-
लक्षणार्थं ॥ विप्रग्रहणमंत्यजोपलक्षणं ॥ एतैर्हतानां ये सपिंडास्तेषां ॥ विषोदधनादिभिर्बुद्धिपूर्वमात्मा-

हतानां नृपगोविप्रैरन्वक्षं चात्मघातिनां ॥

नं ये व्यापादयंति ते आत्मघातिनः ॥ आत्मघातिग्रहणं पापस्वभावजनानां स्त्र्यादयस्येकयोगापात्रपतितमात्रो-
पलक्षणं ॥ तत्संबंधिनां च अन्वक्षमनुगतमक्षमन्वक्षं ॥ सद्यः यावद्दहनं निमाशौचमित्यर्थः ॥ न पुनः दशाहादि-
कं ॥ तथा च गौतमः ॥ गोब्राह्मणहतानामन्वक्षं राजक्रोधाच्च ॥ युद्धे प्रायोनाशककृत्वा ॥ स्त्र्यग्निविषोदकोद्बंध-
नप्रपतनैश्चेच्छतामिति ॥ क्रोधग्रहणं प्रमादव्यापादितनिरासार्थं ॥ युद्धग्रहणं युद्धहतस्यैकाह ॥ ॥ शिव०
२१

शौचमस्तीति ज्ञापनार्थं ॥ ब्राह्मणार्थं विपन्नानां येषां पितृ गोग्रहेऽपि च ॥ आहवे पि हतानां च एकरात्रमशौचक-
मिति स्मरणात् ॥ एतच्च पूर्वकालजदातेन वृकाद्यंतरविपत्तेस्यममरः सर्वनीहतस्य पुनः सद्यः शौचं ॥ यथा-
ह मनुः ॥ उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च ॥ सद्यः संतिष्ठते यज्ञस्तथाशौचमिति स्थितिरिति ॥ जात-
स्यैव जननं दशाशौचनिमित्तत्वात् जन्मदिनादुत्तरकालेऽपि ज्ञाते दशाहादिप्राप्तावपवादमाह ॥ प्रोषि-
ते इति ॥ प्रोषिते देशांतरस्थे यत्र मृतेन प्रथमदिवस एव सपिंडजननादिकं न ज्ञायते तस्मिन्न सपिंडे कालव-

प्रोषिते कालशेषः स्यात्पूर्णे दत्त्वोदकं शुचिः ॥ २३ ॥

सद्यशाहाद्यवच्छिन्नस्य यः शेषो वशिष्टः कालः स एव शुद्धिहेतुर्भवति ॥ पूर्णे पुनराशौचकाले दशाहादि-
कं त्रिरात्रोदकं दत्त्वा शुचिर्भवति ॥ उदकदानस्य स्नानपूर्वकत्वात् स्नात्वोदकं दत्त्वा शुचिर्भवतीत्युक्तं
मनुना ॥ निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च ॥ सवासा जलमाप्लुत्य शुद्धो भवति मानव इति ॥ पूर्णे द-
त्त्वोदकं शुचिरिति प्रेतोदकदानसहचरितत्वादाशौचकालस्य शुद्धिहेतुत्वविधानात् जन्मनि नेति कांता ॥

मि॰ प्रा॰
२२

शौचं सपिंडानां नास्तीति गम्यते॥ पितुर्निर्देशोपि जनने स्नानमस्त्येव। श्रुत्वा पुत्रस्य जन्म चेति वचनात्॥ एत
च पुत्रग्रहणं जन्मनि सपिंडानामतिक्रांताशौचं नास्तीत्येतज्ज्ञापकं॥ अन्यथा निर्दशं ज्ञातिमरणं श्रुत्वा
जन्म च निर्दशामित्येवावक्ष्यत्॥ न चोक्तं। तथा च देवलः॥ नाशुद्धिः प्रसवाशौचे व्यतीतेषु दिनेष्वपीति॥
तस्मान्मृतावेवातिक्रांताशौचमिति स्थितिः॥ केचिदस्यार्थमस्य श्लोकं पठंति॥ प्रोषिते कालशेषः स्यात्पूर्णे
दत्वोदकमेव तु॥ सर्वेषां वत्सरे पूर्णे प्रेते दत्वोदकं शुचिरिति॥ प्रोषिते प्रेते सर्वेषां ब्राह्मणक्षत्रियादीनां
अविज्ञेये शौचकालशेषः शुद्धिहेतुः॥ अशौचापगमे पुनरतिक्रांते दशाहादौ सर्वेषां त्र्यहमेवाशौचं॥ संवत्सरे
पूर्णे यदि प्रोषितश्रवणं भवति तदा सर्वेषां ब्राह्मणादीनां स्नात्वोदकं दत्वा शुचिः स्यात्॥ तथा च मनुः॥
संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुध्यतीति॥ अयं च त्र्यहो दशाहादूर्ध्वं मासत्रयादर्वाक् द्रष्टव्यः॥ पूर्वोक्तं
तु सद्यःशौचं नवममासादूर्ध्वमर्वाक्संवत्सरात् द्रष्टव्यं॥ यत्तु वसिष्ठवचनं ऊर्ध्वं दशाहाच्छ्रुत्वैकरात्रमि
ति तदहः षण्मासेभ्योर्वाक् नवमं॥ यदि गौतमवचनं॥ श्रुत्वा चोर्ध्वं दशम्याः पक्षिणीमिति तन्मासत्र
यादूर्ध्वमर्वाक् षण्मासात्॥ तथा च वृद्धवसिष्ठः॥ मासत्रये त्रिरात्रं स्यात् षण्मासे पक्षिणी तथा॥ अहस्तु
नवमादर्वाक् त्र्यहं स्नानेन शुध्यतीति॥ एतच्च मातापितृव्यतिरिक्तविषयं॥ पितरौ चेन्मृतौ स्यातां दूर

मि॰ प्रा॰
२२

पि हि पुत्रकः॥ श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेदिति पैठीनसिस्मरणात्॥ तथा स्मृत्यंतरेपि॥ महा
गुरुनिपाते तु आर्द्रवस्त्रोपवासिना॥ अतीतेपि कर्तव्यं प्रेतकार्यं यथाविधीति॥ संवत्सरादूर्ध्वं प्रेत
कार्यमाशौचोदकदानादिकार्यं॥ न पुनः स्नानमात्राच्छुद्धिरित्यर्थः॥ पितृपत्न्यामपि मातृव्यतिरिक्ता
यां सपत्न्यंतरे विशेषो दर्शितः॥ पितृपत्न्यामतीतायां मातृवर्जं द्विजोत्तमः॥ संवत्सरे व्यतीते तु त्रिरात्रमशु
चिर्भवेदिति॥ यत्तु नद्यादिव्यवहिते देशांतरे मृतस्य सपिंडानां दशाहादूर्ध्वं मासत्रयादर्वागपि सद्यःशौ
चं देशांतरमृतं श्रुत्वा क्लीबे वैखानसे यतौ॥ मृते स्नानेन शुध्यंति गर्भस्रावे च गोत्रिण इति॥ देशांतरलक्षणं
बृहस्पतिनोक्तं॥ महानद्यंतरं यत्र गिरिर्वा व्यवधायकः॥ वाचो यत्र विभिद्यंते तद्देशांतरमुच्यते॥ देशां
तरं वदंत्येके षष्टियोजनमायतं॥ चत्वारिंशद्वदंत्यन्ये त्रिंशदन्ये तथैव चेति॥ इदं चातिक्रांताशौचमुपनीते
परस्मिन्विषये॥ पुनर्योवस्थाविशेषाच्छौचविषयमपि॥ तथा चोक्तं व्याघ्रपादेन॥ तुल्यं वयसि सर्वेषामति
क्रांते तथैव च॥ उपनीते तु विषमं तस्मिन्नेवातिकालजमिति॥ अस्यायमर्थः वयसि त्रिवर्षादिरूपे यदाशौच
मारं तज्जन्मनः सद्यःस्नानादिकं विहितं॥ तत्सर्वेषां ब्राह्मणादिवर्णानां तुल्यमविशिष्टं॥ अतिक्रांते च दशाहा
दिके अहरादि यदशौचं तदपि सर्वेषामविशिष्टं उपनीते पुनरुपरते दशाहादूर्ध्वं परस्मात् त्रिंशाद्धीना॥

मि०प्रा०
२३

नीत्येवंविधममाशौचं ब्राह्मणादीनां तस्मिन्नेवोपनीतोपरमएवातिक्रान्तजन्मतिक्रांताशौचं नवर्त्तितव
यवस्थाशौचातिक्रमइति ॥ ३ ॥ क्षत्रियादिषु दशरात्रस्य सपिंडाशौचस्यापवादमाह ॥ क्षत्रस्येति ॥
क्षत्रियवैश्यशूद्राणां सपिंडजननेनैतदुपरमेच यथाक्रमेण द्वादशत्रिंशद्दिनान्याशौचं नवर्त्तते ॥ न्या
यवर्त्तिनःपुनः शूद्रस्य पाकयज्ञादिजश्रुश्रूषादिरतस्यार्द्धं तस्य मासस्यार्द्धं पंचदशाहोरात्रमाशौचं ॥ एवं
चविंशत्यं दशरात्रावेचेत्येतद्दशरात्रमाशौचं परिशेष्यात् ब्राह्मणविषयेव्यवतिष्ठते ॥ स्मृत्यंतरे तु क्षत्रि

क्षत्रस्य द्वादशाहानि विशः पंचदशैव तु ॥ त्रिंश
दिनानि शूद्रस्य तदर्द्धं न्यायवर्त्तिनः ॥ २५ ॥ ॥

यादीनां दीक्षाहमर्योप्याशौचकल्पादर्शिताः ॥ यथाह पाराशरः ॥ क्षत्रियस्तु दशाहेन स्वकर्मनिरत
श्शुचिः ॥ तथैव द्वादशाहेन वैश्यः शुद्धिमवाप्नुयात् ॥ यथा चगौतम पः ॥ एकादशाहाद्राजन्यो वैश्यो द्वा
दशाभिस्त्याय ॥ शूद्रोविंशतिरात्रेणशुध्यते मृतसूतके ॥ वसिष्ठस्तु ॥ पंचदशरात्रेण राजन्यो विंशति
रात्रेण वैश्यः इति ॥ अंगिरास्त्वाह ॥ सर्वेषामेव वर्णानां सूतके तथा दशाहाच्छुद्धिरर्थाना ॥ ॥ त्रिव०
२३

इति नुनातपोब्रवीत् ॥ इत्येवमनेकोच्चावचाशौचकल्पाः दर्शिताः ॥ तेषां लोके समाचाराभावान्नी व्यवस्था
दर्शनमुपयोगी तिनात्र व्यवस्थाप्रदर्श्यते ॥ यदा पुनर्ब्राह्मणादीनां क्षत्रियादयः सपिंडा भवंति ॥ तेन दशाहा
रीनाघुक्ताशौचकल्पाः नुसरणीयः ॥ दशाहात्स्मृतेविप्रोजन्महानौस्वयोनिषु ॥ षड्भिस्त्रिभिरथैकेन क्ष
त्रविट्शूद्रयोनिषु इति ॥ विष्णुरप्याह ॥ क्षत्रियस्य विट्शूद्रेषु सपिंडेषु षड्रात्रत्रिरात्राभ्यां वैश्यस्य शूद्रे
सपिंडे षड्रात्रेण शुद्धिः ॥ हीनवर्णानां तूत्कृष्टेषु सपिंडेषु जातेषु मृतेषु वा तदाशौचव्यपगमे शुद्धिरिति
॥ बौधायनेन विशेषेणाद्दशाहइत्युक्तं ॥ क्षत्रविट्शूद्रजातीया ये स्युर्विप्रस्य बांधवाः ॥ तेषामाशौचे विप्र
स्य दशाहाच्छुद्धिरिष्यतइति ॥ अनयोश्च पक्षयोराप‌द्नापद्विषयत्वेन व्यवस्था ॥ दास्यादीनां तु स्वामिशौ
चेनैस्यात्त्वं ॥ कर्मानधिकारस्तुमासावधिरेव ॥ तदाहांगिराः ॥ दासीदासमथ सर्वे विये यस्य वर्णस्य योनयो
तु ॥ तद्वर्णं तु भवेत् तेषां सूतके मासमात्रकमिति ॥ प्रतिलोमानां तु शौचाभाव एव प्रतिलोमा धर्म
हीना इति स्मरणात् ॥ केवलमृतौ प्रसवे च मलापकर्षणार्थं मूत्रपुरीषोत्सर्गवत्शौचं भवत्येव ॥ २६ ॥

मि॰व्या॰ २४

तृतीयवर्षाद्विशेषादपि स्वगृह्याद्यारंभेच सापवादस्मादि।। आदंतजनेति।। यावताकालेन दंतानामुत्पत्तिः स्व
स्मिन्काले जातिसंबंधिनां सद्यः शौचं चूडाकरणादर्वाक्कृतस्य तस्य बालस्य संबंधिनां नैशिकी त्रिरा
त्रेण वा नैशिकी अहोरात्रव्यापिनी वा व्रतादेशः उपनयनं।। ततोर्वाक् चूडायाश्चोर्ध्वं मृतौ तस्य त्र्यहस्तु
द्धिः।। आदंतजन्मनः सद्य इति यद्यप्यविशेषेणाभिधानं।। तथाप्यग्निसंस्काराभावे द्रष्टव्यं।। आदंत
जाते बालेपि ते सद्य एव नास्याग्निसंस्कारो नोदकक्रियेति।। वैकल्पेग्निसंस्कारे हि तस्या सद्यः शौचं ति

आदंतजन्मनः सद्यः आचूडान्नैशिकी स्मृता।। त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परं।।२५।।

धानृतानां सति त्वग्निसंस्कारे हस्तदत्तकन्यासु बालेषु च ते विशुद्धमा।। एकाहः।। तथा च यम।। आदं
तजाते तनये त्रिरात्रेणार्जुनसुते तथा।। सपिंडानां तु सर्वेषामहोरात्रमशौचकमिति।। नामकरणोप्रा
क् सद्यः शौचमेव नियतं।। प्राक् नामकरणात्सद्यः शुद्धिरिति शंखस्मरणात्।। चूडाकर्म च प्रथमे शिव॰ २४
तृतीये वा वर्षे स्मर्यते।। चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः।। प्रथमेब्दे तृतीये वा कर्तव्यं श्रुतिचोद
नादिति स्मरणात्।। ।।

तत्र आदंतजननादूर्ध्वं त्र्यब्दप्रथमवार्षिकचूडाकर्मपर्यंतं एकाहः।। तत्र च कृतचूडस्यादंतजननेपि सपिंडादेरेकाह
ए वा।। तथा च विष्णुः।। दंतजाते च कृतचूडे त्वहोरात्रेण शुद्धिरिति।। तत ऊर्ध्वं प्रागुपनयनात्त्र्यहः।। यत्तु मनुव
चनं।। नृणामकृतचूडानामशुद्धिर्नैशिकी स्मृता।। निर्वृत्तचूडकानां तु त्रिरात्राच्छुद्धिरिष्यत इति।। तस्या
प्ययमेव विषयः।। यत्तु नद्विवर्षमधिकृत्य नेनैवोक्तं।। अस्यैकाहं वस्त्रका दाये पुत्र इमे वति ति।। यच्च
वसिष्ठवचनं।। ऊनद्विवर्षे प्रेते गर्भपाते च वा सपिंडानां त्रिरात्रमिति तत्संवत्सरं चूडाभिप्रायेण।। यत्त्वंगिरोवच
नं।। यद्यप्यकृतचूडो वै जातदंतस्तु संस्थितः।। तथापि दाहयित्वैनमाशौचं त्र्यहमाचरेदिति।। तद्वर्षत्रया
दूर्ध्वं कुलधर्मापेक्षया चौलोत्कर्षे वेदितव्यं।। विज्ञानेश्वरेणापि ऊनत्रिवर्षे तु मृते शुद्धिस्तु नैशिकी।। इति नैव निहि
तत्वात्।। न चायमेकाहो दंतजननात्प्राक् स्वीकरणीयः।। नहि स्वजननीयवर्षस्य दंतानुत्पत्तिः संभवति
।। तथा सत्यपि दंतजनने अकृतचूडस्य एकाहवदता विष्णुवचनेन विरोधस्य दुःपरिहरत्वात्।। तस्मा
च्चैवव्यवस्था ज्यायसी।। यत्तु कश्यपवचनं।। बालानामदंतजातानां त्रिरात्रेण शुद्धिरिति तन्मातापि
तृविषयं।। निरस्यत्तु पुमान् शुक्रमुपस्पृश्य विशुध्यति।। बैजिकादपि संबंधादनुरुंध्यादघं त्र्यहमिति जि
न्मजनकसंबंधोपाधिकतया त्रिरात्रस्मरणात्।। ततश्चायमर्थः।। प्राक् नामकरणात्स।। ।।

घःशौचं तदूर्ध्वं दंतजननादर्वागग्निसंस्कारक्रियायामेकाहः॥ इतरथा सद्यःशौचं जातदंतस्य प्रथमवा
र्षिकाचौलादर्वागेकाहः॥ प्रथमवर्षादूर्ध्वं त्रिवर्षपर्यंतं कृतचूडस्य त्र्यहः॥ इतरस्य त्वेकाहः॥ वर्षत्रया
दूर्ध्वं अकृतचूडस्यापि त्र्यहः॥ उपनयनादूर्ध्वं सर्वेषां ब्राह्मणादीनां दशरात्रादिकमिति॥ २४॥ इदानीं स्त्री
पुत्रवयोवस्थाविशेषेण पर्वावमाह॥ अहस्त्विति॥ अदत्तास्वपरिणीतासु कन्यास्वकृतचूडासु
वाग्दानात्प्रागहोरात्रं विशेषेण तच्छुद्धिकारणं॥ सपिंडानामापिंड्यं च कन्यानां त्रिपुरुषपर्यंतमेवाप्रत्तानां

अहस्त्वदत्तकन्यासु बालेषु च विशोधनं॥ ॥

तु स्त्रीणां त्रिपुरुषी विज्ञायत इति वसिष्ठस्मरणात्॥ बालेषु चानुपपन्नदंतेषु अग्निसंस्कारे सत्येकाहो वि
शोधनं॥ अकृतचूडायां तु कन्यायां सद्यःशौचं॥ अचूडायां तु कन्यायां सद्यःशौचं विधीयत इति आपस्तं
बस्मरणात्॥ वाग्दानादूर्ध्वं संस्कारात्प्राक् पितृपक्षे च त्रिरात्रमेव॥ यथाह मनुः॥ स्त्रीणामसंस्कृताना
तु त्र्यहाच्छुध्यंति बांधवाः॥ यथोक्तेनैव कल्पेन शुध्यंति तु सनाभयः इति॥ बांधवा अत्र पितृपक्षाः त्रिरात्रेण शु
ध्यंति॥ ॥

सनाभयस्तु पितृपक्षाः सपिंडाः यथोक्तेनैव कल्पेन निर्वृत्तचूडकानामित्यादिनोक्तेन त्रिरात्ररूपेण न पुन
रेकरात्ररूपेण पितृपक्षे विवाहात्प्राक् तस्या युक्तत्वात्॥ अत एव मरीचिः॥ वारिपूर्वं प्रदत्ता तु या नै
व प्रतिपादिता॥ असंस्कृता तु सा ज्ञेया त्रिरात्रमुभयोः स्मृतमिति॥ तयोः पतिपितृपक्षयोः॥ विवाहादू
र्ध्वं तु विच्छिन्ना विशेषोपरचिताः॥ संस्कृतासु स्त्रीषु पुनराशौचं पितृपक्षे॥ तत्र प्रसवमरणे चेत्तिन्नरहे सातांत
ऐकरात्रं त्रिरात्रं चेति॥ तत्र प्रसवे एकाहः मरणे त्रिरात्रमिति व्यवस्था॥ इदं तु वयोवस्थाशौचं सर्ववर्णसा
धारणं क्षत्रियस्य द्वादशाहानीति न वर्णविशेषोपादानेन विधानात्॥ अत एव मनुना अनुपात्तवर्णविशे
षाशौचविधेः साधारण्यप्रतिपादनार्थं चातुर्वर्ण्याधिकारे सत्यपि पुनश्चतुर्णामपि वर्णानां यथावच्छु
पूर्वशस्तुक्तं॥ तथा अंगिरसाप्युक्तं॥ अविशेषेण वर्णानामर्वाक्संस्कारकर्मणः॥ त्रिरात्रात्तु भवेच्छुद्धिः क
न्यास्वह्नो विधीयते॥ आद्यपादस्य वचनं॥ तुल्यं वयसि सर्वेषामिति प्राक्दर्शितं॥ अतो यथा पिंडयज्ञावृता
देयमित्यादि पिंडोदकदानविधिः सर्ववर्णसाधारणः॥ यथा वा समानोदकाशौचविधिः॥ अंतरा जन्ममरण
इति सन्निपाताशौचविधिश्च॥ यद्वद्गर्भस्रावे मासतुल्या रात्रय इत्याद्याशौचविधिः॥ प्रोषितकालशुद्धिः स्या
च्छेषे तु त्र्यहमेव तु निर्विदेशस्थाशौचविधिश्च॥ यथा वा गुर्वाद्याशौचविधिः सर्ववर्णसाधारणस्तथा व
योवस्थानिमित्तमध्या॥

मि० प्रा० २६ शौचं साधारणमेव भवितुमर्हति॥ अत एव दत्तेष्वद्भिः कृते चौले चैवं रूपेण विनिरुच्यते॥ ऊर्ध्वं त्रिवर्षात्स्त्रीदेहे तु दार
णाहो विधीयते॥ अप्राप्य त्रिरात्रं विप्राणामाशौचं संप्रकल्पयेत्॥ यत्तु शूद्रे वाग्दत्ताह प्रागनवदत्तात्वेवं रूपयोरि
सादीनि कृतशृंगादिवचनानि अविगीतत्वबुध्यानाद्रियमाणो धारेश्वरविश्वरूपमेधातिथिप्रभृति
भिराचार्यैः स्वयमेव साधारणः पक्षोंगीकृतः॥ अविनिमितानि वार्तानार्थं दत्तत्रियादिविषयतया व्याख्येयानि॥
॥ गुर्वादिषु निदेशमाह॥ गुर्वन्त इति॥ गुरुरुपाध्यायः अंतेवासी शिष्यः अनूचानः सांगानां प्रवक्ता॥ मातु

गुर्वन्तेवास्यनूचानमातुलश्रोत्रियेषु च॥२६॥

लग्रहणेनात्मबंधवो मातृबंधवः पितृबंधवश्च योनिसंबंधा उपलक्ष्यंते॥ ते च पत्नीदुहितरस्य च वर्णिता॥ श्रो
त्रिय एकशाखाध्यायी॥ एकां शाखामधीत्य श्रोत्रियमधीते इति बोधायनस्मरणात्॥ एषूपरतेषु अहोरात्रमाशौचं॥ त्रिव० २६
॥ यत्तु मुख्यो गुरुः पिता तदुपरमे सपिंडत्वाद्दशाहमेव॥ यस्तु पिता पुत्रानुत्पाद्य संस्कृत्य वेदानध्याप्य वेदा
र्थं ग्राहयित्वा वृत्तिं च विदधाति॥ तस्य महागुरुत्वात्तदुपरमे॥ द्वादशरात्रमाह॥ गुरुपुत्रादानाध्ययने वर्जयेत्

नि [illegible] नापन्ने शंकदृष्टं॥ आचार्योपरमेषु त्रिरात्रमेव॥ यथाह मनुः॥ त्रिरात्रमाहुराशौचमाचार्ये संस्थिते
सति॥ तस्य पुत्रे च पत्न्यां च दिवारात्रमिति स्थितिरिति॥ यत्तु आचार्यादिरंत्येष्टिं करोति तदा दशरात्रमाशौ
चं॥ गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरन्॥ प्रेताहारैः समं तत्र दशरात्रेण शुध्यतीति तेनैवोक्तत्वात्॥ श्रोत्रि
ये तु समानग्रामिणस्त्वेतदाशौचं॥ एकाहं सब्रह्मचारिणि समानग्रामिणि च श्रोत्रिये इत्याश्वलायन
स्मरणात्॥ एकाचार्योपनीतः सब्रह्मचारी॥ एतच्चासन्निधाने द्रष्टव्यं॥ संनिहिते तु शिष्यादौ त्रिरात्रादि॥ य
थाह मनुः॥ श्रोत्रिये तूपसंपन्ने त्रिरात्रमशुचिर्भवेत्॥ मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बांधवेषु चेति॥ उ
पसंपन्ने मैत्रिप्रातिवेश्यत्वादिना संबंधे शिलसुक्के वा॥ मातुलग्रहणं मातृष्वस्रादेरुपलक्षणार्थं॥ बां
धवा इत्यात्मबांधवो मातृबंधवः पितृबंधवश्चोच्यंते॥ तथा च बृहस्पतिः॥ अहं मातामहाचार्यश्रोत्रियेष्व
शुचिर्भवेदिति॥ तथा प्रचेताः॥ मृते चर्त्विजि याज्ये च त्रिरात्रेण विशुध्यतीति॥ तथा चाह मनुः संस्थिते
पक्षिणीं रात्रिं दौहित्रे भगिनीसुते॥ संस्कृते तु त्रिरात्रं स्यादिति धर्मो व्यवस्थितः॥ पित्रोरुपरमे स्त्रीणामू
ढानां तु कथं भवेत्॥ त्रिरात्रेणैव शुद्धिः स्यादित्याह भगवान्यमः॥ श्वशुरयोश्च भगिन्यां च मातुलान्यां च मा
तुले॥ पित्रोः स्वसरि तद्वच्च पक्षिणीं क्षिपयेन्निशां॥ तथा॥ मातुले श्वशुरे मित्रे गुर्वंगनासु च॥ आशौचं प

सि० प्रा० २७ क्षिणीरात्रिमृतामातामहीयदि॥ तथाच गौतमः॥ पक्षिणीमसपिंडे योनिसंबद्धे सहाध्यायिनि चेति॥ यो
निसंबंधा मातुलेयमातृष्वस्रेयपैतृष्वस्रेयादयः॥ तथा जाबालिः॥ एकोदकानां तु त्र्यहो गोत्रजानामह
:स्मृतं॥ मातृबंधौ गुरौ मित्रे मंडलाधिपतौ तथेति॥ तथाच विष्णुः॥ असपिंडे स्ववेश्मनि मृते एकरात्रमि
ति॥ तथा वृद्धमनुः॥ भगिन्यां संस्कृतायां तु भ्रातर्यपि च संस्थिते॥ मित्रे जामातरि प्रेते दौहित्रे भगिनीसु
ते॥ शालके तत्सुते चैव सद्यः स्नानेन शुध्यति॥ ग्रामेश्वरे कुलपतौ श्रोत्रिये च तपस्विनि॥ शिष्ये पंचत्वमाप
न्ने शुचिर्नक्षत्रदर्शनात्॥ ग्राममध्यगतो यावच्छवस्तिष्ठति कस्यचित्॥ ग्रामस्य तावदाशौचं निर्गते शु
चितामियादित्यादीन्याशौचविशेषप्रतिपादकानि स्मृतिवचनान्यन्वेषणीयानि॥ ग्रंथगौरवभ
यादत्र न लिख्यंते॥ एषु चैकविषयगुरुलघ्वाशौचप्रतिपादकतया परस्परविरुद्धेषु संनिधिविदे त्रि० वृ०
शाच्छास्त्राण्यपेक्ष्याव्यवस्थानुसंधातव्या॥ २६॥ ॥ श्रीगोपीजनवल्लभाय नमः॥ ॥ २७

किंच॥ अनाविति॥ अत्र हरिस्तु वर्न्नति॥ अनौरसाः क्षेत्रिकदत्तकादयस्तेषु जातेषूपरतेषु चाहोरात्रमाशौचं॥
तथा स्वभार्यास्वन्यगतासु अनुलोमप्रतिलोमव्यतिरिक्तमाश्रितासु प्रसूतासु चाहोरात्रमेव॥ न पुनः सप्त
पि सापिंड्ये द्विरात्रं प्रतिलोमाश्रितासु त्वाशौचाभाव एव॥ पारंपर्याश्रिताः स्वेनोऽस्पर्शनेन प्रतिषेधात् एत
च भार्यापुत्रयोः संबंधित्वाद्भावास्त्वतियोगिकं भार्यात्वं पुत्रत्वं च तस्मैवेदमाशौचं॥ सपिंडानां त्वेवाशौचा
भाव एव॥ अत एव प्रजापतिः॥ अनाश्रितेषु दारेषु परपत्नीसुतेषु च॥ गोत्रिणः स्नानशुद्धाः स्युः त्रिरात्रेणैव

अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च॥ ॥

वतस्मिंनेति॥ स्वैरिण्याद्यास्तु यमाश्रितास्तस्य तु त्रिरात्रमेव॥ यथाह विष्णुः॥ अनौरसेषु पुत्रेषु जातेषु
च मृतेषु च॥ परपूर्वासु भार्यासु प्रसूतासु मृतासु चेति॥ त्रिरात्रमत्र प्रकृतं॥ अनयोस्त्रिरात्रैक
रात्रयोः संनिधिविशेषाच्छास्त्राद्यपेक्ष्याव्यवस्था॥ यदा तु पितुस्त्रिरात्रं तदा सपिंडानामेकरात्रं॥ यथा मरीचि
:॥ सूतके चैव त्रिरात्रं परपूर्वयोः॥ एकाहस्तु सपिंडानां त्रिरात्रं यत्र वै पितुः॥ ॥ श्रीरामायनमः॥ ॥

मि०प्रा०
२८

निवासेति॥ निवसत्यस्मिन्निति निवासो देश उच्यते॥ तस्य यो राजा स्वामी विषयाधिपतिः स यस्मिन्नहन्य तीतस्तदहर्मात्रं शुद्धिकारणं॥ रात्रौ चेदतीतस्तदा त्रिरात्रं॥ अत एव मनुः॥ प्रेते राजनि सज्योतिर्यस्य स्याद्विषये स्थितिः॥ इति॥ सज्योतिषामहर्वर्त्तत इति सज्योतिराशौचमह्नि चेद्यावत्सूर्यरश्मि॥ रात्रौ चेद्यावन्नक्षत्रदर्शनमित्यर्थः॥२५॥ अनुगमनाशौचमाह॥ ब्राह्मणेनेति॥ ब्राह्मणेनासपिंडेन द्विजे

निवासराजनि प्रेते तदहः शुद्धिकारणं॥२५॥
ब्राह्मणेनानुगन्तव्यो न शूद्रो न द्विजः क्वचित्॥

ब्राह्मणादिः शूद्रो वा प्रेतो नानुगन्तव्यः॥ यदि स्नेहादिनानुगच्छति॥ तदांभसि तडागादिस्थिते स्नात्वा अग्निं स्पृष्ट्वा घृतं प्राश्य शुचिर्भवेत्॥ अस्य च घृतप्राशनस्य भोजनकार्यविधानेन प्रमाणाना वान्न भोजननप्रतिषेधः॥ इदं समानोत्कृष्टजातिविषयं॥ यथाह मनुः॥ अनुगम्येच्छया प्रेतं ज्ञातिमेव च॥ स्नात्वा सचैलः स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यतीति॥ ज्ञातयो मातृसपिंडाः॥ इतरेषां तु विहितं चान्यैरेषः॥

मज्ञाति

मि०प्रा०
२८

निकृष्टजात्यनुगमने तु स्मृत्यन्तरोक्तं द्रष्टव्यं॥ तत्र शूद्रानुगमने प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः॥ अनुगच्छेन्नीयमानं स त्रिरात्रेण शुध्यति॥ त्रिरात्रे तु ततश्चीर्णे नदीं गत्वा समुद्रगां॥ प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यतीति पराशरोक्तं॥ क्षत्रियानुगमने तु मानुषास्थि स्निग्धं स्पृष्ट्वा त्रिरात्रमाशौचमस्निग्धे त्वहोरात्रं शवानुगमने चैवमिति वसिष्ठोक्तं॥ वैश्यानुगमने पुनः पक्षिणी॥ तथा क्षत्रियस्या

अनुगम्याम्भसि स्नात्वा स्पृष्ट्वाग्निं घृतभुक् शुचिः॥२६॥

नन्तरवैश्यानुगमने अहोरात्रमेकान्तरशूद्रानुगमने पक्षिणी॥ वैश्यस्य शूद्रानुगमने एकाहं इत्यूहनीयं॥ तथा रोदनेपि पारस्करेणोक्तं॥ मृतस्य बांधवैः सार्द्धं कृत्वा तु परिदेवनं॥ वर्जयेत्तदहोरात्रं दानश्राद्धादिकर्म चेति॥ तथालंकरणमपि न कार्यं॥ कृच्छ्रपादो सपिंडस्य प्रेतालंकरणे कृते॥ अज्ञानादुपवासः स्याद्यरक्तौ स्नानमिष्यत इति शंखेन प्रायश्चित्तस्य विधानात्॥२६॥ सपिंडाशौचे कश्चिदपवादमाह॥ महीपतिनामिति॥

यद्यपिमहीशब्देनकृत्स्नभूगोलकमभिधीयतेतथाप्यत्रसकलायाःक्षितेरेककर्तृकत्वानुपपत्तेर्महीप
तीनामितिबहुवचनानुरोधाच्चतदेकदेशभूतानिमण्डलानिलक्ष्यन्ते॥तत्पालनाधिकृतानांक्षत्रियादीना
मभिषिक्तानांनाशौचंतैराज्ञोवचनात्कार्यमित्यर्थः॥तथाविद्युद्धतानांगोब्राह्मणरक्षार्थंविपन्नानांच
संबन्धिनोयेसपिंडास्तैराज्ञोवचनात्कार्यं॥यस्यचमन्त्रिपुरोहितादेःभूमिपोनृपःस्वसाध्यमन्त्रादिकार्यार्थ
कर्मसिद्ध्यर्थमाशौचाभावमिच्छतितेनापिनकार्यं॥अत्रचमहीपतिकंपदसाधारणत्वेनविहितंभ्रजा

महीपतीनांनाशौचंहतानांविद्युतातथा॥गोब्राह्मणार्थेसंग्रामेयस्यचेच्छतिभूमिपः॥२९॥

परिरक्षणंयद्येनमानससत्कारव्यवहारदर्शनादिनाविनानसंभवति॥तत्रैवाभावेनपुनःपंचमहाय
ज्ञादिष्विति॥तथाचमनुः॥राज्ञोमहात्मिकेस्थानेसद्यःशौचंविधीयते॥प्रजानांपरिरक्षार्थमासन
चात्रकारणमिति॥गौतमेनाप्युक्तं॥राज्ञांचकार्याविघातार्थमिति॥राजन्यमादेरप्याशौचंनभवति॥य
थाहप्रचेताः॥कारवःशिल्पिनोवैद्यादासीदासास्तथैवच॥राजानोराजभृत्याश्चसद्यःशौचाःप्रकीर्तिताःइति॥
कारवःसूपकारादयःशिल्पिनश्चित्रकारःचैलनिर्णेजकादयःस्वयंनाभावः॥किंविषयइत्यपेक्षायांकर्मणि
नि॥

शि॰प्र॰
२९

नैःस्वाध्यायस्तत्रदसाधारणस्यकर्मणोबुद्धिस्थत्वान्नैवदृष्टव्यः॥अतएवविष्णुः॥नराणांराजकर्मणिनि
युक्तानांव्रतिनःसत्रिणांसत्रेनैकारुणांकारुकर्मणिनिवृत्तिनियतविषयमेवाशौचाभावंदर्शयति॥शातात
पीयेप्युक्तं॥शिल्पकर्मकराशूद्रादासीदासीस्तथैवच॥स्नानेनशारीरसंस्कारोगृहकर्मण्यदूषिताइति॥एवं
वैदासादिशुद्धिरपरिहरणीयतयाप्राप्तस्यन्यविषयेऽनुसंधेयं॥अतएवस्मृत्यंतरं॥सद्यःशौचोगणि
दासोनकरोनगस्त्यहातत्स्युचिः॥तथाचिकित्सकोयत्कुरुतेतदन्येननशक्यते॥तस्माच्चिकित्सकःस्पर्शेशु

ऋत्विजांदीक्षितानांचयाज्ञिकंकर्मकुर्वतां॥
सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदांतथा॥३०॥

दानेनवतिनिमित्ताइति॥२९॥किंचऋत्विजामिति॥ऋत्विजोवरणान्मरणसंनताःकर्तुर्विशेषाःदीक्षणीयासं
स्कृताःदीक्षितास्तेषांयत्तिकंयज्ञेनवंचकर्मकुर्वतांसद्यःशौचंविधीयतइतिद्वितीयश्लोकेनान्वयः॥सर्वत्रानु
षंगः॥दीक्षितस्यवेतानोपासनाकार्याइत्यनेनसिद्धेप्यधिकारेपुनर्वचनं॥याजनेपुत्स्यकर्तृत्वविधाना
र्थंसद्यःस्नानंविशुद्ध्यर्थंच॥सत्रियद्ग्रहणेनसंततानुष्ठानतुल्यतयान्नसत्रप्रवृत्तानांसंततगुरूणां॥

मि॰ प्रा॰ तुसन्निरोगंतूष्णींस्थितयद्गृहेणोनैवसिद्धिः॥व्रतिनांचान्देनकृच्छ्रचान्द्रायणादिप्रवृत्ताःस्नातकव्रतप्रायश्चित्तप्रवृत्ता
३०
श्चोच्यंते॥तेषांब्रह्मचर्यादिव्रतयोगिनःश्राद्धकर्तुर्नोकुर्युर्न्यग्रहणं॥तथाचस्मृत्यंतरे॥नित्यमत्रप्रवृत्तस्यापि
कृच्छ्रचान्द्रायणादिषु॥प्रवृत्तेकृच्छ्रहोमादौब्राह्मणादिषुभोजने॥गृहीतनियमस्यापिनस्यादन्यस्यकस्यचि
त्॥निमंत्रितेषुविप्रेषुप्रारब्धेश्राद्धकर्मणि॥निमंत्रितस्यविप्रस्यस्वाध्यायादिरतस्यस्वाध्यायादिरतस्यच॥देहे
पितृषुतिष्ठत्सुनाशौचंविद्यतेक्वचित्॥प्रायश्चित्तप्रवृत्तानांदानव्रतनिवर्तिनांतथैति॥सत्रिणांव्रतिनांचसर्वेश

हामेविवाहेयज्ञेचसंग्रामेदेशविप्लवे॥

तेषांशुद्धिर्नकर्ममात्रेसंव्यवहारेच॥तथाविष्णुः॥नव्रतिनांव्रतेनसत्रिणांसत्रइतिब्रह्मचार्युपकुर्वाणकोनैष्ठि
कश्चयस्तुनिमंदातेवप्रतिग्रहीनसर्वेषानसोदान्नदोतीच्यते॥ब्रह्मविदुवतिः॥तेषांचत्रयाणामाश्रमिणां
सर्वत्रशुद्धिर्विज्ञेयाप्रमाणानांवात्॥दानेचपूर्वसंकल्पितद्रव्यस्यनाशौचं॥पूर्वसंकल्पितंद्रव्यंदीयमानंच शिव॰
दुष्यतीतिक्रतुस्मरणात्॥स्मृत्यंतरेचात्रविशेषउक्तः॥विवाहोत्सवयज्ञादिष्वंतरामृतसूतके॥शेषमन्नं॥ ३०

परैर्देयंदातृन्नतोक्तंश्वनस्पृश्योदिति॥यज्ञेहृषोत्सर्गादौ।विवाहेचपूर्वसंन्नतसंनारे॥तथाचस्मृत्यंतरे॥पूर्वे
संन्नतसंनारेविवाहेश्राद्धकर्मणीति॥सद्यःशौचमत्रप्रकृतं॥विवाहग्रहणंपूर्वप्रवृत्तचौलोपनयनादिसं
स्कारकर्मोपलक्षणं॥यत्तद्ग्रहणंचपूर्वप्रवृत्तदेवप्रतिष्ठारामाद्युत्सवमात्रोपलक्षणं॥तदेवप्रतिष्ठोत्सव
विवाहेषुनदेशविभ्रमेनायद्यपिचकाष्ठापामात्रौचमितिविष्णुस्मरणात्॥संग्रामेषुदेशग्रामसमुपो
देराजानंसंनाद्धयेदित्याश्वलायनायुक्तसंनहनविधौप्रस्थानिकशान्तिहोमादौचसद्यःशुद्धिः॥देशाम

स्वापद्यपिहिकाष्ठायांसद्यःशौचंविधीयते॥३॥ ॥

विष्णोर्वह्निनिरुपसर्गैराजनयाद्वाविप्लवेतदुपशमनार्थेशांतिकर्मणिसद्यःशौचं॥विप्लवानावेपिक
चिदेनाविशेषेणापेवीनस्मिनाशुद्धिरुक्ता॥विवाहदुर्गयज्ञेषुयात्रायांतीर्थकर्मणि॥नतत्रसूतकंतद्वत्क
र्त्तादिकारयेदिति॥तथाकाष्ठायामप्यापद्यापन्नेनवेनमुमूर्षावस्थायांदुरितशमनार्थदाने॥
तथासंकल्पितद्रव्येश्ववृत्तुमरिष्यंनमातापित्रादौबहुकुटुंबस्यन्हरणापद्योगिप्रतिग्रहेसद्यःशुद्धिः॥ ॥

मि० प्रा० इयं च शुद्धिर्यस्य सद्यःशौचं विनाप्युपपन्नमीनन न वसत्यश्वस्तनिकस्य न द्विषयात्र्येकाहपर्याप्तसंचितधन
३१ स्तस्यैकाहः ॥ यस्त्र्यहपर्याप्तसंचयी तस्य त्र्यहः ॥ यस्तु चतुर्हार्थमापादितद्रव्यः कुंभीधान्यः तस्य चतुरहः ॥
कुसूलधान्यकस्य दशाहः इत्येवं यस्य यावत्कालमात्मनानवसन्नस्तस्य तावत्कालमाशौचमापद्युपाधिकत्वादशा
शौचसंकोचस्य ॥ उक्तं च मनुना ॥ कुसूलधान्यको वा स्यात् ॥ कुंभीधान्यक एव वा ॥ त्र्यैहिको वापि भवेद
श्वस्तनिक एव चेत्येवं प्रतिपादितचतुर्विधगृहस्थानि प्रायेण ॥ दशाहं त्र्यहं वा माशौचं सपिंडेषु विधीयते ॥ अर्वा
क्संचयनादस्थ्नां त्र्यहमेकाहमेव वा इति विकल्पचतुष्टयं प्रतिपादितं ॥ अस्मोदकविषयाश्च संकुचिताशौचक
ल्पाः प्रतिलिपिकाहस्य सद्यःशौचरूपाः स्वसंतरद्रष्टाव न्निसंकोचोपाधिकनयैव योज्याः ॥ अथ चाशौचसंको
चो येनैव प्रतिग्रहादिना विनानहंन्निसस्तद्विषयो न सर्वत्रेत्यवगंतव्यं ॥ ननु एकाहाद्याभ्यामाः शुद्धेरयोः श्रिवेद
समासिवित ॥ अत्र हाकेवलवेदस्तुविहीनो दशानिर्दिनैरित्यादिस्मृत्यंतरवचनपर्यालोचनपाध्ययनत्वाना
नुष्ठानयोगिनां ॥ एकाहादिनिः सर्वात्मिनाशुद्धिरित्येवं कस्मान्नुच्यते ॥ उच्यते दशाहं त्र्यहं वा माशौचमिति सा त्रिव०
मान्यशास्त्रादशाहबाधपुरःसरमेव यैकाहानवस्त्रात् शुद्धेरिमादिविधायकं न भवति ॥ बाधस्य चानुपपत्ति ३१
निबंधनत्वाद्बाधान्यथाबाधितेऽनुपपत्तिप्रमाणमानं भवति तावत् बाधनीयं ॥ अतः किं यदनेन बाध्यं ॥ ॥

मित्यपेक्षायामपेक्षितविरोधसमर्थत्वात्तस्याग्निवेदसमन्वितइतिवाक्यत्रोधस्पर्शनादयिवेदविषये
ऽग्निहोत्रादिकर्मणि स्वाध्याये चव्यवतिष्ठते ॥ न पुनर्दानादावपि ॥ एवं चाग्निवेदपदयोः कार्यान्वयित्वेन
वनि ॥ उत्तरथा येनाग्निवेदसाध्यं कर्मकृतं तस्यैकाहान्मशुद्धिरिति पुरुषविशेषोपलक्षणत्वमेव स्यात्तच्चे
न युक्तं ॥ एवं च सपिंडतिपसु हेवाग्निशुक्रियाः वैतानौपासना कार्याः क्रियाश्च श्रुतिचोदिताः ॥ तथाऽऽब्राह्मणस्य
स्वाध्यायानिवृत्त्यर्थं सद्यःशौचमित्येवमादिभिर्मन्वादिवचनैरेकवाक्यता भवति ॥ तथोक्तयचदशाहानिकु
लस्यान्नमुन्मतरनिदशाहपर्यंतं नो जनादिकं प्रतिषेधयद्भिर्यमादिवचनैरविरोधोऽपि सिध्यति ततः क्वाचित्कमे
वेदमाशौचसंकोचविधानं ॥ न पुनः सर्वसंव्यवहारादिगोचरमिसर्ज्जमिति प्रपंचेन ॥ इदं च स्वाध्यायविषये स
द्यःशौचविधानं ब्रह्मवेदस्य ब्रह्मोज्झनकृत्यायमात्रौ द्रष्टव्यं ॥ इतरस्य तु दाने प्रतिग्रहे होमे स्वाध्याये च निवृत्ते
त इति प्रतिषेध एव ॥ एवं ब्राह्मणादिमध्येयस्य यावत्कालमाशौचमुक्तं स तस्मान्नेनरस्नातः शुध्येत्तत्काला
तिक्रममात्रात् ॥ यथाह मनुः ॥ विप्रः शुध्यत्यपः स्पृष्ट्वा क्षत्रियो वाहनायुधं ॥ वैश्यः प्रतोदरश्मीन्वा यष्टिं
शूद्रः कृतक्रियः इति ॥ अस्यार्थः ॥ कृतक्रियः इति प्रत्येकमभिसंबध्यते ॥ विप्रोऽनुवृत्ताशौचकालः कृतक्रियः कृ
तस्नानो हस्तेनापः स्पृष्ट्वा शुध्यति ॥ स्पृष्टेतिस्पर्शनक्रियेयाचाते न स्नानमात्र मंग्या वाहनादिषु नैषानुषा
सत्वात्त्राय ॥ ॥

मि०प्रा० ३२ वाक्तन क्रियो यावद्दशौचं कृतोदकादिक्रियस्तदनंतरं विप्रादिरुदकादि स्पृष्ट्वा शुध्यतीति॥ आशौच — नं
तरस्नाविस्नानप्रतिनिधित्वेनोक्तमतेइति॥ ज्ञात्रिपादिर्वाइनादिकं स्पृष्ट्वा शुध्येदिति॥ ३१॥ कुलव्यापिनीं शुद्धि
मनिधायेदानीं प्रसंगात् प्रतिपुरुषव्यापिनीं शुद्धिमाह॥ उदक्येति॥ उदक्या रजस्वला। अशुचयः शावचां
डालपतितसूतिकाः॥ नावाशौचिनश्च॥ एते संस्पृष्टः स्नायात्॥ पुनरुदक्यास्तु विसंस्पृष्टादिभिः संस्पृष्टस्
स्पृष्टो दाचामेदाचम्य अपलिंगान्यापो हिष्ठेत्येवमादीनि त्रीणि मंत्रवाक्यानि जपेत्॥ त्रिषेवहुवचनस्य

उदक्याशुचिभिः स्नायात्संस्पृष्टस्तैरुपस्पृशेत्॥
अब्लिंगानि जपेच्चैव गायत्रीं मनसा सकृत्॥ ३२॥

चरितार्थत्वात्॥ तथा गायत्रीं च सकृन्मनसा जपेत्॥ नन्वदक्यादिसंस्पृष्टः स्नायादित्येकवचननिर्दिष्टस्य
कथं तैरिति बहुवचनेन परामर्शः॥ सत्यं एवं किंतु उदक्यादिसंस्पृष्टव्यतिरिक्तस्नानार्हमात्रस्य सर्वो
पाचमनविधानार्थं तैरिति बहुवचननिर्देशाददोषः॥ तेच स्नानार्हाः स्मृत्यंतरे दर्शिताः॥ तथा च परा
शरः॥ दुःस्वप्ने मैथुने वांते विरिक्ते क्षुरकर्मणि॥ चितियूपश्मशानास्थ्नां स्पर्शने स्नानमाचरेदिति॥ मि० ३२

तथा च मनुः॥ वांते विरिक्तः स्नात्वा तु घृतप्राशनमाचरेत्॥ आचामेदेव भुक्त्वान्नं स्नानं मैथुनिनः स्मृतमि
ति॥ मैथुनिनः स्नानमृतुकालविषयं॥ अन्यदा तु पराशरः॥ छेदने शौचं मूत्रपुरीषवदिति हारीतस्मर
णात्॥ आनृतावपि कालविशेषे स्मृत्यंतरे स्नानमुक्तं॥ अष्टम्यां च चतुर्दश्यां दिवापर्वणि मैथुनं॥ कृ
त्वा सचैलं स्नात्वा तु वारुणीभिश्च मार्जयेदिति॥ यथाह यमः॥ अजीर्णेऽभ्युदिते वांते तथाप्यस्तमिते रवौ॥
दुःस्वप्ने दुर्जनस्पर्शे स्नानमात्रं विधीयते इति॥ यथाह बृहस्पतिः॥ मैथुने कटधूमे च सद्यः स्नानं विधीयत
इत्येतदसचैलस्नानविषयं॥ सचैलं नतु चिताधिस्पर्शे सचैलमेव स्नानं॥ यथाह च [illegible]॥ श्वानं श्वपाकं
प्रेतधूमं देवद्रव्योपजीविनं॥ ग्रामयाजकं सोमविक्रयिणं यूपं चितिं चितिकाष्ठं मद्यं मद्यभांडं॥ सस्नेहमा
नुषास्थि शवस्पृष्टं रजस्वलां महापातकिनं शवं स्पृष्ट्वा सचैलमंभोऽवगाह्य उत्तीर्याग्निमुपस्पृश्य गायत्र्य
ष्टशतं जपेत्॥ घृतं प्राश्य पुनः स्नात्वा त्रिराचामेदिति॥ एतच्च बुद्धिपूर्वविषयमेतत्स्नानमात्रं॥ यथाह स्म
दिवाकीर्तिं चितिं यूपं रजस्वलां॥ स्पृष्ट्वा त्वकामतो विप्रः स्नानं कृत्वा विशुध्यतीति हारीतस्मरणात्॥ ए
वमन्यत्रापि वक्ष्यमाणेषु विषयसमीकरणमूहनीयं॥ तथाह कश्यपः॥ उदक्यास्पृष्टयोः संदिग्धादि
हि संदेहे कर्णाक्रोशरावे चिमारोहणे यूपस्पर्शने एवं चेत् स्नात्वा पुनर्मार्जनं जपेन्महाव्याहृतिभिः सहस्रामा
हुतं॥

र्जुहुयादिति॥ तथा च स्मृत्यंतरे॥ चितिं च चितिकाष्ठं च यूपं चंडालमेव च॥ स्पृष्ट्वा देवलकं चैव सवासा जलमा
विशेत्॥ देवार्चनपरो विप्रो वित्तार्थी वत्सरत्रयं॥ असौ देवलको नाम हव्यकव्येषु गर्हितः॥ तथा ब्रह्माण्डपुरा
णे॥ शैवान् पाशुपतान् स्पृष्ट्वा लोकायतिकनास्तिकान्॥ विकर्मस्थान् द्विजान् शूद्रान् सवासा जलमा
विशेदिति॥ तथाऽस्पर्श्यास्पृष्टावाह हारीतः॥ साम्यात्स्पृष्टसंपर्के हि पिनः॥ इति लिंगाच्च शूद्रस्पर्शनिषेधः॥ तथां
गिराः॥ यस्तु छायां श्वपाकस्य ब्राह्मणो ह्यधिरोहति॥ तत्र स्नानं प्रकुर्वीत घृतं प्राश्य विशुध्यतीति॥ तथा व्या
घ्रपदः॥ चंडालं पतितं चैव दूरतः परिवर्जयेत्॥ गोवालव्यजनादर्वाक् सवासा जलमाविशेत्॥ एतदतिसंकट
स्थानविषयमन्यत्र परिवर्जयेच्चतुर्हस्तमिति नोक्तं॥ युगं च द्वियुगं चैव त्रियुगं च चतुर्युगं॥ चंडालसूतिकोदक्या
पतितानामधः क्रमादिति॥ तथा पैठीनसिः॥ काकोलूकस्पर्शने सचैलं स्नानमनुदकमूत्रपुरुषकरणे स
चैलस्नानं॥ महाव्याहृतिहोमश्चेति॥ अनुदकमूत्रपुरुषकरणमित्येतच्चिरकालमूत्रपुरीषशौचाकरणपरं॥ नि॰
तथांगिराः॥ नासवायसमार्जारखरोष्ट्रं च श्वशूकरान्॥ अमेध्यानि च संस्पृश्य सचैलो दकमाविशेदि
ति॥ मार्जारस्पर्शनिमित्तं स्नानमुच्छिष्टसमये अनुष्ठानसमये चेति वदितव्यं॥ समाचारात्॥ अन्यदा तु मार्जारश्च
दर्वी च मारुतश्च सदा शुचिरिति स्नानाभावः॥ अस्पर्श्ये तु स्नानं नाभेरूर्ध्वं विदितव्यं॥ अधस्तात्तु क्षालनमेव॥

नाभेरूर्ध्वं करौ मुक्त्वा यदंगमुपहन्यते॥ तत्र स्नानमधस्तात्तु क्षालनाचमनेन शुध्यतीति नैवोक्तत्वात्॥ तथापद्धि
स्पर्शे विशेषो जातूकर्ण्येनोक्तः॥ ऊर्ध्वं नाभेः करौ मुक्त्वा यदंगं संस्पृशेत्तदा॥ स्नानं तत्र प्रकुर्वीत शेषं प्रक्षा
ल्य शुध्यतीति॥ अमेध्यस्पर्शेऽपि विष्णुना विशेषो दर्शितः॥ नाभेरधस्तात् बाहुषु च कायिकैर्मलैः सुरानिर्म
ल्यैर्वोपहतो मृत्तोयैस्तदंगं प्रक्षाल्याचांतः शुध्येदन्यत्रोपहतो मृत्तोयैस्तदंगं प्रक्षाल्य स्नायात्तैरिंद्रियेषूपहतस्तू
पोष्य स्नात्वा पंचगव्येन दंतानाच्छेदोपहतश्चेति॥ एतच्च परकीयामेध्यस्पर्शविषयं॥ आत्मीयमलस्पर्शने
तु ऊर्ध्वमपि नाभेः प्रक्षालनमेवाह देवलः॥ मानुषास्थि वसां विष्ठामार्तवं मूत्ररेतसी॥ मज्जानं शोणितं वापि
परस्य यदि संस्पृशेत्॥ स्नात्वा प्रमृज्य लेपादीनाचम्य च शुचिर्भवेत्॥ तान्येव स्वानि संस्पृश्य पूतः स्यात्परिमार्ज
नात्॥ तथा शंखः॥ रथ्याकर्दमतोयेन ष्ठीवनाद्येन वा तथा॥ नाभेरूर्ध्वं नरः स्पृष्टः सद्यः स्नानेन शुध्यतीति॥ यमे
नापि विशेष उक्तः॥ संकर्दमं तु वर्षासु प्रविश्य ग्रामसंकरं॥ जंघयोर्मृत्तिकास्तिस्रः पादयोर्द्विगुणास्तत इति
॥ ग्रामसंकरं रथ्यामसलिलप्रवाहप्रदेशे संकर्दमं प्रविशतीति॥ मारुतेन शोषिते तु कर्दमादौ न दोषः॥ रथ्याकर्द
मतोयानि स्पृष्टान्यंत्यश्ववायसैः॥ मारुतेनैव शुध्यंति पक्वचितानि चेति प्रागुक्तत्वात्॥ अस्थनि मनुना विशेष
उक्तः॥ नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रो विशुध्यतीति॥ आचम्यैव तु निःस्नेहं गां स्पृष्ट्वा वीक्ष्य वा रविमिति॥

मि०प्रा० ३४

इदं द्विजात्यस्थिविषयं॥ अनत्र्वमस्थिप्रोक्तं॥ मानुषास्थि स्निग्धं स्पृष्ट्वा त्रिरात्रमाशौचमस्निग्धे त्वहोरात्रमि
तिश्च मानुषे तु विस्पृष्टं॥ नखावर्जं पञ्चनखास्थ्यवं तदस्थि च मस्नानः पूर्ववत्स्नं प्रक्षालितं विन्द्यादित्येवमन्येऽपि
स्नानार्हाः स्मृत्यंतरतोऽवबोधव्याः॥ एवं स्नानार्हाणां बहुत्वान्न दनिष्ठायं नैरिनि बहुवचनमविरुद्धं॥ उदक्या
शुचिभिः स्नायादित्येतच्चंडालादेश्चेतनस्य व्यवधानस्पर्शे वेदितव्यं॥ चेतनव्यवधाने तु मानवः॥ देवाकीर्त्तिमुद
क्यां च पतितं सूतिकां तथा॥ शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुध्यतीति॥ तृतीयस्य त्वाचमनमेव तत्स्पृष्टिनं
स्पृशेद्यस्तु स्नानं तस्य विधीयते॥ ऊर्ध्वमाचमनं प्रोक्तं द्रव्याणां प्रोक्षणं तथेति॥ संवर्त्तस्मरणात्॥ एतच्चा
बुद्धिपूर्वकविषयं मतिपूर्वे तु तृतीयस्यापि स्नानमेव॥ यथाह गौतमः॥ पतितचंडालसूतिकोदक्याश
वस्पृष्टं तत्स्पृष्ट्युपस्पर्शने सचेल उदकोपस्पर्शनाच्छुध्येदिति॥ चतुर्थस्य त्वाचमनं॥ उपस्पृश्याशुचिस्पृष्टं
तृतीयं वापि मानवः॥ हस्तौ पादौ च तोयेन प्रक्षाल्याचम्य शुध्यतीति देवलस्मरणात्॥ यत्तु अशुचिना पुनरु
दक्यादिस्पर्शे देवलेन विशेष उक्तः॥ श्वपाकं पतितं व्यंगमुन्मत्तं शवहारकं॥ सूतिकां साविकां नारीं रजसा प्रा० ३४
पि परिप्लुतां॥ श्वकुक्कुटवराहांश्च ग्राम्यान्संस्पृश्य मानवः॥ सचेलः सशिरः स्नात्वा तदानीमेव शुध्यतीति॥ शु
द्रान्नस्य पयसापि तान्न शुद्धास्तु परिस्पृष्ट्वोक्त॥ विशुध्यत्युपवासेन तथा कृच्छ्रेण वा पुनः इति॥ साविका रथि
त्री॥ कृच्छ्रः श्वपाकादिविषयः श्वादिस्पृष्टुपवासस्तत्स्पृष्टविषयस्त्वा॥ ३२॥ ॥

अधुना कालशुद्धौ दृष्टान्तत्वेन द्रव्यशुद्धिप्रकरणोक्तान्स्मारयति तत्प्रकरणे वक्ष्यमाणान्यपि शुद्धिहेतूननुक्राम
ति॥ काल इति॥ यथा माद्यो ऽमी सर्वे स्वविषये शुद्धिहेतवः॥ यथा कालो दशरात्रादिकः॥ अग्निरग्न्युत्ताप
शुद्धिहेतुत्वं सा॥ अग्निस्तावच्छुद्धिहेतुर्यथाश्नन्स्यथापि॥ पुनःपाकान्महीमयमिति कर्म च शुद्धिनिमित्तं य
यावत्संति॥ तथाश्वमेधावभृतस्नायादिति तदा मृदपि शुद्धिकरणं यथा कथितं॥ सलिलं भस्म मृद्वापि
प्रक्षेप्तव्यं विशुद्धये इति॥ वायुरपि शुद्धिहेतुः॥ यथोदीरितं॥ मारुतेनैव शुध्यंतीति॥ मनोऽपि वाचः शुद्धिसाधनं

कालोऽग्निः कर्म मृद्वायुर्मनो ज्ञानं तपो जलं॥
पश्चात्तापो निराहारः सर्वेऽमी शुद्धिहेतवः॥३३॥

यथा समाचारयेन्मनसा वाचापि नावगन्तेत्यादि ज्ञानं चाध्यात्मिकं॥ बुद्धिर्ज्ञानेन शुध्यतीति॥
क्षेत्रज्ञस्येश्वरज्ञानादिति॥ तपश्च कृच्छ्रादि यथा वह्नि॥ प्राजापत्यं चरेत्कृच्छ्रं समां वा गुरुतल्पगः इत्यादि॥ ज
लमपि शारीरादेः यथा जलेनेति वचनाज्जलमिति॥ पश्चात्तापोऽपि शुद्धिजनकः॥ यथा गदितं॥ स्वापन
नानुतापेनेति॥ निराहारोऽपि शुद्ध्यापादानं॥ यथाह वसिष्ठः॥ त्रिरात्रोपोषितो जप्त्वेत्यादि॥ ३३॥

मि०प्रा० २५

केव॥ अकार्यकारिणामिति॥ अकार्यकारिणां निषिद्धसेविनां दानमेव मुख्यं शुद्धिकारणं यथाश्वमास्पति॥
॥वेधनेपर्याप्तं दत्त्वेति॥ नद्या निदाघादौ अल्पतोयतया अमेध्योपहततीरयोः कूलंकषवेगो बुध्नवाहोऽम्
शुद्धिकृत्॥ शोधनीयस्य द्रव्यस्य मृच्च तोयं च शुद्धिकृत्॥ यथेहननानि॥ अमेध्याक्तस्य मृत्तोयैः शुद्धिर्ग
धापकर्षणादिति॥ संन्यासः प्रव्रज्या द्विजन्मनां मानसापचारे शुद्धिकृत्॥ तपो वेदाभ्यासो वेदविदां शुद्धि

अकार्यकारिणां दानं वेगो नद्यास्तु शुद्धिकृत्॥ शोध्यस्य मृच्च तोयं च संन्यासो वै द्विजन्मनां
॥३४॥ तपो वेदविदां क्षान्तिर्विदुषां वर्ष्मणो जलं॥ जपः प्रच्छन्नपापानां मनसः सत्यमुच्यते॥३५॥

कारणं॥ कृच्छ्रादि तु सर्वसाधारणं न वेदविदामेव क्षान्तिरुपशमो विदुषां वेदार्थविदां॥ वर्ष्मणः शरी मि०प्रा० २५
रस्य जलं प्रच्छन्नपापानां अविख्यातदोषाणां अघमर्षणादिसूक्तजपः शुद्धिकारणं शुद्धिसाधनं॥
मनः सदसत्संकल्पात्मकं तस्यासत्संकल्पादशुद्धस्य सत्संसाधुसंकल्पः शोधकं॥३४॥३५॥ ॥

भूतशब्देन तद्विकारभूतादेहेन्द्रियसंघाता उच्यन्ते॥ तत्र स्थूलोऽहं कृशोऽहं काणोऽहं बधिरोऽहमित्येवं तदभि
मानित्वेन योयमात्मावर्त्तते स भूतात्मा॥ तस्य तपोविद्ये शुद्धिनिमित्ते॥ तपःशब्देनानेकजन्मस्वेकस्मिन्नपि
जन्मनि जाग्रत्स्वप्नसुषुप्त्यवस्थासु आत्मनो योयमन्वयः शरीरादेश्च व्यतिरेकः सानीधीयते॥ यथातप
सात्रसूजितास्सितिपंचकोशव्यतिरेकप्रतिपादनपरवाक्यो विद्याशब्देन चौपनिषदमस्थूलमनण्वह्र

भूतात्मनस्तपोविद्ये बुद्धेर्ज्ञानं विशोधनं॥ क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मता॥३६॥

त्वमसंगो ह्ययमात्मेत्यादित्वंपदार्थनिरूपणविषयवाक्यजन्यं ज्ञानमुच्यते॥ एतासामपि शुद्धिः शारीराद्वि
कातिरेकबुद्धेः संशयविपर्ययरूपत्वेनाशुद्धायाः प्रमाणरूपं ज्ञानं विशोधनं॥ क्षेत्रज्ञस्य तपोविद्याविशुद्धस्य
त्वंपदार्थभूतस्य तत्त्वमस्यादिवाक्यजन्यसाक्षात्काररूपादीश्वरज्ञानात् परमा विशुद्धिर्मुक्तिलक्षणा॥ यथैता
शुद्धयः परमपुरुषार्थसिद्ध्युपयुक्ततरा कालशुद्धिरपि सैवं प्रसंगासार्थं भूतात्मादिविशुद्धिविधानं॥३६॥ इत्य
शौचप्रकरणं॥ ॥

आपद्यपि च कष्टायां सद्यः शौचं विधीयत इत्यापद्विशुद्ध्या शौचकल्पानुष्ठानासंभवेन सद्यः शौचाद्यनुकल्प
मुक्के दीक्षितस्य संगृहाय दि प्रतिग्रहोऽधिको विप्रे याजनाध्यापनेतयोलाघुक्त्याजनादिमुख्यवृत्त्यसंभवे
नवृत्त्यंतरमाह ॥ क्षात्रेणेति ॥ द्विजो विप्रो बहुकुटुंबतया स्ववृत्त्या जीवितुमसमर्थः ॥ तदा क्षात्रेण क्षत्रसं
बंधिना कर्मणा शस्त्रग्रहणादिना आपदि जीवेत् ॥ तेनापि जीवितुमशक्तश्चेद्वैश्यसंबंधिना कर्मणा वाणि

क्षात्रेण कर्मणा जीवेद्विशां वाप्यापदि द्विजः ॥ १ ॥

ज्यादिना जीवेत् न तु शूद्रवृत्त्या ॥ तथा च मनुः ॥ उभाभ्यामप्यजीवंस्तु कथं स्यादिति चेद्भवेत् ॥ कृषिगोरक्षमा
स्थाय जीवेद्वैश्यस्य जीविकामिति ॥ तथा आपद्यपि न हीनवर्णेन ब्राह्मणी क्षत्रीराज्ञ्यपणीया ॥ किं तु ब्राह्म
णो न क्षात्री क्षत्रियेण वैश्यसंबंधिनी वैश्येन च शूद्री ले वस्त्रीं नंतरहीनवर्णवृत्तिरेव ॥ अजीवंतः स्वधर्मेण
नंतरं मज्जीयसिवृत्तिमातिष्ठेरन्न तु कदाचिज्ज्यायसीमिति विसिष्ठस्मरणात् ॥ ज्यायसीं च ब्राह्मणीवृत्तिः ॥

मतां वृत्तिमातिष्ठेरन् ॥ तथा च स्मृत्यंतरं ॥ उत्कृष्टं वापकृष्टं वा तयोः कर्म न विद्यते ॥ मध्यमे कर्मणी हित्वा सर्वसा
धारणे हिते इति ॥ शूद्रस्योत्कृष्टं ब्राह्मणं कर्म न विद्यते ॥ तथा ब्राह्मणस्यापकृष्टं शौद्रं कर्म मध्यमे ॥ क्षत्रवै
श्यकर्मणी पुनरापद्गतसर्ववर्णसाधारणे ॥ शूद्रश्चापद्गतो वैश्यवृत्त्या शिल्पैर्वा जीवेत् ॥ क्षतस्य द्विजशुश्रू
षा तया जीवन्न वणिग्भवेत् ॥ शिल्पैर्वा विविधैर्जीवेद्विजातिहितमाचरन्निति प्रागुक्तत्वात् ॥ मनुना चा
त्र विशेषो दर्शितः ॥ यैः कर्मभिः प्रचरितैः शुश्रूष्यंते द्विजातयः ॥ तानि कारुकर्माणि शिल्पानि विविधा

निस्तीर्य तामथात्मानं पावयित्वा न्यसेत्पथि ॥ २ ॥

नि चेति ॥ अनेनैव न्यायेनानुलोमोत्पन्नानामपि स्वानंतरा वृत्तिर्ग्रहणीया ॥ एवं स्वानंतरहीनवर्णवृ
त्त्या आपदं निस्तीर्य प्रायश्चित्ताचरणेनात्मानं पावयित्वा पथि न्यसेत् ॥ स्ववृत्त्या चात्मानं स्थापयेदित्य
र्थः ॥ पथ्यायमर्थः ॥ गर्हितवृत्त्यार्जितं धनं पथि न्यसेदुत्सृजेदिति ॥ तथा च मनुः ॥ जपहोमैरपैत्येनो
याजनाध्यापनैः कृतं ॥ प्रतिग्रहनिमित्तं तु त्यागेन तपसैव चेति ॥ २ ॥ ॥

मि० प्रा० ३७ वैश्यवृत्त्याजीवतो ब्राह्मणस्य पदार्थप्रणीनीयं तदाह फलेत्यादि। नो विक्रीणीतेति प्रत्येकमभिसंबध्यते। फ
लानि कदलीफलानि बदरेङ्गुदव्यतिरिक्तानि। यथाह नारदः। स्वयंशीर्णानि पर्णानि फलानां बदरेङ्गुदे। र
ज्जुः कार्पासिकं सूत्रं तच्चेदविकृतं भवेदिति। उपलं माणिक्याद्यश्ममात्रं। क्षौमं अतसीसूत्रमयं वस्त्रं। क्षौमग्र
हणं तान्तवानामुपलक्षणम्। यथाह मनुः। सर्वं च तान्तवं रक्तं शाणक्षौमाविकानि च। अपि चेत्स्युररक्तानि फल

फलोपलक्षौमसोममनुष्यापूपवीरुधः। तिलौदनरसक्षारान्
दधि क्षीरं घृतं जलं॥३॥ शस्त्रासवमधूच्छिष्टं मधु लाक्षा च बर्हिषः॥

मूले तथौषधीरिति। सोमो लताविशेषः। मनुष्यपदेन विशेषतः स्त्रीपुंनपुंसकानां ग्रहणं। अपूपं मण्ड
कादि भक्ष्यमात्रं। वीरुधो वल्ल्यः प्रतानवत्यो लताः। तिलाः प्रसिद्धाः। ओदनग्रहणं भोज्यमात्रोपलक्षणं। रसा गुडेक्षु
रसादयः शर्करादयः। तथा च मनुः। क्षीरं क्षौमं दधि घृतं तैलं मधु गुडं कुशानिति। क्षीरग्रहणं यथाह मनुः। क्षीरं क्षौ
मं दधि घृतं तैलं मधु गुडं कुशानिति। क्षाराः यवक्षारादयः। दधिक्षीरयोर्ग्रहणं मस्तुपिण्डकिलाटादिकविकाराणा
मुपलक्षणार्थं। क्षीरं सविकारमिति गौतमस्मरणात्। घृतग्रहणं तैलादिस्नेहमात्रोपलक्षणं। जलं
प्रसिद्धं॥३॥ शिव० ३७

शस्त्रेति। शस्त्रं खड्गादि। आसवग्रहणं मद्यमात्रोपलक्षणं। मधूच्छिष्टं सिक्थकं। मधु क्षौद्रं। लाक्षा जतुः। बर्हि
ष्कुशाः प्रसिद्धाः। चर्माजिनं। पुष्पं प्रसिद्धं। अविलोमकृतः कंबलः कुतपः। केशाश्चमर्यादिसंबंधाः। तक्रमुद
श्वित्। विषं शृङ्ग्यादि। क्षितिर्भूमिः। नित्यं भूमिव्रीहियवाजाव्यश्वर्षभधेन्वनडुहश्चैक इति गौतमस्मरणात्॥३॥
कौशेयमिति। कोशोद्भवं कौशेयं वासः। नीली नीलीरसः। लवणग्रहणेन विडसौवर्चलसैंधवसामुद्रकृत्रिम
कृत्रिमादिविशेषेण गृह्यंते। मांसं प्रसिद्धं। एकशफा हयादयः। सीसग्रहणं लोहमात्रोपलक्षणं। शाकं सर्व

मृच्चर्मपुष्पकुतपकेशतक्रविषक्षितीः॥३॥ कौशेयनीलीलवणमांसैकशफसीसकान्। शाकार्द्रौषधि
पिण्याकपशुगन्धांस्तथैव च॥४॥ वैश्यवृत्त्यापि जीवन्नो विक्रीणीत कदाचन॥५॥ मविशेषात्। ओषधयः फलपा

कान्ताः। आर्द्रौषधय इति विशेषोपादानात् शुष्केषु न दोषः। पिण्याकः प्रसिद्धः। पशवश्चारण्याः। आरण्यां
श्च पशून् सर्वान् दंष्ट्रिणश्च वयांसि चेति मनुस्मरणात्। गन्धाश्चंदनागुरुकस्तूर्यादयः। सर्वानेतान् वैश्यवृत्त्या
जीवन् ब्राह्मणः कदाचिदपि न विक्रीणीत। क्षत्रियादेस्तु न दोषः। अत एव नारदेन। वैश्यवृत्तावविक्रेयं ब्रा
ह्मणस्य पयो दधीति ब्राह्मणग्रहणं कृतं॥४॥५॥ ॥

मि० प्रा०
३८

त्वतिलरसवमाह॥ धर्मार्थमिति॥ यदि त्वावश्यकं पाकयज्ञादिधर्मः स्वसाधनव्रीह्यादिधान्याभावेन निःपद्यते तर्हि धान्येन तिला विक्रयणीयाः॥ तत्समाः द्रोणपरिमितं द्रोणपरिमितेनेत्येवं तेन धान्येन तत्समाः॥ तथा च मनुः॥ काममुत्पाद्य कृष्यां तु स्वयमेव कृषीवलः॥ विक्रीणीत तिलान् शुद्धान् धर्मार्थमचिरस्थितानिति॥ धर्मग्रहणमावश्यकभेषजादिकपलक्षणं॥ अत एव नारदः॥ अन्नार्थो भैषजस्यार्थे यज्ञहेतोस्तथैव च॥ यद्यवश्यं तु विक्रेयास्तिला धान्येन तत्समा इति॥ यद्यन्यथा विक्रीणीते तदा दोषः॥ भोजनाभ्यंजनाद्दानाद्यदन्य

धर्मार्थं विक्रयं नेयास्तिला धान्येन तत्समाः॥५॥

त्कुरुते तिलैः॥ कृमिर्भूत्वा श्वविष्ठायां पितृभिः सह मज्जतीति मनुस्मरणात्॥ सजातीयेषु न विनिमयो न रसैर्वा॥ रसा रसैर्निमातव्या न त्वेव लवणं रसैः॥ कृतान्नं चाकृतान्नेन तिला धान्येन तत्समा इति॥ कृतान्नं सिद्धान्नं तच्चाकृतान्नेन परिवर्तनीयं॥ कृतान्नं चाकृतान्नेनेति तु पाठे सिद्धमन्नमकृतान्नेन तंडुलादिना परिवर्तनीयमिति यावत्॥५॥

शिव०
३८

पूर्वोक्तनिषेधातिक्रमे दोषमाह॥ लाक्षेति॥ लाक्षालवणमांसानि विक्रीयमाणानि सद्यः पतनीयानि द्विजातिकर्महानिकराणि पयःप्रभृतीनि तु हीनवर्णकराणि शूद्रतुल्यतापादनानि॥ एतच्चातिरिक्ताः पण्यविक्रये वैश्यतुल्यता॥ यथाह मनुः॥ सद्यः पतति मांसेन लाक्षया लवणेन च॥ त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयात्॥ इतरेषामपण्यानां विक्रयादिह कामतः॥ ब्राह्मणः सप्तरात्रेण वैश्यभावं नियच्छतीति॥ इ किंचाश्रापहनेति॥ यस्त्वधनो व्यसनं बहुकुटुंबतया आपद्गतोपि क्षत्रियवृत्तिं वैश्यवृत्तिं वा न प्रविविक्षति॥

लाक्षालवणमांसानि पतनीयानि विक्रये॥ पयो दधि च मद्यं च हीनवर्णकराणि तु॥६॥
आपद्गतः संप्रगृह्णन् भुंजानो वा यतस्ततः॥ न लिप्येतैनसा विप्रो ज्वलनार्कसमो हि सः॥७॥

स यतस्ततो हीनाद्धीनतराद्धीनतमेभ्यः प्रतिगृह्णन् तदन्नं भुंजानो वा नैतेनसा पापेन लिप्यते॥ यतस्तस्यामापदवस्थायां प्रतिग्रहीतृत्वादधिकारित्वेन ज्वलनार्कसमो यथा ज्वलनोऽर्कश्च हीनसंकरेपि न दुष्यतः॥ तथापद्गतो न दुष्यतीत्येतावता तात्पर्यं॥ एवं च वदतापद्गतस्य परधर्मानुष्ठानाद्धीनग्रहणमपि धर्मानुष्ठानमेव मुख्यमिति दर्शितं भवति॥ यथाह मनुः॥ वरं स्वधर्मो विगुणो न पारक्यः स्वनुष्ठितः॥ परधर्माश्रयाद्धि सद्यः पतति जातितः इति॥७॥ ॥

मि० प्रा० ३९

प्रतिपिध

किंचकृषिरिति॥ आपत्तौ जीवनानीति विप्रो षणां पादानां कृष्यादीनां मध्ये कृतापि पदस्थायां स्यादिति॥
तस्य साह्वपि निरन्नेनानुज्ञायते॥ यथापदि वैश्यवृत्तिः स्वयंकृता कृषिर्विप्रक्षत्रिययोरनुज्ञायते॥
एवं शिल्पादीन्यप्यनुज्ञायते॥ शिल्पं सूपकरणादि॥ भृतिः प्रेष्यत्वं॥ विद्यान्तकाध्यायकाद्याः॥ कुसीदं
वृद्ध्यर्थं द्रव्यप्रयोगस्तत्स्वयंकृतमप्यनुज्ञायते॥ शाकटं भाटकेन धान्यादिवहनद्वारेण जीवनहेतुः॥ गिरि

कृषिः शिल्पं भृतिर्विद्या कुसीदं शाकटं गिरिः॥
सेवानूपं नृपो भैक्ष्यमापत्तौ जीवनानि तु॥४२॥

नृतृणेन्धनधारेण जीवनं॥ सेवा परचित्तानुवर्त्तनं॥ अनूपं प्रचुरतृणह्रदजलप्रायः प्रदेशः॥ न
यान्नृपयाचनं॥ भैक्ष्यं यातकस्यापि॥ एतान्यापत्तौ जीवनानि॥ तथा च मनुः॥ विद्या शिल्पं भृतिः सेवा गोरक्ष्यं
विपणिः कृषिः गिरिर्भैक्ष्यं कुसीदं च दश जीवनहेतवः इति॥ यद्यपि कृष्यादीनामपि जीवनहेतुत्वं नाम संभवस्त
थाप्ययं जीवनमित्यत्राह॥४२॥ ॥

शिव० ३९

बुभुक्षितस्तीति॥ धान्याभावेन त्रिरात्रं बुभुक्षितो (नुअनस्थित्वा अब्राह्मणात् तुष्टक्षात्रदनावैश्यात्तदभावेक्षत्रि
याद्धीनकर्मणः कादपर्याप्तं धान्यं हरेत्॥ यथाह मनुः॥ तथैव सप्तमे भक्ते भक्तानि षडनश्नता॥ अश्वस्तनवि
धानेन हर्तव्यं हीनकर्मणः इति॥ तथा प्रतिगृह्य वृत्तं च यत्पृष्टं तद्धर्मतो यथाह तन्माख्येयं॥ यदि नास्ति केनस्वा
मिना पृष्टे किमर्थं पहृतमित्यभियुक्तेन॥ यथाह मनुः॥ खलात्क्षेत्रादगाराद्वा यतो वाप्युपलभ्यते॥ आख्
यातव्यं तु तत्तस्मै पृच्छते यदि पृच्छतीति॥४३॥ इदमपरमापद्धर्मप्रसंगाद्राज्ञो विधीयते॥ तस्य वृत्तं कुलं शी

प्रतिगृह्य तदाख्येयमभियुक्तेन धर्मतः॥४३॥

बुभुक्षितस्त्र्यहं स्थित्वा धान्यमब्राह्मणाद्धरेत्॥

लं श्रुतमध्ययनं तपः॥ ज्ञात्वा राजा कुटुंबं च धर्म्यां वृत्तिं प्रकल्पयेत्॥४४॥ योऽन्नाद्यापरीतो वसीदति तस्य वृत्त
माचारं कुलमभिजनं॥ शीलमाचारः॥ श्रुतं शास्त्रश्रवणं॥ वेदाध्ययनं॥ तपः स्वधर्मवृत्तिः॥ तं च परीक्ष्य राजा धर्मा
दनपेतां वृत्तिं प्रकल्पयेत्॥ अन्यथा तस्य दोषः॥ तथा च मनुः॥ यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा
॥ तस्य सीदति तद्राष्ट्रं दुर्भिक्षव्याधिपीडितमिति॥४४॥ ॥इत्यापद्धर्मप्रकरणं॥ ॥

मि०आ०
५०

चतुर्णामाश्रमिणां मध्ये ब्रह्मचारिगृहस्थयोर्धर्माः प्रतिपादिताः सांप्रतमवसरप्राप्तान्वानप्रस्थधर्मान्प्रति-
पिपादयिषुराह ॥ सुतविन्यस्तपत्नीक इति ॥ वने प्रकर्षेण नियमेन तिष्ठतीति वनप्रस्थः वनप्रस्थ एव वा-
नप्रस्थः ॥ संजायां दैर्घ्येनाविनीहत्रिमाश्रित्य वनं प्रतिष्ठासुः इति यावत् ॥ असौ सुतविन्यस्तपत्नीकः स्वयं अ-
रणीयाद्स्येवं सुते विन्यस्ता निक्षिप्ता पत्नी येन स तथोक्तः ॥ यदि सा पतिपरिचर्याभिलाषेण स्वयमपि वनं जिग-
मिषति ॥ तदा तयानुगतो वा सहितः ॥ तया ब्रह्मचार्यूर्ध्वरेताः साग्निर्वैतानाग्निसहितः ॥ तथा सोपासनो गृह्या-

सुतविन्यस्तपत्नीकस्तया वानुगतो वनं ॥ वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेत् ॥२॥

ग्निसहितश्च वनं व्रजेत् ॥ सुतविन्यस्तपत्नीक इति वदता कृतगार्हस्थ्यो वानप्रस्थोऽधिक्रियत इति दर्शितं ॥ तच्चा-
श्रमसमुच्चयपक्षमंगीकृत्योक्तं ॥ इतरथा अविप्लुतब्रह्मचर्यो यमिच्छेत्तमेवावसेदित्यकृतगार्हस्थ्योऽपि वन-
वासेऽधिक्रियत एव ॥ एवं च वनप्रवेशो जराजर्जरकलेवरस्य जाते पौत्रस्य वा ॥ यथाह मनुः ॥ गृहस्थस्तु यदा प-
श्येद्वलीपलितमात्मनः । अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेदिति ॥ अयं च पुत्रेषु पत्नीनिक्षेपो विद्य-
मानभार्यस्य ॥ मृतभार्यस्यापि पत्नीबाह्याद्विर्वनवासस्मरणाद्दोषकं दाहयित्वाग्निहोत्रेणेति ॥ पुनराधानविधानं
तदपरिपक्वकषायविषयं ॥ ॥ ॥ त्रि०वृ० ५०

साग्निः सोपासनः इत्यत्रापि यदाऽऽधानं कृतं तदा श्रौताग्निर्गृह्योऽग्निश्च सहितो वनं व्रजेत् ॥ सर्वाधाने तु श्रौतेतरे-
तरकेवलं ॥ यदि कथंचित्ज्येष्ठत्वानुरत्नाहिताग्निर्वा दिना श्रौताग्न्ययोनाहितः ॥ तर्हि केवलं सोपासनो व्रजेदि-
त्येवं विवेचनीयं ॥ अग्निनयनं च तन्निष्ठसाग्निहोत्रादिकर्मसिध्यर्थं ॥ अत एव मनुः ॥ वैतानिकं च जुहुयादग्नि-
होत्रं यथाविधि ॥ दर्शमस्कंदयन्पर्व पौर्णमासं च योगतः इति ॥ ननु च पुत्रनिक्षिप्तपत्नीकस्य तद्विरहितस्य कथ-
मग्निहोत्रादिकर्मानुष्ठानं घटते पत्न्या सह यष्टव्यमिति सहाधिकारनियमात् ॥ सत्यं ॥ किं तु पत्नीनिक्षेपवि-
धिबलादेव तन्निरपेक्षेणाधिकारः कल्प्यते ॥ यथा हि रजस्वलायां ॥ यस्य व्रतेऽहनि पत्न्यनालंभुका स्यात्तामप-
रुध्य यजेतेति परीधविधिबलात्तन्निरपेक्षता ॥ यद्वा वनं प्रतिष्ठमानमेव पत्नी प्रत्यनुमन्यत इति न विरोधः ॥ अन-
यया ब्रह्मचारिणो विधुरस्य वा वनं प्रस्थितस्याग्निहोत्रादिपरिलोपः तथा निक्षिप्तपत्नीकस्याप्यग्निहोत्राद्यन-
वर्त्यतां कनीयं ब्राह्मपाक्षिकत्वेन श्रवणात् ॥ न च ब्रह्मचारिविधुरयोरप्यग्निसाध्यकर्मस्वनधिकारः पंचमहा-
साद्युदंशाहितश्रावणिकाग्नेस्तदधिकारदर्शनात् ॥ वानप्रस्थो जटिलश्चीराजिनवासा न फालकृष्टमधिति-
ष्ठेदकृष्टं मूलफलं संचिन्वितोर्ध्वरेताः क्षपायायोरधारे वपिन्नमनुष्यैः स गच्छेत्स्वर्गमानंत्यमिति वसिष्ठस्म-
रणात् ॥ चीरं वस्त्रखंडो वल्कलं वा ॥ न फालकृष्टमधितिष्ठेत्कृष्टक्षेत्रस्योपरि न निवसेत् ॥ श्रावणिकेन मार्गेण
नलौकिकेनेत्यर्थः ॥२॥

मि॰ग्रा॰ ५२

साग्निः सोपासनो वनेऽस्ति चेत्तदग्निसाध्यश्रौतस्मार्तकर्मानुष्ठानार्थमित्युक्तं तत्र गुणविधिमाह ॥ अफालकृ-
ष्टेनेति ॥ फालं तद्ग्रहणं कर्षणसाधनोपलक्षणं ॥ अकृष्टक्षेत्रोद्भवेन नीवारवेणुश्यामाकादिना अग्नींस्तर्पयेत् अग्नि-
साध्यानि कर्माण्यनुतिष्ठेत् ॥ चकारादात्मनिर्वाहार्थमपि तेनैव कुर्यात् ॥ तथा पितॄन्देवानतिथीनपि अकृष्टात्
कृतान्नमपि तेनैव तर्पयेत् ॥ तथान्यांस्त्वाश्रमागतानपि ॥ तथा च मनुः ॥ यद्भक्ष्यं स्यात्ततो दद्याद्बलिं
भिक्षां च शक्तितः ॥ अप्मूलफलफलैरर्चयेदाश्रमागतानिति ॥ एवं पंच महायज्ञान्कृत्वा स्वयमपि तच्छेष

अफालकृष्टेनाग्नींश्च पितॄन्देवातिथीनपि ॥ भृत्यांश्च तर्पयेच्छ्मश्रुजटालोमभृदात्मवान् ॥२॥

मेव भुञ्जीत देवताभ्यस्तु तद्धुत्वा वन्यं मेध्यान्तरं हविः ॥ शेषमात्मनि भुञ्जीत लवणं च स्वयंकृतमिति मनुस्मरणात् ॥ स्वयंकृ-
तमूषरलवणं ॥ एवं नीवाराद्यर्घ्यं यद्यग्न्यर्थं च मुख्यत्वान्नियमान्नग्राम्याहारपरित्यागोऽर्थसिद्धः ॥ अत एव मनुः ॥ संत्य-
ज्य ग्राम्यमाहारं सर्वं चैव परिच्छदमिति ॥ ननु च दर्शपौर्णमासादेर्व्रीह्यादिद्रव्यकसाध्यत्वात्कथं तत्परित्याग
॥ न च वनीयेम फालकृष्टेनाग्नींश्चेति विरोधवचनसामर्थ्याद्व्रीह्यादिबाध इति ॥ विरोधविषयिण्यपि स्मृत्याश्रु-
तिबाधसामान्यत्वात् ॥ अफालकृष्टविधिश्च स्मार्ताग्निसाधककर्मविषयत्वेनाप्युपपन्नः ॥ सत्यमेवं ॥ किं त्वत्र

शिव॰ ५२

व्रीह्यादिरप्यफालकृष्टत्वसंभवान्न विरोधः ॥ अत एव मनुना ॥ वासंतशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः ॥ पुरोडा-
शांश्चरूंश्चैव विधिवन्निर्वपेत्पृथगिति नीवाराद्यनां मुन्यन्नानां सतो मेध्यत्वेऽपि पुनर्मेध्यग्रहणं यज्ञार्हव्रीह्यादि
प्राप्त्यर्थं कृतं ॥ मेध्यो यज्ञस्तदर्हं मेध्यमिति ॥ तथा श्मश्रूणि मुखजानि रोमाणि जटारूपांश्च शिरोरुहान्कक्षा-
दीनि च रोमाणि बिभृयात् ॥ रोमग्रहणं नखानामप्युपलक्षणं ॥ तथा च मनुः ॥ जटाश्च बिभृयान्नित्यं श्मश्रुलो-

एकमासस्य पक्षस्य वा तथा संवत्सरस्य वा ॥
अर्थस्य संचयं कुर्यात्कृतमाश्वयुजे त्यजेत् ॥३॥

मनखानि चेति ॥ तथात्मवानात्मोपासनानिरतः स्यात् ॥२॥ पूर्वोक्तद्रव्यसंचयनियममाह ॥ अकृ-
॥ एकस्यान्तःसंबंधिनो जनादि दृष्टकर्माणि पर्याप्तस्यार्थस्य संचयं कुर्यात् ॥ मासस्य वा पक्षस्य वा मासानां
संवत्सरस्य वा संबंधिकर्मपर्याप्तसंचयं कुर्यान्नाधिकं ॥ यद्येवं क्रियमाणेऽपि कथंचिदतिरिच्यते ॥ तर्हि
तदातिरिक्तमाश्वयुजे मासि त्यजेत् ॥३॥ ॥ ॥ इति श्रीगोपीजनवल्लभायनमः ॥ ॥

मि॰प्रा॰
४२

किंच हंत इति॥ दांतो दर्परहितः॥ त्रिषु सर्वेषु प्रातर्मध्यंदिनापराह्णेषु स्नानशीलः तथा प्रतिग्रहपराङ्मुख
:चराव्दात्याजनादिनिवृत्तश्च स्वाध्यायवान्वेदाभ्यासरतः॥ अपाफलमूलानि स्वादिदानशीलः॥ सर्व
प्राणिहिताचरणनिरतश्च भवेत्॥४॥ किंच॥ दंतेति॥ दंता एवोलूखलं निस्तुषीकरणसाधनं दंतोलूख
लं तद्यस्यास्ति स दंतोलूखलिकः॥ कालः॥ कालेनैव पक्वं कालपक्वं नीवारवेणुश्यामाकादिधान्यं॥ वदरेंगुद

दांतस्त्रिषवणस्नायी निवृत्तश्च प्रतिग्रहात्॥ स्वाध्यायवान्दानशीलः सर्वसत्वहिते रतः॥४॥
दंतोलूखलिकः कालपक्वाशी वाश्मकुट्टकः॥ श्रौतस्मार्त्तं फलस्नेहैः कर्म कुर्यात्तथा क्रियाः॥५॥

दिफलं च तदशनशीलः॥ कालपक्वाशी वा निप्रायः अश्मकुट्टको वा भवेत्॥ अश्मना कुट्टनमवहननं य
स्य स तथोक्तः॥ तथा श्रौतं स्मार्त्तं च कर्म दृष्टार्थाश्च भोजनाभ्यंजनादिक्रियाः फलकतृणमधुकादिमेध्यतरु शिव॰
फलोद्भवैः स्नेहद्रव्यैः कुर्यान्न तु ग्राम्यतैलादिकैः॥ तथा च मनुः॥ मेध्यवृक्षोद्भवान्यद्यात्स्नेहांश्च फलसंभवा ४२
निति॥५॥ पुरुषार्थतया विहितं भोजननियममाह॥ चांद्रायणैरिति॥ ॥ ॥

चांद्रायणैर्वक्ष्यमाणलक्षणैः कालं नयेत्॥ कृच्छ्रैर्वा प्राजापत्यादिभिः कालं वर्त्तयेत्॥ यत्र पक्षे पंचदशतिथि
त्मकेऽन्नेऽश्नीयान्मासे वा: क्रिगते वा नक्तमश्नीयात्॥ अपि प्राव्दाच्चतुर्थकालिकतादिनापि॥ यथाह मनुः
॥ नक्तं चान्नं समश्नीयाद्दिवा वाहृत्य शक्तितः॥ चतुर्थकालिको वा स्यात्स्याद्वाप्यष्टमकालिकः॥ इत्येव च
कालनियमानां शक्त्यपेक्षया विकल्पः॥६॥ किंच॥ स्वप्यादिति॥ आहारविहारावसरवर्जं रात्रौ शुचिः स्व
यतः स्वप्यान्नोपविष्टो नापि तिष्ठेत्॥ दिवास्वप्नपुरुषमात्रार्थतया प्रतिषिद्धत्वात्तन्निवृत्तिपरं॥

चांद्रायणैर्नयेत्कालं कृच्छ्रैर्वा वर्त्तयेत्सदा॥ पक्षे गते वाप्यश्नीयान्मासे वाहनि वा गते॥६॥
स्वप्याद्भूमौ शुचिरात्रौ दिवा संप्रपदैर्नयेत्॥ स्थानासनविहारैर्वा योगाभ्यासेन वा तथा॥७॥

तथा भूमावेव स्वप्यान्न खट्वायां नरितायां मंचकादौ वा॥ दिनं तु संप्रपदैरटनैर्नयेत्॥ स्थानासनस्थैर्वा
विहारैः संचारैः किंचित्कालं स्थानं किंचिदुपवेशनमित्येवं वा दिनं नयेत्॥ योगाभ्यासेन वा॥ तथा च
मनुः॥ विविधाश्चोपनिषदीरात्मसंसिद्धये श्रुतीरित्यात्मनः संसिद्धैर्ये ब्रह्मत्वप्राप्तये॥ तथा च॥
दाह्नि परिलोडेनाथा नयेत्॥ भूमौ विपरिवर्त्तेत तिष्ठेद्वा प्रपदैरिति मनुस्मरणात्॥ प्रपदैः पादाग्रैः॥

मि॰प्रा॰ ५३

ग्रीष्मेति॥ ऋतुः संवत्सरो ग्रीष्मो वर्षा हेमंत इति दर्शनात्॥ ग्रीष्मे चैत्रादिमासचतुष्टये चतसृषु दिक्षु चत्वारो
ऽग्नयः॥ उपरिष्टादादित्य इत्येवं पंचानामग्नीनां मध्ये तिष्ठेत्॥ तथा वर्षासु श्रावणादिमासचतुष्टये स्थंडिले
शयः॥ वर्षधारानिवारणविरहिणि भूतले निवसेत्॥ हेमंते मार्गशीर्षादिमासचतुष्टये क्लिन्नवासो वसे
त एवंविधेन तपश्चरणेऽसमर्थः॥ स्वशक्त्यानुरूपं वा तपश्चरेत् यथा शरीरस्योपतापो न भवति॥ तपश्चरंश्चोग्रतरं

ग्रीष्मे पंचाग्निमध्यस्थो वर्षासु स्थंडिलेशयः॥ आर्द्रवासास्तु हेमंते शक्त्या वापि तपश्चरेत्॥८॥
यः कंटकैर्वितुदति चंदनैर्यश्च लिंपति॥ अक्रुद्धोपरितुष्टश्च समस्तस्य च तस्य च॥९॥ ॥ ॥

शोषयेद्देहमात्मनः इति मनुस्मरणात्॥८॥ किंच यः इति॥ कश्चित्कंटकादिभिर्विविधं गात्रं वितुद
ति व्यथयति तस्मै न कुप्येत्॥ यश्चंदनादिना उपलिंपति सुखयति तस्मै न परितुष्येत्॥ किंतु तयोरु
भयोरपि समः स्यादुदासीनो न भवेत्॥९॥ अग्निपरिचर्यादिमप्याह॥ ॥ ॥ शिव॰ ५३

अग्नीनिति॥ अग्नीनात्मनि समारोप्य वृक्षावासो वृक्षमूल एवावासः कुटी यस्य स तथोक्तः॥ मिताशनः स्वल्पाहा
री पिंडान्वा फलमूलाशनश्च न त्वेषणीयमिति॥ तथाह मनुः॥ अग्नीनात्मनि वैतानान्समारोप्य यथाविधि॥ अ
नग्निरनिकेतः स्यान्मुनिर्मूलफलाशन इति॥ मुनिर्मौनव्रतयुक्तः॥ फलमूलासंभवे च यावता प्राणधारणं भवति
तावन्मात्रं भैक्षं वानप्रस्थगृहेष्वाचरेत्॥१०॥ यदा तु तदसंभवो माध्यंदिनवेला वा तदा किं कार्यमित्यत आ

अग्नीन्वाप्यात्मसात्कृत्वा वृक्षावासो मिताशनः॥ वानप्रस्थगृहेष्वेव
यात्रार्थं भैक्षमाचरेत्॥१०॥ ग्रामादाहृत्य वा ग्रासानष्टौ भुंजीत वाग्यतः॥

ह॥ ग्रामादिति॥ ग्रामाद्वा वनेस्थसमाहृत्य वाग्यतो मौनी भूत्वाष्टौ ग्रासान्भुंजीत॥ ग्रासनैयत्यविधानान्मुना
ल नियमोऽयं तु न॥ यदा पुनरष्टभिर्ग्रासैः प्राणधारणं न संभवति॥ तदाष्टौ ग्रासा मुनेर्भुक्तं वान
प्रस्थस्य षोडशेति स्मृत्यंतरोक्तं द्रष्टव्यं॥ सकलानुष्ठानासमर्थत्वादाह॥ वायुभक्ष इति॥ ॥ ॥

मि० प्रा०
५५

अथवा वायुरेव भक्षो यस्यासौ वायुभक्षः। प्रागुदीचीं ऐशानीं दिशं गच्छेत्।। आवर्ष्मसंक्षयात् वर्ष्म वपुस्त
त्सन्निपातपर्यन्तमकुटिलगतिर्गच्छेत्।। यथाह मनुः।। अपराजितां वास्थाय गच्छेद्दिशमजिह्मगः इति।। महाप्रस्थाने
प्रवृत्तः कोऽप्युपतनादिकं वा कुर्यात्।। वानप्रस्थो वीराध्वानं ज्वलनं वाम्बुप्रवेशनं।। भृगुपतनं वानुतिष्ठेदिति स्मरणा
त्।। स्नानाचमनादिधर्मा ब्रह्मचारिप्रकरणाभिहितास्त्राविरोधिनोऽपि भवन्ति।। अग्रेरेषां चैतदविरोधी नियोगत
मस्मरणात्।। एवं प्रागुदीचीं द्वारीतामहाप्रस्थानपर्यन्तेऽस्मिन्ननुष्ठाने तमनुतिष्ठन्।। ब्रह्मलोके पूज्यते। आचोदि

वायुभक्षः प्रागुदीचीं गच्छेद्वावर्ष्मसंक्षयात्।।५५।। ।।

यथाह मनुः।। आसां महर्षिचर्याणां त्यक्त्वान्यतमया तनुं। वीतशोकभयो विप्रो ब्रह्मलोके महीयत इति
ब्रह्मलोकः स्थानविशेषो न तु निर्वाणं तत्र लोकशब्दस्याप्रयोगात्।। तुरीयाश्रममन्तरेण मुक्त्यनंगीका
राच्च।। न च योगाभ्यासेन वा पुनरनिवृत्तोपासनविध्यनुपपत्त्यात्रापि पत्तिः परिव्राजकनीयां।। साक्षो
क्षाद्विजाः सर्वेऽपि तेनापि तदुपपत्तेरेतत्त्रय एव श्रुतौ त्रयो धर्मस्कन्धाः यज्ञोऽध्ययनं दानमिति प्रथम
स्तप एवेति द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन्निति।। गार्ह
स्थ्यवानप्रस्था

त्रिव०
५५

नैष्ठिकत्वस्वरूपमभिधाय सर्व एते पुण्यलोका भवन्तीति त्रयाणामाश्रमीणां पुण्यलोकप्राप्तिमभिधाय ब्र
ह्मसंस्थोऽमृतत्वमेतीति पारिव्राज्यस्य परिव्राजकस्यैव ब्रह्मसंस्थाप्य मुक्तिं जगादाऽमृतत्वप्राप्तिरभिहिता।। य
द्यपि श्रावककत्तसावादी च गृहस्थोऽपि हि मुच्यत इति गृहस्थोऽपि मोक्षप्रतिपादनं तत्र ज्ञानोत्तरानुष्ठितपारिव्रा
ज्यस्योत्सवर्गतत्वं।।५५।। ।। इति वानप्रस्थप्रकरणं।। वैखानसधर्माननुकम्प्य प्रासान्परिव्राजकधर्मान्संस
प्रेतं प्रस्तौति।। वनाद्गृहादिति।। यावता कालेन निवृत्ततपःशोषितवपुषा यकषायपरिपाकान्वेति।। पुनश्चमहो

वनाद्गृहाद्वा कृत्वेष्टिं सार्ववेदसदक्षिणां।। प्रा
जापत्यां तदन्ते तानग्निनारोप्य चात्मनि।।५६।।

कषायपाको नाप्यते।। तावत्कालं वनवासं कृत्वा तस्मादनन्तरं मोक्षे मनः कुर्यात्।। वनगृहशब्दाभ्यां तत्सं
बंधाश्रमो लक्ष्यते।। मोक्षशब्देन च मोक्षैकफलकश्चतुर्थाश्रमः।। अथवा गार्हस्थ्यादनन्तरं मोक्षे मनः
कुर्यादनेन च पूर्वोक्तश्चतुराश्रमसमुच्चयपक्षः पाक्षिकत्वेनैव धानयति।। तथा च विकल्पो जाबालश्रुतौ
श्रूयते।। ब्रह्मचर्यं परिसमाप्य गृही भवेद्गृही भूत्वा वनी भवेत्।। वनी भूत्वा प्रव्रजेद्यदि वेतरथा ब्रह्मचर्या
देव प्र

व्रजेद्गृहाद्वा वनाद्वेति ॥ तथा गार्हस्थ्योत्तराश्रमबाधश्च गौतमेन दर्शितः ॥ ऐकाश्रम्यं त्वाचार्याः प्रत्यक्षविधाना
द्गार्हस्थ्यस्येति ॥ एषां च समुच्चयविकल्पबाधपक्षाणां सर्वेषां श्रुतिमूलत्वादिच्छया विकल्पः ॥ यत्तोयतैश्चि
सडितं मन्मेरन्मेरन्मेरुकं स्मार्त्तत्वान्नैष्ठिकत्वादीनां गार्हस्थ्येन श्रौतेन बाधः ॥ गार्हस्थ्ये नधिकृतोंधक्लीबादिवि
षयतावेति ॥ तस्वाध्यायाध्ययनवैधुर्यनिबंधनमित्युपपन्नायं ॥ २ ॥ किंच ॥ यथाविच्छुक्रमणाज्यावेक्षणा

अधीतवेदो जपकृत्पुत्रवानन्नदोऽग्निमान् ॥ शक्त्या च यज्ञकृन्मोक्षे मनः कुर्या
त्तु नान्यथा ॥ २ ॥ आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहात् ॥ ॥ ॥

घन्नमनया पुंस्त्वादीनां श्रौते तेषनधिकारस्तथा स्मार्त्तेपि पुंदर्कुनाहरणनिषेधाचार्यादिसमत्वा कथं पुंस्त्वादि
विषयत्वयानैष्ठिकत्वाद्याश्रमनिर्वाहकस्मिश्राश्रमे ब्राह्मणस्यैवाधिकारः ॥ आत्मनीति ॥ इत्युपक्रमोपप
द्वारासां मनुना ब्राह्मणस्याधिकारप्रतिपादनात् ॥ ब्राह्मणाः प्रव्रजंतीति श्रुतेश्चाव्रजन्मनस्त्वाधिकारो न दि
जातिमात्रस्य ॥ अन्ये तु त्रैवर्णिकानां प्रकृतत्वात्त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमेति ॥ सूत्रका
रवचनाच्च द्विजातिमात्रस्याधिकारमाहुः ॥ ॥

यदाच्च वनात्गृहाद्वा प्रव्रजति तदा सार्ववेदसदक्षिणां सार्ववेदसीं सर्ववेदसं वेधीनि दक्षिणा यस्यास्तान्तथो
क्तां प्रजापतिदेवताकां इष्टिं कृत्वा तदंते तानग्नीनात्मनि श्रुत्युक्तविधानेन समारोप्य ब्राह्मणो गृहादगय
वेपौर्णमास्यां पुरश्चरणादिकां कृत्वा तथाधीतवेदो गृहान्निर्वपेत्पादद्यावेति बोधायनाद्युक्तं पुपुर
श्चरणादिकं च — — — — तथाधीतवेदो जपपरायणो जातपुत्रो दीनाधीकृपणार्थिसाध्यापि यथाश
क्त्यन्नदश्चरत्वान्नाहिताग्निश्चेष्ट्वादिना प्रतिबंधीनावेत्रकृताधानो नित्यनैमित्तिकान्यज्ञान्कृत्वा
मोक्षे मनः कुर्यात्तु चतुर्थाश्रमं प्रविशेन्नान्यथाकृतेनापकृतर्णत्रयस्य गृहस्थस्य प्रव्रज्यायामनधि

एष वो निहितो धर्मो ब्राह्मणस्य चतुर्विध ॥ ३ ॥ ॥

कारं न्यायपति ॥ यथाह मनुः ॥ ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ॥ अनपाकृत्य मोक्षं तु
सेवमानो व्रजत्यधः इति ॥ यदा तु ब्रह्मचर्यात्प्रव्रजति तदा तु न प्रजोत्पादनादिनियमः ॥ अकृतदारपरिग्र
हस्य तदधिकारात् ॥ नन्वपुत्रकत्वात् ॥ विवाहस्य न च ऋणत्रयापाकरणविधिरेव दारानास्तिपतीति शंकनीयं ॥
विद्याधनार्जननियमवदस्य अपुत्रकदारसंबंधस्याक्षेपकत्वात् ॥ न तु जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा
न् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इति जातमात्रस्यैव प्रजोत्पादनादीनावश्यकावै
नीति दर्शयति ॥ ॥

मि०प्रा० ५६ नैवं न द्विजातिमात्रेः कृतदाराग्निपरिग्रहो यज्ञादिष्वधिक्रियते॥ तस्मादधिकारी जायमानो ब्राह्मणादिर्यज्ञादि
नन्तु तिष्ठेदिति तस्यार्थः॥ अत एवोपनीतस्य वेदाध्ययनमेवावश्यकं॥ कृतदाराग्निपरिग्रहस्य यज्ञो नादनमपी
ति निरवद्यं॥ ३॥ एवमधिकारिणो निरूप्य धर्मानाह॥ सर्वभूतहित इति॥ सर्वभूतेभ्यः प्रियोप्रियकारिणो हितेत्र
उदासीनो न पुनर्हिताहिताचरणः॥ हितानुग्रहयोरनारंभी तितिक्षो तमस्मारणात्॥ शांतः बाह्यांतःकरणोप
हतः॥ त्रिदंडोऽस्यास्तीति त्रिदंडी तेन च दंडा वैणवा ग्राह्याः॥ प्राजापत्येष्ट्यनंतरं स्त्रीन्वैणवान्दंडान्मूर्धप्र

सर्वभूतहितः शांतस्त्रिदंडी सकमंडलुः॥ ॥

माणान्दक्षिणेन पाणिना धारयेत्॥ सव्येन सोदकं कमंडलुमिति निम्मसंतरदर्शनात्॥ एकं वा दंडं धारयेदे
कदंडी वेति बौधायनस्मरणात्॥ चतुर्थमाश्रमं गच्छेद्ब्रह्मविद्यापरायणः॥ एकदंडी त्रिदंडी वा सर्वसंसारि
र्जितः इति चतुर्विंशतिमते दर्शनाच्च॥ तथा शिखाधारणमपि वैकल्पिकं॥ मुंडः शिखी वेति गौतमस्मरणात्
॥ मुंडोऽममोऽक्रोधः परिग्रहः इति वसिष्ठस्मरणाच्च॥ यज्ञोपवीतधारणमपि वैकल्पिकं सर्वसशिखान् शिव० ५६
केशान्निकृत्य विसृज्य यज्ञोपवीतमिति काठकश्रुतेः ———————— पुत्रदारांश्च वेदांश्च॥ निजसर्वशि

केशान्यज्ञोपवीतं तु सत्त्वा गृहस्थरेन्मुनिः इति बाष्कलस्मरणात्॥ अथ यज्ञोपवीतमप्सु जुहोति भूः स्वाहेति
॥ अथ यं दंडमाधत्ते सखे मां गोपायेति पारिशिष्टदर्शनाच्च॥ यद्य शरीरकस्तदा कंथापिधाना काषायी मुंडस्त्रिदं
डी कमंडलुपवित्रपादुकासनकंथामात्र इति देवलस्मरणात्॥ शौचाद्यर्थं कमंडलुसहितश्च व्रजेत्॥ एका
रामः प्रव्रजितान्तरेण सहायः संन्यासिनी निरिक्ष्येति च॥ स्त्रीणां चैक इति बौधायनेन स्त्रीणामपि प्रव्रज्यास्मर
णात्॥ तथा च दक्षः॥ एको भिक्षुर्यथोक्तश्च द्वावेव मिथुनं स्मृतं॥ त्रयो ग्रामः समाख्यात ऊर्ध्वं तु नगरायते॥ रा
जवार्ता हि तेषां तु भिक्षावार्ता परस्परं॥ अपि पैशून्यमात्सर्यं संनिकर्षान्न संशयः इति॥ परिव्रज्य परिपूर्वो व्र

एकारामः परिव्रज्य भिक्षार्थं ग्राममाश्रयेत्॥ ५७॥

जति स्म गतौ वर्त्तते॥ अतश्चाहंसमानिमानं न कुर्वंश्च लौकिकं कर्म निवृत्तं वैदिकं च नित्यकाम्यात्मकं संत्यजेत्
॥ तदुक्तं मनुना॥ सुखाभ्युदयिकं चैव नैःश्रेयसिकमेव च॥ प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकं॥ इह वामुत्र वा का
म्यं प्रवृत्तं कर्म कीर्त्यते॥ निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते॥ यथोक्तान्यपि कर्माणि परिहाय द्विजोत्तमः॥
आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवानिति॥ अन्नवेदाभ्यासः प्रणवोभ्यासः॥ तत्र यत्नवान् भिक्षार्थं प्रयोज
नार्थं ग्राममाश्रयेत् प्रविशेत् न पुनः सुखनिवासार्थं॥ वर्षाकाले तु न दोषः॥ ऊर्ध्वं वार्षिकाभ्यां मासाभ्यां नैक
स्थानवासी भिक्षुः स्मरणात्॥ ॥

मि० प्रा०
५१

अत्राकौतनमासचतुष्टयपर्यंतमपि स्थातव्यं॥ न विरमेकत्र वसेदन्यत्र वर्षाकालात्॥ श्रवणाद्यश्चतुरो मासा
वर्षाकाल इति देवलस्मरणात्॥ एकरात्रं वसेद्ग्रामे नगरे पंचरात्रकं॥ वर्षाभ्योऽन्यत्र वर्षासु मासांस्तु चतुरो वसेदि
ति काश्यपस्मरणात्॥४॥ कुपनिषादनं कार्यं इत्यत आह॥ अप्रमत्त इति॥ अप्रमत्तो वाक्चक्षुरादिचापल्यरहितो न
संचरेत्॥ वसिष्ठेनात्र विशेषो दर्शितः॥ सप्तागाराण्यसंकल्पितानि चरेद्भैक्षमिति॥ सायाह्ने अन्तः पंचमे भागे॥ त
था च मनुः॥ विधूमे सन्नमुसले व्यंगारे भुक्तवर्जने॥ वृत्ते शरावसंपाते नित्यं भिक्षां यतिश्चरेत्॥ तथा एककालं चरेद्भै
क्षं न प्रसज्जेत तु विस्तरे॥ भैक्ष्ये प्रसक्तो हि यतिर्विषयेष्वपि सज्जतीति॥ अनभिलक्षितः ज्योतिर्विज्ञानोपदेशैर्लि

अप्रमत्तश्चरेद्भैक्षं सायाह्नेनभिलक्षितः॥ रहिते भिक्षुकैर्ग्रामे यात्रामात्रमलोलुपः॥ ५॥

नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचिदिति ति
नाभिलक्षितः॥ न चोत्पातनिमित्ताभ्यां न नक्षत्रांगविद्यया॥ नानुशासनवादाभ्यां... सायं प्रातर्मांसवर्जमिति तद्वाक्यविष
नैवोक्तत्वात्॥ यमुनर्वसिष्ठवचनं॥ ब्राह्मणकुले वा यल्लभेत तद्भुंजीत... न तापसैर्ब्राह्मणैर्वा वयोभिरपि
यं॥ भिक्षुकैर्भिक्षणशीलैः पाखंड्यादिभिर्वर्जिते ग्रामे॥ मनुना चात्र विशेष उक्तः॥ ... तावन्मात्रं भैक्षं संचरेत्॥ तथा च संव
श्वभिः॥ आकीर्णं भिक्षुकैरन्यैरगारमुपसंव्रजेदिति॥ यावता प्राणयात्रा वर्तते तावन्मात्रं भैक्षं चरेत्॥ ... सर्वास्तितोश्रीया चेवाप्यतश्च
र्तः॥ अष्टौ भिक्षाः समादाय स मुनिः सप्त पंच वा॥ अद्भिः प्रक्षाल्य ताः सर्वास्ततोऽश्नीयाच्च वाग्यत इ
ति॥ अलोलुपः मिष्टान्नव्यंजनादिष्वप्रसक्तः॥ ५॥

त्रिव०
५१

भिक्षाचरणार्थं पात्राण्याह॥ यतीति॥ मृदादिप्रकृतिकानि यतीनां पात्राणि भवेयुः॥ तेषां सलिलं गोवाला
वघर्षणं च शुद्धिसाधनं॥ इयं च शुद्धिर्भिक्षाचरणादिकप्रयोगे गन्धलेपाद्युपहतविषया॥ तदुपघाते तु मृ
च्छुद्धिप्रकरणोक्ता द्रष्टव्या॥ अत एव मनुना॥ अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च॥ तेषामद्भिः स्मृतं

यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च॥ स
लिलं शुद्धिरेतेषां गोवालैश्चावघर्षणं॥ ६॥

शौचं चमसानामिवाध्वरे॥ इति चमसदृष्टांतोपादानेन प्रायोगिकी शुद्धिर्दर्शिता॥ पात्रान्तराभावे भोजनमपि त
त्रैव कार्यं॥ तद्देशं गत्वा तत्तैकां तेते नैव पात्रेणान्येन वा लब्धमात्रं योऽश्नीतेति देवलस्मरणात्॥ एवं च भूतस्य य
तेरात्मोपासनांगं नियममनियमविशेषाह॥ ६॥ ॥ संनिरुंध्येति॥ ॥ ॥

चक्षुरादींद्रियसमूहं रूपादिविषयेभ्यः सम्यक् निरुध्य विनिवर्त्य रागद्वेषौ प्रियाप्रियविषयौ प्रहाय सत्काचत्रा
वादीव्याधीनपि ॥ तयानूतानामपकाराकाराकरणेन नयमकुर्वन्स्वांतःकरणः सत्वदैनसाक्षात्कारेणमति
भवति मुक्तो भवति ॥ ७ ॥ किंच कार्त्तव्येति ॥ विषयाभिलाषद्वेषजनितदोषकलुषितस्यान्नायस्यांतःकरण
स्य शुद्धिः कल्मषक्षयः प्राणायामैः कर्तव्यः ॥ तस्याः शुद्धेरभावे तत्साक्षात्काररूपज्ञानोत्पत्तिनिमित्तत्वात् ॥ ए

संनिरुध्येंद्रियग्रामं रागद्वेषौ प्रहाय च ॥ भयं हत्वा च भूतानाममृतीभवति द्विजः ॥ ७ ॥
कर्तव्यात्वाशयशुद्धिस्तु भिक्षुकेण विशेषतः ॥ ज्ञानोत्पत्तिनिमित्तत्वात्स्वातंत्र्यकरणाय च
॥ ८ ॥

वं सति विषयासक्तिजनितदोषात्मकप्रतिबंधात्क्षये समात्मध्यानधारणादौ स्वतंत्र्यो भवति ॥ भिक्षुकेण वे
षांशुद्धिर्विशेषतोऽनुष्ठेया तस्य मोक्षप्रधानत्वात् ॥ मोक्षस्य च शुद्धांतःकरणानामंतरेण दुर्लभत्वात् ॥ यथाह
मनुः दह्यंते ध्मायमानानां धातूनां च यथा मलाः ॥ तथेंद्रियाणां दह्यंते दोषाः प्राणस्य निग्रहादिति ॥ ८ ॥

इंद्रियनिरोधोपायतया संसारस्वरूपनिरूपणमाह ॥ अवेक्ष्येति ॥ वैराग्यसिध्यर्थं मूत्रपुरीषादिपूर्णानाना
विधगर्भवासा अवेक्षणीयाः पर्यालोचनीयाः ॥ चशब्दाज्जननोपरमावपि ॥ तथा निषिद्धाचरणादिक्रियाज
न्याः ॥ महारौरवादिनिरयपतनरूपा गतयः ॥ तथा आधयो मनःपीडा व्याधयश्च ज्वरातिसारादयः शारीरा
क्लेशाः ॥ अविद्यास्मितारागद्वेषाभिनिवेशाः ॥ पंच एव जरावलीपलिताद्यभिनवः रूपविपर्ययः ॥ संज

अवेक्ष्या गर्भवासाश्च कर्मजा गतयस्तथा ॥ आधयो व्याधयः क्लेशा
जरारूपविपर्ययः ॥ ९ ॥ भवो जातिसहस्रेषु प्रियाप्रियविपर्ययः ॥

कुब्जत्वादिना प्राक्तनस्वरूपस्यान्यथाभावः ॥ तथाश्वशूकरखरोरगाद्यनेकजातिषु भवउत्पत्तिः ॥ तथा इष्ट
स्याप्राप्तिरनिष्टस्य प्राप्तिरित्यादि बहुतरक्लेशावहं संसारस्वरूपं पर्यालोच्य तत्परिहारार्थमात्मज्ञानोपा
यभूतं द्विपजपे प्रयतेत ॥ ९ ॥ एवमवेक्ष्यानंतरं किं कार्यमित्यत आह ॥ ॥ श्रीः नमः ॥ ॥

किंच ध्यानमिति ॥ योगश्चित्तवृत्तेरात्मैकाग्रता ध्यानं तस्याः एव बाह्यविषयत्वोपरमः ॥ ध्यानयोगेन निदिध्यासनापरप
र्यायेण स्वस्वरूपं शरीरप्राणादिव्यतिरिक्तः देवेन्द्रतत्त्वात्मनि ब्रह्मण्येव स्थित इत्येवं तत्त्वंपदार्थयोरभेदं सम्यक्प्रपं
दपरोक्षीकुर्यात् अत एव श्रुतौ ॥ आत्मा वा अरे द्रष्टव्य इति साक्षात्कारस्वरूपं दर्शनमनुद्य तत्साधनत्वेन श्रोतव्यो मंतव्यो
निदिध्यासितव्य इति श्रवणमनननिदिध्यासनानि विहितानि ॥२०॥ किंच नाश्रम इति ॥ नाकनस्थो कोऽप्यात्मेषा

ध्यानयोगेन संपन्नं पश्येदात्मानमात्मनि निश्चितः ॥२०॥ नाश्रमः कारणं ध
र्मे क्रियमाणोऽपि न वेदिषि ॥ अतो यदात्मनो पथ्यं परेषां न तदाचरेत् ॥२१॥

सनाश्रे धर्मे नाश्रमो दंडकमंडल्वादिधारणं कारणं ॥ यस्मादसौ क्रियमाणोऽपि न वेदे वनातिदुष्करस्तस्मादय
दात्मनो पथ्यमसुखकरं पुरुषनाशनादि तत्परेषां न समाचरेत् ॥ अनेन नग्नोऽनोत्पत्तिहेतुत्वं तत्कारणस्थ
घ्यापादनत्वेनांतरंगत्वात् रागद्वेषप्रहाणस्य प्रधानत्वेन आसार्थमाश्रमनिराकरणं ॥ न पुनः स्वस्वरित्यागाय तस्य
पि विहितत्वात् ॥ तदुक्तं मनुना ॥ दूषितोऽपि चरेद्धर्मं यत्र तत्राश्रमे वसन् ॥ समः सर्वेषु भूतेषु न लिंगं धर्मकारणमिति ॥
२१॥

पि

किंच सत्यमिति ॥ सत्यं यथार्थप्रियवचनं ॥ अस्तेयं परद्रव्यानपहारः ॥ अक्रोधोऽपकारिण्यपि क्रोधस्यानुत्पादनं ॥ ह्री
लज्जा ॥ शौचं मावाराद्विशुद्धिः ॥ धीर्हिताहितविवेकः ॥ धृतिरिष्टवियोगानिष्टप्राप्तौ च चलितचित्तस्य पूर्ववदवस्था
पना ॥ दमो मत्स्यागः ॥ संयतेन्द्रियता अप्रतिषिद्धेष्वपि विषयेष्वनतिप्रसंगः ॥ विद्या आत्मज्ञानं ॥ एते सत्यादिनिरनुष्ठि
तैः सम्यग्धर्मानुष्ठितो न च संन्यस्तदंडकमंडल्वादिधारणावासलक्षणास्सत्यादीनामात्मगुणानामंतरंगताद्योतयति
॥२१॥ ननु ध्यानयोगेनात्मनिश्चितमात्मानं पश्येदित्युक्तं जीवपरमात्मनोर्भेदाभावादिस्तत्राह ॥ निःसरंतीति

सत्यमस्तेयमक्रोधो ह्रीः शौचं धीर्धृतिर्दमः ॥ संयतेन्द्रियता विद्या धर्मः सर्व उदाहृतः ॥२२॥ निःसरंति यथा लोहपिं
डात्तप्तात्स्फुलिंगकाः ॥ सकाशादात्मनस्तद्वदात्मानः प्रभवंति हि ॥२३॥

॥ यद्यपि जीवपरमात्मनोः पारमार्थिको भेदो
नास्ति तथाप्यात्मनः सकाशादविद्योपाधिभेदभिन्नतया जीवात्मनः प्रभवंति हि यस्मात्तस्मादुत्पत्त एव जीवपर
योर्भेदव्यपदेशः ॥ यथा हि तप्ताल्लोहपिंडादयोगोलकाद्विस्फुलिंगकास्तेजोवयवा निःसरंति ॥ निःसृताश्च वि
स्फुलिंगव्यपदेशः ॥ ज्वलनं तत्तद्वदुत्पन्नमात्मानमात्मनिश्चितैर्द्रष्टव्य इति ॥ अयमर्थः ॥ ननु सुषुप्तिसमये ब्रह्मणस्स
कलत्वेनजडादीनां ब्रह्मणि प्रलीनत्वात् स्यायमात्मोपासनाविधिरित्यत आह ॥ निःसरंतीत्यादि यद्यपि स्वस्वरू
पेण ब्रह्मप्रवेशायां प्रलीनास्तथाप्यात्मनः सकाशादविद्योपाधिभेदभिन्नतया जीवात्मनः प्रभवंति ॥ ॥

मि०श्रा० पुनः कर्मवशाच्छरीराभिमानिनो जायंते। तस्मान्नोपासनाविधिविरोधः। तेजसस्पृष्टस्यायसमाप्याद्योऽहपिंड
५८ दृष्टांतः ॥१३॥ ननु चानुपात्तवपुषां क्षेत्रज्ञानां निःपरिस्पंदतया कर्माभावात्कथं तन्निबंधनो जरायुजांडजादि
चतुर्विधदेहपरिग्रह इत्यत आह। तत्रेति। यद्यपि तस्यामवस्थायां परिस्पंदात्मकक्रियाभावस्तथापि धर्माधर्मा
ख्यवश्यायात्मकं मानसं कर्म संभवति। तस्य च विशिष्टशरीरग्रहणे हेतुत्वमस्त्येव। वाचिकैः पक्षिमृगतां मानसै
रंत्यजातितामिति मनुस्मरणात्॥ एवं गदितवपुः स्वधर्मे वान्वयव्यतिरेकनिरपेक्षः प्राग्वीयानुभवनावि

तत्रात्मा हि स्वयं किंचित्कर्म किंचित्स्वभावतः। करोति किंचिदभ्यासाद्धर्माधर्मोभयात्मकम् ॥१४॥

तद्भावनानुभवीभूतकार्यविबोधः॥ किंचित्स्वतः स्तन्यपानादिकं करोति किंचित्स्वभावतो यदृच्छया प्रयोजनानु
संधिनिरपेक्षः पिपीलिकादिनृत्तं करोति॥ किंचिद्बुद्धिपूर्वं जन्मांतराभ्यासवशाद्धर्माधर्मोभयरूपं करोति॥ तथा च शिव०
स्मृतं तरं प्रतिजन्म यदभ्यस्तं दानमध्ययनं तपः॥ तेनैवाभ्यासयोगेन तदेवाभ्यस्यते पुनरिति॥ तेन एवं जी ५८
वानां कर्मवैचित्र्यात्तज्जरायुजादिदेहवैचित्र्यं युज्यत एव॥१४॥ नन्वेवं सति ब्रह्मणः एव कथंचि
ज्जीवस्वपदेशाभावात्तस्य नित्यत्वादिधर्मत्वात्कथं विष्णुमित्रो जात इति व्यवहारः स्यादित्याशंक्याह॥ ॥

निमित्तमिति॥ सत्यमात्मा यः सकलजगत्प्रपंचाविर्भावे विद्यासमावेशात्समवाय्यसमवायिनिमित्तमि
त्येवं स्वरूपमेव त्रिविधमपि कारणं॥ न पुनः कार्यकोटिनिविष्टः यस्मादहंकारो विनश्वरः॥ ननु सत्त्वादिगुणविका
रस्य सुखदुःखमोहात्मकस्य कार्यभूते जगत्प्रपंचे दर्शनात्तद्गुणवत्त्वात्प्रकृतेरेव तु जगत्कर्तृकतोचिता न पुन
र्निर्गुणस्य ब्रह्मणः। मैवं मंस्थाः॥ आत्मैव कर्ता यस्मात्सो जीवापन्नोऽप्यसुखदुःखहेतुभूतादृष्टादेर्बोधायप्र
वर्त्तनायाः प्रकृतेर्नामरूपव्याकृतविचित्रभोक्तृवर्गभोगानुकूलत्वेनाप्यनेकायतनादियोगि निर्जगत्प्रपं
चरचना घटते। तस्मादात्मैव कर्ता स एव ब्रह्मस्तंडको विस्तारकः॥ न चासौ निर्गुणो यतस्तस्य निर्गुणस्या

निमित्तमक्षरः कर्ता बोद्धा ब्रह्म गुणी वशी॥ अजः शरीरग्रहणात्स जात इति कीर्त्यते॥१५॥ ॥

शक्तिरविद्या प्रकृतिप्रधानाद्यपरपर्याया विद्यते॥ अतः स्वतो निर्गुणत्वेऽपि शक्तिमुखेन सत्त्वादिगुणयोगी क
थ्यते। न चैतावता प्रकृतेः कारणता। यस्मादात्मैव शक्तिस्वतंत्रो न प्रकृतिर्नाम स्वतंत्रं तत्त्वांतरं तादृग्विधत्वे प्रमाणा
भावात्। न च वक्तव्यं शक्तिरूपापि सैव कर्त्री भवतीति॥ यतः शक्तिमत्कारकं न तु शक्तिः। तस्मादात्मैव जगतो निमि
त्तमपि कारणं॥ तथाजत्वं निरहितः अतस्तस्य यद्यपि साक्षीत्वेन जननं नोपपद्यते तथापि शरीरग्रहणमा
त्रेण जात इत्युच्यते अवस्थांतरयोगितया सन्निरूढो जात इति वत्॥१५॥ ॥

शरीरस्यारंभणप्रकारमाह॥ सर्गादाविति॥ सृष्टिसमये परमात्मा यथा आकाशादीन्॥ शब्दैकगुणं गगनं॥ शब्द
स्पर्शगुणः पवनः॥ शब्दस्पर्शरूपगुणं तेजः॥ शब्दस्पर्शरूपरसवदुदकं॥ शब्दस्पर्शरसगंधगुणा जगती॥ एवमेको
त्तरगुणान् सृजति॥ तथात्मा जीवनीवमापन्नो न त्वनुलक्ष्यमाणोऽपि स्वशरीरस्यारंभकत्वेनापि तानुपादत्ते॥

सर्गादौ स यथाकाशं वायुं ज्योतिर्जलं महीं॥ सृजत्येकोत्तरगुणांस्तथादत्ते भवन्नपि॥१६॥
आहुत्याप्यायते सूर्यस्तस्माद्वृष्टिरथौषधीः॥ तदन्नं रसरूपेण शुक्रत्वमुपगच्छति॥१७॥

ताति॥१६॥ कथं शरीरारंभकत्वं वृष्टिपृथिव्यादीनामित्यत आह॥ आहुतीति॥ यजमानेनाग्नौ प्रक्षिप्तया आहुत्या पुरो
डाशादिरसेनाप्याय्यते सूर्यः॥ सूर्याच्च कालवशेन परिपक्वात् दिवि रसाद्वृष्टिर्भवति॥ ततो व्रीह्याद्योषधी
रूपमन्नं॥ तच्चान्नं सेवितं रसरुधिरादिक्रमेण शुक्रशोणितरूपतामापद्यते॥१७॥ ततः किमित्यत आह॥ स्त्रीपुंस
योरिति॥

ऋतुवेलायां स्त्रीपुंसयोः संयोगे शुक्रं च शोणितं च शुक्रशोणितं तस्मिन् परस्परं संयुक्ते॥ विशुद्धे वातपित्तश्लेष्मदु
ष्टत्र्येऽपि शुक्लीणमूत्रपुरीषगंधी रेतांस्यबीजानीति स्मृतस्तद्रोगदोषरहिते तस्मिन् स्थिता पंचधीकृतपृथिव्यादिपं
चमहाभूतानि शरीरारंभकतया स्वयं षष्ठः विधातुरात्माप्यनुः शरीरारंभकारणादृष्टकर्मयोगितया समर्थे
तानि निशरीरारंभकतया स्वीकरोति॥ तथा तच्छरीरके॥ स्त्रीपुंसयोः संयोगे योनौ रजसा निसंसृष्टं शुक्रं तद्
युगपदादत्ते॥

स्त्रीपुंसयोश्च संयोगे विशुद्धे शुक्रशोणिते॥ पंचधातून् स्वयं षष्ठ आदत्ते युगपत्प्रभुः॥१८॥
इंद्रियाणि मनः प्राणो ज्ञानमायुः सुखं धृतिः॥ धारणा प्रेरणं दुःखमिच्छाहंकार एव च॥१९॥

णामेव सदत्त्वात्मना गुणोऽश्च सत्त्वरजस्तमोभिः सह वायुना प्रेर्यमाणो गर्भाशये तिष्ठति॥१८॥ किंच इंद्रिया
णि॥ इंद्रियाणि ज्ञानकर्मेंद्रियाणि वक्ष्यमाणानि मनश्चोभयसाधारणं॥ प्राणोऽपानव्यानउदानसमानस्तेषां
पंचवृत्तिर्निदर्शनेदर्शितं॥ शारीरो वायुः॥ ज्ञानमवगमः॥ आयुः कालविशेषावच्छिन्नं जीवनं॥ सुखं निर्वृतिः॥
प्रितस्य स्मृतौ यः॥ धारणा प्रज्ञानमेधा॥ प्रेरणं ज्ञानकर्मेंद्रियाणामधिष्ठातृत्वं॥ दुःखं द्वेषः॥ इच्छा स्पृहा॥ अहंकारोऽहं
कृतिः॥१९॥

मि॰ प्रा॰ ५२ प्रयत्न इति ॥ प्रयत्नः कृतिः । आकृतिराकारः । वर्णो गौरिमादिः । स्वरः स्वरवज्ञौ गांधारादिः । द्वेषो वैरं । भवः पुत्रपश्वादिविभ-
वः । अभवस्तद्विपर्ययः । तस्यानादेरात्मनो निमित्सया आदिमिच्छतः । शरीरं जिघृक्षमाणस्य सर्वमेतदिन्द्रियादिकं कर्माभि-
जनितं प्राक्तनबीजकर्मबीजजन्यमित्यर्थः ॥२०॥ संयुक्तशुक्रशोणितस्य कार्यरूपपरिणतिक्रममाह । प्रथमे इ-
ति । असौ चेतनः षष्ठो धातुर्धातुविमूर्छितः । धातुपृथिव्यादिषु मूर्छितो ऽलीनः ततः क्षीरनीरवदेकीभूतः

प्रयत्नः आकृतिर्वर्णः स्वरद्वेषौ भवाभवौ । तस्यैतदात्मजं सर्वमनादेरादिमिच्छतः ॥२०॥
प्रथमे मासि संक्लेदभूतो धातुविमूर्छितः । मास्यर्बुदं द्वितीये तु तृतीयेंगेन्द्रियैर्युतः ॥२१॥

ति यावत् । प्रथमे मासि संक्लेदभूतो द्रवरूपतां प्राप्य व्यवतिष्ठते । न कठिनकं । न तथा परिणमते । द्वितीये तु मा-
स्यर्बुदं ईषत्कठिनं मांसपिण्डरूपी भवति । अयमत्राभिप्रायः । कोष्ठप्रपवनं जठरदहनाभ्यां प्रतिदिनमापचीय- त्रिं॰
मानस्य शुक्रसंपर्कायादिनद्रवी भावं नूतनजातं विगलद्भिरिन्द्रियैः कानिच्चमासापघन इति । तथा च सुश्रुतो द्वितीये ५२
शीतोष्णानिलैरभिपच्यमानानां भूतसंघातो घनो जायत इति । तृतीये मास्यंगेन्द्रियैश्च संयुक्तो भवति ॥२१॥ ॥

किं च । आकाशादिति । आत्मा गृह्णाति सर्वत्र संबध्यते । गगनाल्लघिमानं लघनक्रियोपयोगितां । सौक्ष्म्यं सूक्ष्म-
त्वं । शब्दमिति तद्गुणं शब्दं विषयं । श्रोत्रं श्रवणेंद्रियं । बलं दार्ढ्यं । आदिग्रहणात् सुषिरत्वं विविक्तता च । आकाशाच्छ-
ब्दः श्रोत्रं विविक्तता च सर्वेंद्रियसमूहो वा । लिंगं न पनिषद्दर्शनात् । पवनात् स्पर्शेन्द्रियं चेष्टां गमनागमनादिकां व्यूह-
नमंगानां विधं प्रसारणं । रौक्ष्यं कर्कशत्वं च वात्वात्मकत्वं नित्वं च । पित्तात्तेजसो दर्शनं चक्षुरिंद्रियं पक्तिर्भुक्तस्यान्न-

आकाशाल्लाघवं सौक्ष्म्यं शब्दं श्रोत्रं बलादिकं । वायोस्तु स्पर्शनं चेष्टां व्यूहनं रौक्ष्यमेव च ॥२२॥ पित्तात्तु दर्श-
नं पक्तिमौष्ण्यं रूपं प्रकाशितां । रसात्तु रसनं शैत्यं स्नेहं क्लेदं समार्दवं ॥२३॥ भूमेर्गंधं तथा घ्राणं गौरवं मूर्तिमे-
व च । आत्मा गृह्णात्यजः सर्वं तृतीये स्पंदते ततः ॥२४॥ ॥

संपचनं । औष्ण्यमुष्णस्पर्शत्वं । अंगानां रूपं गौरश्यामादिप्र-
काशतां भ्राजिष्णुतां । तथा संतापामर्षादि च । शौर्यामर्षतैक्ष्ण्यपंक्तौ(?) भ्राजिष्णुता संतापश्च वर्णरूपेन्द्रिया-
णि तैजसानीति गर्भोपनिषद्दर्शनात् । एवं रसादुदकाद्रसनेन्द्रियं । शैत्यं संगानां स्निग्धतां मृदुत्वं मार्दवं क्लेदं सा-
र्द्रत्वं । भूमेर्गंधं घ्राणेंद्रियं गरिमाणं मूर्तिं । सर्वमेतत् परमात्मा जन्मरहितो ऽप्याह्यमासि(?) गृह्णाति ततश्चतु-
र्थे मासि स्पंदते चलति । तथा च शारीरके । तस्माच्चतुर्थे मासि चलनादावभिप्रायं करोति ॥२२॥२३॥२४॥ ॥

शा०पू० ५३ किंच ॥ दौहृदमिति ॥ गर्भस्यैव हृदयं गर्भिण्याश्चापरमित्येवं द्विहृदयायाः स्त्रियाः यदभिलषितं तद्दौहृदं ॥ तस्याप्रदाने न गर्भो वैरूप्यतां मरणं स्वरूपं वा दोषं प्राप्नोतीति ॥ तस्मात्तद्दोषपरिहारार्थं च गर्भिण्याः स्त्रियाः यत्प्रियमभिलषितं तत्संपादनीयं ॥ तथा च सुश्रुते द्विहृदनारीं दौहृदिनीमाचक्षते तदभिलषितं दद्यात् वीर्यवन्तं चिरायुषं पुत्रं जनय तीति ॥ तथा व्यायामादिकमपि गर्भिण्या दूरतस्त्यक्तव्यं तथा परिहरणीयं ॥ ततः प्रवृत्ती व्यायामव्यवायादिनिर्घृणा

दौहृदस्याप्रदानेन गर्भो दोषमवाप्नुयात् ॥ वैरूप्यं मरणं वापि तस्मात्कार्यं प्रियं स्त्रियाः ॥२५॥
क्षिपेच्च तुर्ये वा गर्भः पञ्चमे त्वग्निनोद्भवः ॥ षष्ठे बलस्य वर्णस्य नखरोम्णां च संभवः ॥२६॥

दिवास्वप्नरात्रिजागरणात् दिवास्वप्नरात्रिजागरणशोकनयोनारोहणवेगधारणकुक्कुटासनशोणितमोक्षणा निपरिहरेदिति तत्रैवाभिधानात् ॥ गर्भस्य हृदयं च क्रमादिति निर्गतं वक्तव्यं ॥ मध्यागृहीतगर्भायाः श्रमो ग्लानि पिपासा मस्तिष्कस्पन्दनं शुक्रशोणितयोरवबन्धः स्फुरणं च योन्या इत्यादि तत्रैवोक्तं ॥२५॥ किंच ॥ स्थैर्यमिति ॥ तृ तीयमासि प्रादुर्भूतस्यांगस्य चतुर्थमासि स्थैर्यं स्यात् ॥ पंचमे रक्तमांसोपचयः ॥ तथा षष्ठे बलवर्णो नखरोमाणि च संभवंति ॥२६॥

शि०पू० ५३

किंच ॥ मनइति ॥ आत्मा पूर्वोक्तो गर्भः सप्तमे मासि मनसा चेतनया च युक्तो नाडीभिर्वायुवाहिनीभिः स्नायुभिरस्थि बंधनैः शिराभिर्वातपित्तश्लेष्मवाहिनीभिश्च संयुक्तः ॥ तथा चाष्टमे मासि त्वचा मांसेन स्मृत्या च युक्तो भवति ॥२७ ॥ किंच ॥ पुनरिति ॥ तस्याष्टममासिकस्य गर्भस्य गर्भाज्जातस्य कस्यचनगुणविशेषो धात्री गर्भं च प्रतिपुनः पुनरतिसंचरं च लनया त्वोजो गच्छति ॥ अतो ह्यष्टमे मासि जातो गर्भः प्राणैर्विमुच्यते ॥ अनेन नैौजः स्थितिरेव जीवनहेतुरिति दर्शयति

मनश्चेतनयुक्तो सोनाडीस्नायुशिराधुतः ॥ सप्तमे चाष्टमे चैव त्वङ्मांसस्मृतिमानपि ॥२७॥ पुनर्धात्रीं पुनर्गर्भं मोजस्तस्य प्रधावति ॥ अष्टमे मासि तो गर्भो जातः प्राणैर्विमुच्यते ॥२८॥ नवमे दशमे वापि प्रबलैः सूतिमारुतैः ॥

ततः स्वरूपं स्पष्टं नरैर्दृश्यते ॥ हरिद्रितिष्ठतिपच्छ समीपदुष्टमपीतकं ॥ ओजः नारी शेषविख्यातं तस्मात्तस्मात्तद्गच्छ ति ॥२८॥ किंच ॥ नवमे इति ॥ एवं करचरणचक्षुरादि परिपूर्णांगेन्द्रियो नवमे दशमे वापि मासि अपि प्रावृद्धा वाग पि मग्नमेवाशा यामादि दोषवशात्तवश्च तिहेतु प्रसवजनप्रेरितः ॥ स्वाधस्थित मर्दितिर्मित्तवपुर्यन्त्रस्यच्छिद्रेण सुस्वरूपमसुसुपरिणामलक्षणाराकुश्वाः

सि०व्रा० ५४ निर्ह्रियमाणोनिःसार्यते॥धनुर्यंत्रेणसुधन्वप्रेरितबाणइवातिवेगेन॥निर्गमनसमनंतरंचबाह्यपवनस्पर्शेन
ष्टप्राचीनस्मृतिर्नष्टविज्ञानः॥सवायुनास्पृष्टोनस्मरतिपूर्वजन्ममरणं॥कर्मचशुभाशुभमितिनिरुक्तस्याष्ट
मेःनिधानात्॥२८॥कायस्वरूपंविवृण्वन्नाह॥तस्मेति॥तस्मात्मनोमानिजगयुक्तोऽजन्नशरीराणितानि
त्येकंषट्प्रकाराणिरक्तादिषट्धातुपरिपाकहेतुभूतषडग्निस्थानयोगित्वेन॥तयासन्नरसोजाठ
रेणाग्निनापरिपच्यमानोरक्तत्वंप्रतिपद्यते॥रक्तंचस्वकोशस्थाग्निनापच्यमानंमांसत्वं॥मांसंचस्वकोश

निःसार्यतेबाणइवयंत्रच्छिद्रेणसत्वरः॥२९॥त
स्यषोडशरीराणिषट्त्वचोधारयंतिहि॥ ॥

स्थपरिपरिपक्वंमेदस्त्वं॥मेदोपिस्वकोशवह्निनापक्वमस्थित्वमस्थ्यपिस्वकोशाग्निपरिपक्वंमज्जत्वम शि०व०
ज्जापिस्वकोशपावकपरिपच्यमानोचरमधातुतयापरिणमते॥चरमधातोस्तुपरिणतिर्नास्तीतिसएवा ५४
त्मनःप्रथमःकोशइत्येवंषट्कोशाग्नियोगित्वात्॥षट्प्रकारत्वंशरीराणां॥अन्नरसरूपस्यतुप्रथमधातोर
नियतत्वात्तेनेनप्रकारान्तत्वं॥तानिच्छरीराणिषट्त्वचोधारयंति॥रक्तमांसमेदोस्थिमज्जशुक्र॥ ॥ ॥

कास्याःषट्धातवएवशरीराणीतत्वगिवबाह्यांतररूपेणस्थितत्वात्त्वगिवाच्छादकत्वात्त्वचःताःषट्त्वचोधारयंतिमत
रिदमायुर्वेदप्रसिद्धं॥तथा॥शिरपादेचकरयुग्मंचरणयुगलमुत्तमांगंगात्रमिति॥अस्थ्नांतुषष्ट्यधिकंशतत्रयमुप
रितनषट्श्लोकावक्ष्यमाणमवगंतव्यं॥३०॥किंच॥स्थालैरिति॥स्थालानिदंतमूलप्रदेशास्थानस्थीनिदंतानिद्वा
त्रिंशत्तुःषष्टिर्भवंति॥नखाःकररुहाविंशतिःहस्तपादस्थिताःनित्रालाकाकारएपस्थीनिमणिबंधस्योपरिवस्थानि

षडंगानितथास्थ्नांचसहषष्ठ्याशतत्रयं॥३०॥स्थालैःसहचतुःषष्टिर्दंतावैविंशतिः
नखाः॥पाणिपादशलाकाश्चतेषांस्थानचतुष्टयं॥३१॥षष्ट्यंगुलीनांद्वयोर्गुल्के
षुचचतुष्टयं॥चत्वार्यरत्निकास्थीनिजंघयोस्तावदेवतु॥३२॥ ॥

गुलीमूलस्थानीविंशतिरेवतेषांनखानांशलाकास्थ्नांचतत्स्थानचतुष्टयं॥द्वौचरणौकरौचेत्येवमस्थ्नांचतुस्
तरंशतं॥३१॥किंच॥षष्ट्यामिति॥विंशतिरंगुलयस्तासामेकैकस्यास्त्रीणित्रीणीत्येवमंगुलीमध्यानस्थीनिषष्टि
र्भवंति॥पादयोःपश्चिमोभागःपार्ष्णीतयोरस्थिस्थितिर्द्वे॥एकैकस्मिन्पादेद्वाविंशत्येवंचतुर्षुगुल्फेषुचचत्वार्यस्थी
निकाकोररत्निर्विभ्रमाणानिचत्वार्यस्थीनिजंघयोस्तावदेवचत्वार्येवइत्येवंचतुःसप्ततिः॥३२॥ ॥

किंच ॥ देहे स्थिताः ॥ जंघोरुसंधिर्जानु ॥ कपोलौ गल्लौ ॥ ऊरुः सक्थि तत्फलकं ॥ अंसो भुजशिरः ॥ स्कंधः कर्णनेत्रयोर्म
ध्ये शंखास्त्रधा नागाः तालुपर्यंककुदं श्रोणी कटिः तत्फलकं ॥ तेषामेकैकत्वे स्थिते देहे विनिर्दिशेत् ॥ एवं चतु
र्दशास्थीनि भवंति ॥ ३३ ॥ किंच ॥ नगेति ॥ गुदास्थ्येकं ॥ पृष्ठे पश्चिमे भागे पंचचत्वारिंशदस्थीनि ॥ ग्रीवा कंधरा
सा पंचदशास्थि भवेत् ॥ वक्षोंऽसयोः संधिर्जत्रुः स विजते एकैकं हनुश्चिबुकं तत्राप्येकमस्थि ॥ एवं चतुष्प

देहे जानुकपोलोरुफलकांससमुद्भवे ॥ अक्षतालूषके श्रोणिफलके चैव निर्दिशेत् ॥ ३३ ॥
नागास्थ्येकं तथा पृष्ठे चत्वारिंशाच्च पंच च ॥ ग्रीवा पंचदशास्थिः स्यात् जत्र्वेकं हि यथा हनुः ॥ ३४ ॥
तन्मूले द्वे ललाटाक्षिगंडे नासा घनास्थिका ॥ पार्श्वकाः स्थालकैः सार्धमर्बुदैश्च द्विसप्तति ॥ ३५ ॥

ष्टिः ॥ ३४ ॥ किंच ॥ तन्मूले निगतस्पंदेनोर्ध्वे द्वे अस्थिनी देहे ललाटं भालं अक्षि चक्षुः गंडः कपोलः द्वयोर्मध्यप्रदेशः तेषां
समाहारो ललाटाक्षिगंडं तत्र प्रत्येकमस्थि चतुर्गुणं ॥ नासा घ्राणसंज्ञिका अस्थिमती ॥ पार्श्वका कक्षाधः प्रदेशसंबंधी
न्यस्थीनि तदाधारभूतानि स्थालकानि तैः स्थालकैरर्बुदैश्चास्थिविशेषैः सह पार्श्वकादिसप्ततिः पूर्वोक्तैः सह भवंति सा
र्धमकाशीतिर्भवंति ॥ ३५ ॥ ॥

किंच ॥ द्वाविति ॥ भ्रुवोः कर्णयोर्मध्यप्रदेशे स्थितावस्थिविशेषौ शंखकौ ॥ शिरसः संबंधीन्यस्थीनि चत्वारि कपालानि ॥ उरो
वक्षः तत्सप्तदशास्थिकमित्येवं त्रयोविंशतिः पूर्वोक्तैः सह द्व्यधिकशतत्रयमित्येवं पुरुषस्यास्थिसंग्रहः कथि
तः ॥ ३६ ॥ स विषयाणि ज्ञानेंद्रियाण्याह ॥ गंधेति ॥ एते गंधादयो विषया विषयाः पुरुषसंबंधनहेतवः ॥ विषयत्वा
त्स्पर्शस्यापि च संबंधनहेतुत्वात् ॥ एतेषु गंधादिनिर्बोध्यत्वेनाप्यवस्थितेः स्वस्वगोचरं संनिकृष्ट्या धनत

द्वौ शंखकौ कपालानि चत्वारि शिरसस्तथा ॥ उरः सप्तदशास्थीनि पुरुषस्यास्थिसंग्रहः ॥ ३६ ॥
गंधरूपरसस्पर्शशब्दाश्च विषयाः स्मृताः ॥ नासिका लोचने जिह्वा त्वक्श्रोत्रं चेंद्रियाणि च ॥ ३७ ॥
हस्तौ पायुरुपस्थं च जिह्वापादौ च पंच वै ॥ कर्मेंद्रियाणि जानीत मनश्चैवोभयात्मकं ॥ ३८ ॥ ॥

यानुमेयानि घ्राणादीनि पंचेंद्रियाणि भवंति ॥ ३७ ॥ कर्मेंद्रियाण्यपि तु माह ॥ हस्ताविति ॥ हस्तौ प्रसिद्धौ
पायुर्गुदं उपस्थं रतिसंपादकसुखसाधनं जिह्वा प्रसिद्धा पादौ च ॥ एतानि हस्तादीनि पंचकर्मेंद्रियाणि आदान
निर्गमानंदव्याहारविहारादिकर्मसाधनानि जानीयात् ॥ मनोंतःकरणं पुरुषस्य ज्ञानानुसंधानगमं तच्च बु
द्धिकर्मेंद्रियसहकारित्वादुभयात्मकं ॥ ३८ ॥ ॥ ॥

शि॰प्र॰ ५६

प्राणायतनानि दर्शयितुमाह ॥ नानीति ॥ नानि प्रवृत्तानि दश प्राणस्यायतनानि स्थानानि ॥ समानत्वात् पवनस्य सम
कलांगसंचारित्वेपि नाम्यादिस्थानविशेषवत्वादित्युक्तिः धातुपर्यनिरूपणे ॥ प्राणायतनानि प्रपंचयितुमाह ॥ ३८ ॥
वयेति ॥ वपा प्रसिद्धा वसा मांसस्नेहः ॥ अवहननं फुप्फुसः नाभिः प्रसिद्धः क्लोम हृत्समीपे वर्तमानः प्रसिद्धा ॥ नौ तु मांसपिंडा
करौ सव्यकुक्षिगतो यकृत्कालिका ॥ क्लोम मांसमयपिंडः ॥ तो दक्षिणकुक्षिगतो ॥ क्षुद्रांत्रं क्षुद्रस्थांत्रं ॥ वृक्कौ क्रूरम

नानि स्युस्तद्दशकं शंखौ मर्मत्रयं गलः तथा ॥ मूर्धा मज्जकं हृदयं प्राणस्यायतनानि तु ॥ ३९ ॥
वपा वसावहननं नाभिः क्लोमयकृत्प्लिहा ॥ क्षुद्रांत्रं वृक्कौ बस्तिः पुरीषाधानमेव च ॥ ५० ॥
आमाशयोथ हृदयं स्थूलांत्रं गुदमेव च ॥ उदरं च गुदौ कोष्ठौ विस्तारोयमुदाहृतः ॥ ५१ ॥ ॥

मीपस्थौ मांसपिंडौ ॥ बस्तिर्मूत्राशयः पुरीषाधानं पुरीषाशयः ॥ ५० ॥ आमाशयो पक्वान्नस्थानं ॥ हृदयं हृत्सुंदरि
कं ॥ स्थूलांत्रं गुदोदीरणप्रसिद्धानि ॥ वा बाह्यगुदवलयः पादं तत् गुदवलयेद्वौ तत् गुदौ कोष्ठौ कोष्ठेनान्तरधः प्रदेशौ तौ
अनयैव प्राणायतनस्य विस्तारः कः पूर्वश्लोके तु संक्षेपः ॥ अतएव पूर्वश्लोकोक्तानां केषांचिदिह पाठः ॥ ५१ ॥ शि॰प्र॰ ५६

पुनः प्राणायतनप्रपंचमाह ॥ कनीनिके इति ॥ कनीनिके अक्षितारके अपांगे अक्षिकटौ अक्षिनासासंधी ॥ शष्कुलीक
र्णशष्कुली कर्णपत्रकौ कर्णपाल्यौ ॥ दंतवेष्टौ दंतपाल्यौ ॥ ककुंदरौ जघनकूपकौ ॥ वंक्षणौ जघनोरुसंधी ॥ वृक्कौ
पूर्वोक्तौ ॥ स्तनौ च श्लेष्मसंघातजौ ॥ उपजिह्वा घंटिका ॥ स्फिजौ कटिप्रोथौ ॥ जंघोरुयुक्तपिंडिका जंघयोरूर्ध्वस्थ
पिंडिकामांसलप्रदेशः ॥ गलशुंडिके हनुमूलगलयोः संधी ॥ शीर्षशिरः अवटः शरीरे यः कश्चन निम्नो देशः ॥ कं

कनीनिके चापांगे शष्कुली कर्णपत्रकौ ॥ गंडौ भ्रुवौ तथा दंतवेष्टावोष्ठौ ककुंदरौ ॥ ५२ ॥
वंक्षणौ वृषणौ वृक्कौ श्लेष्मसंघातजौ स्तनौ ॥ उपजिह्वा स्फिजौ बाहू जंघोरुयुक्तपिंडिका ॥ ५३ ॥
तालूदरं बस्तिशीर्षं चिबुकं गलशुंडिके ॥ अवटश्चैवमेतानि स्थानान्यत्र शरीरके ॥ ५४ ॥
अक्षिवर्म चतुष्कं च पदहस्तहृदयानि च ॥ नव छिद्राणि तान्येव प्राणस्यायतनानि च ॥ ५५ ॥ ॥

मूलकंठादि ॥ अवटुरिति पाठे कृकाटिका ॥ तथा स्त्रीणां कनिष्ठयोः प्रत्येकं द्वे द्वे पार्श्वद्वयमिति वर्म चतु
ष्कं पदादि पृथक्चतुष्टयं तत्प्रसिद्धं ॥ एतानि कुक्षिते शरीरे स्थानानि ॥ तथा अक्षियुगं कर्णयुगं नासाविवरद्वयं
आस्यं पायुरुपस्थमिति ॥ एतानि पूर्वोक्तानि नव छिद्राणि च प्राणस्यायतनान्येव ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ॥ ॥

मि०ग्रा० ५७

किंच ॥ सिरेति ॥ सिराणां सप्तैव शतानि संख्याः वातपित्तश्लेष्मवाहिन्यः सकलकलेवरव्यापिन्यो नानाप्रकारास्ताः सप्तशतसंख्या भवंति ॥ तथांगप्रत्यंगसंधिबंधनाः स्नायवो नवशतानि ॥ धमन्यो नाम नाभिरूढाश्चतुर्विंशतिसंख्याः प्राणादिवायुवाहिन्यः ताः स्थाने स्थाने द्वे शते भवतः ॥ पेश्यः पुनर्मांसखंडाकाराः कुरुपिंडिकाद्यंगप्रत्यंगसंधिस्थाः पंचशतानि भवंति ॥४६॥ पुनश्च सामान्यशरीराणां नाडीनां प्राचुर्येण संख्यानमाह ॥

सिराः शतानि सप्तैव नव स्नायुशतानि च ॥ धमनीनां शते द्वे तु पंच पेशीशतानि च ॥४६॥
एकोनत्रिंशल्लक्षाणि तथा नवशतानि च ॥ षट्पंचाशच्च जानीहि सिराधमनिसंज्ञिताः ॥४७॥
॥ त्रयो लक्षास्तु विज्ञेयाः श्मश्रुकेशाः शरीरिणां ॥ सप्तोत्तरं मर्मशतं द्वे च संधिशते तथा ॥४८॥

एकेति ॥ सिराधमन्यो मिलिताः सत्यः स्थौल्येन एकोनत्रिंशल्लक्षाणि ॥ तथा नवशतानि षट्पंचाशच्चैवं ति ॥ इत्येवं देशमात्रव्यवहृतये मुनयो जानीत ॥४७॥ किंच ॥ त्रय इति ॥ शरीरिणां श्मश्रुणि केशाश्च मिलिताः संतः त्रयो लक्षा विज्ञेयाः ॥ मर्माणि मरणकराणि स्थानानि तेषां सप्तोत्तरं शतं विज्ञेयं ॥ अस्थ्नां तु द्वे संधिशते स्थायुसिरादिसंधयः पुनरनंताः ॥४८॥ ॥

स... शरीरस्य सिरादिसंख्यामाह ॥ रोम्णामिति ॥ वायवीये विरलयंते ॥ विनष्टाः पंचमात्रा ॥ मध्ये कोटिद्वये पंचाशच्चैव संस्थितिः ॥ पूर्वोदितसिराकेशादिसहितानां रोम्णां परमाणवः सूक्ष्मसूक्ष्मतररूपा रागाः स्वेदस्रावणमुखैः सह चतुःपंचाशत्कोट्यः तथा सप्तोत्तरषष्टिर्लक्षाः सार्धाः पंचाशत्संख्यासहिताः वायवीयैर्विनाकैः पवनपरमाणुभिः पृथक्कृता विरलयंते ॥ एतच्च शास्त्रदृष्ट्या निहितं चक्षुरादिकरणपथगोचरत्वात् ॥

रोम्णां कोट्यस्तु पंचाशच्चतस्रः कोट्य एव च ॥ सप्तषष्टिस्तथा लक्षाः सार्धाः स्वेदायनैः सह ॥४९॥
रसस्य नव विज्ञेया जलस्यांजलयो दश ॥ सप्तैव तु पुरीषस्य रक्तस्याष्टौ प्रकीर्तिताः ॥५०॥ ॥

यात्र ॥ अस्यार्थस्य चरमस्य तिरगंडनमर्थं सिरादिनावसंस्थानरूपेण मुनयो नवनां मध्ये यत्किंचित्तत्स्वतंत्रविहितोऽपि महान् ... बुद्धिमतापदत्तो बोधव्यानावसंस्थितिः ॥४९॥ शरीरस्थितरसादिपरिमाणमाह ॥ रसस्येति ॥ रसस्य रिति नाडीरसस्य परिमाणं नवांजलयः पार्थिवपरिमाणसंक्षेपविमिश्रस्य जलस्यांजलयो दश विज्ञेयाः ॥ पुरीषस्य तद्वदस्य सप्तैव रक्तस्य जाठराग्निपरिपाकपरितलोहितस्यांजलिमानस्याष्टावंजलयः प्रकीर्तिताः ॥

टी० ५७

सि०प्रा० ५८

श्लेष्मणः कफस्य षडंजलयः पित्तस्य तेजसः पंच मूत्रस्य चत्वारः वसायाः मांसस्य हृस्यत्रयः मेदसोपमस्य
सस्य द्वावंजली शुक्रा तु स्त्रिया परिगतः तस्यैकोंजलिः मस्तके पुनरर्धांजलिः मज्जा श्लेष्मोन मस्तिष्कमार
स्त तयोरमः चरमे धातोस्ताव एवांजलिरेव एतस्य समधातु पुरुषस्य निश्चायेण ज्ञं विषमधातोस्तु न नियम
वैषम्यत्वाच्छरीराणां मध्यापि वातत्वं च दोषधातुमलानां च परिमाणं निर्दिष्टं अतः पूर्वं दृश्यारस्यान्तः अति

षट्श्लेष्मा पंच पित्तं च चत्वारो मूत्रमेव च धमन्यो द्वे तु मेदो मज्जे कार्धं तु मस्तके ॥५१॥
श्लेष्मोत मस्ताव देवरेतस्स्ताव देव तु ॥ इत्येतदस्थिरं सर्वं यस्य मोहाय कस्य सौ ॥५२॥ ॥

रूपमस्थिरमाद्यायां धर्मेतदस्थिनिधानं वर्षास्थिरमिति यस्य बुद्धिस्सो कृती पंडितो मोहायस्स मर्थो न भवति
वैराग्यनित्यानित्यविवेकयोगो हेतोपायत्वात् अस्थिमूत्रपुरीषादिज्ञात्तु र्ज्ञानस्य वैराग्यहेतुत्वात् अ
त एव सा मसः सर्वस्थि निनिधानस्य च घस्य विनाशिनः शरीरस्यापि कृते मूढाः पापानि कुर्वन्ति यदि नाम
स्य ... सयदं तस्तु हि निवेतादंडमारायलोको पंडिनः कांत्स्वयं दिति गतस्य स्मादिन प्रक्रमितना
तकचिन्त सर्वमात्मोपासने प्रयतितव्यं ॥५३॥ ॥

शि०प० ५८

रूपासनायात्मनः स्वरूपमाह एवमाह इति ॥ हृदयपुंडरीकादेशादिनिनिःसृताः कदंबकुसुमकेसरवत्सर्वतोदिक् सता
निर्गता हिताहितकरत्वेन हिताहितकरणसंज्ञा द्वासप्ततिसहस्राणि नाड्यो भवंति अपरास्तिस्रो नाड्यः नासा
मिडा पिंगलाख्ये द्वे नाड्यौ मस्तकदक्षिणपार्श्वगते हृदि विपर्यस्ते नासाविवरसंबद्धे प्राणापानाय तेने सुषुम्ना
ख्या पुनस्तृतीया दंडवन्मध्ये ब्रह्मरंध्रनिर्गतानां सानाडीनां मध्ये मंडलं चंद्रप्रभेनास्मिन्नात्मा नि वातदीपवत्

द्वासप्ततिसहस्राणि हृदयादि निनिःसृताः ॥ हिताहिता नामनाड्यस्तासां मध्ये शशिप्रभं ॥५३॥
मंडलं तस्य मध्यस्थ आत्मा दीपवदचलः ॥ सतं यस्तं विदित्वैव पुनराजायते न तु ॥ ५४ ॥ ॥
ज्ञेयं चारण्यकर्मैदं यद्वादि स्मारवाप्नुयात् ॥ योगशास्त्रं च मस्तोक्तं ज्ञेयं योगमनीषिणा ॥ ५५ ॥

तैः प्रकाशमानस्त्वास्ते ॥ सएवं ज्ञातो ज्ञातव्यः ॥ यस्तमात्मानं ज्ञात्वाद्वैत संसारे न पुनः संसरति अमृतत्वं च
प्राप्नोति ॥ ५४ ॥ किंच ॥ ज्ञेयमिति ॥ चित्तवृत्ते विषयांतरसंस्कारे आत्मनि स्थैर्ययोगस्तत्प्राप्त्यर्थमयायं हृदाराग्य
ण्यकारण्यमादित्यात्वा अंतर्ज्ञातव्यं ॥ तथायस्य योक्तं योगशास्त्रं नदपितातव्यं ॥ ५५ ॥ ॥

कथं पुनरसावात्मा ध्यातव्य इत्यत आह ॥ अनन्यविषयमिति ॥ आत्मव्यतिरिक्तविषयेभ्यो मनो बुद्धिस्मृतीन्द्रिया-
णि प्रत्याहृत्यात्मैकविषयाणि कृत्वात्मा ध्येयः ॥ योसौ प्रभुर्निर्वातस्थप्रदीपवद्देदीप्यमानो निःकंपो हृदि तिष्ठ-
ति ॥ एतदेवं तस्य ध्येयत्वं यच्चित्तवृत्तेर्बहिर्विषयावनामतिरस्कारेणात्मप्रवणतया नामचारो वसंपुटलिंगद्वयमन्न-
वतानप्रसरस्यावप्रदीपस्येकनिष्ठत्वं यस्य पुनश्चित्तवृत्तेर्निराकारालंबनतयाप्यसमाधीना निरमते तेननादब्रह्मो-

अनन्यविषयं कृत्वा मनो बुद्धिस्मृतीन्द्रियं ॥ ध्येय आत्मा स्थितो योसौ हृदये दीपवत्प्रभुः ॥ ५६ ॥
यथाविधानेन पठन्सामगायमविच्युतं ॥ सावधानस्तदभ्यासात्परं ब्रह्माधिगच्छति ॥ ५७ ॥

पासनं कार्यमित्यत आह ॥ ५६ ॥ यथेति ॥ स्वाध्यायावगतमार्गानतिक्रमेण साम गायं गानं सामगानात्मकं ते-
पि गायमिति विग्रहो येषाम प्रगीतमंत्रवाद्यार्षं अविच्युतमस्खलितं सावधानः सामस्वनोस्वनुस्यूतान्मैकाग्र्य-
चित्तवृत्तिः संस्तदभ्यासवशात्तत्रनिष्णातः शब्दाकारब्रह्मोपासनेन परं ब्रह्माधिगच्छति ॥ तदुक्तं ॥ शब्दब्रह्म- शिव०
णि निष्णातः परब्रह्माधिगच्छति ॥ ५७ ॥ यस्य पुनर्वैदिकगीतेषु चित्तं न निरमते तेन लौकिकगीतोपासनं कार्यमि- ५८
त्याह ॥

अपरान्तकमिति ॥ अपरान्तकमुल्लोप्यमद्रकप्रकर्यौवेणुकानि सरोबिंदुकसहितं चोत्तरमित्येतानि प्रकरणा-
ख्यानि सप्तगीतकानि ब्रह्मादिकानारितवर्द्धमानकादिगीतकानि गृह्यंते ॥ ऋग्गाथाद्याश्च तस्रो गीतिका ऋक्षे-
तदपरान्तकादिगीतगानमध्यात्मचिंतामनावं मोक्षसाधनत्वान्मोक्षसंज्ञितं ज्ञातव्यं ॥ तदभ्यासेकाग्रतया-
दनवारेणात्मैकतापत्तिकारणत्वात् ॥ ५८ ॥ ५९ ॥ किंच ॥ वीणेति ॥ तत्त्वादिमुनिप्रतिपादितं वीणावेदनत-

अपरान्तकमुल्लोप्यं मद्रकं प्रकरी तथा ॥ औवेणकं सरोविंदुमुत्तरं गीतकानि च ॥ ५८ ॥
ऋग्गाथा पाणिका दक्षविहिता ब्रह्मगीतिका ॥ गेयमेतत्तदभ्यासकरणान्मोक्षसंज्ञितं ॥ ५९ ॥
वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः ॥ तालज्ञश्चाप्रयासेन मोक्षमार्गं नियच्छति ॥ ६० ॥ ॥

वादाश्च पतनशब्दं श्रुतिर्द्वाविंशतिविधा मन्द्रेषु ॥ तथा षड्जमध्यमपंचमाः स्वन्येकं चतुःश्रुतयः ऋषभधैवतौ त्रि-
श्रुतिकं त्रिश्रुतिगां धारनिषादौ द्विश्रुतिकौ द्विश्रुती इति ॥ जातयः षड्जाद्याः सप्तस्वरा ॥ संकरजास्तेका दश तानसमूह-
रूपा विधास्तास्तु विशारदः प्रवीणः ॥ तालइति गीतपरिमाणं कथ्यते ॥ तत्स्वरूपतश्च तदनुविन्नं ब्रह्मोपासनया
तालाविदिनगतया चित्तवृत्त्यैकाग्र्यतया सुकरत्वादप्रयासेनैव मुक्तिमार्गं नियच्छति प्राप्नोति ॥ ६० ॥

चित्तविक्षेपाद्यंतरायपदं तस्य गीतं तस्य फलं तत्र माह ॥ गीतज्ञ इति ॥ गीतज्ञो यदि कथंचित्परमं पदं न प्राप्नोति
तर्हि रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते क्रीडते ॥ ६१ ॥ पूर्वोक्तमुपसंहरति ॥ अनादिरिति ॥ प्रागुक्तरीत्या हि
नीरात्मा ब्रह्म तस्य च शरीरग्रहणमेवादिरूपत्वं कथितं ॥ अतः शरीरग्रहणादिरहितपरमात्मनः स्वप्रकाशा
त्मविद्यादिमलं लभते नुवनोद्भवः स्वर्गं तु नाप्यपि स्यादितु तमयान् ॥ जीवनानां स्थूलशरीरस्यापि सं नवक्ष कथित

गीतज्ञो यदि गीतेन नाप्नोति परमं पदं ॥ रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते ॥ ६१ ॥ अ
नादिरात्मा कथितस्तस्यादिस्तु शरीरकं ॥ आत्मनश्च जगत्सर्वं जगतश्चात्मसंभवः ॥ ६२ ॥ क
थमेतद्विमुह्यामः सदेवासुरमानुषं ॥ जगदुद्भूतमात्मा च कथं तस्मिन्वदस्व नः ॥ ६३ ॥ ॥

॥ सर्गादासमयात्कारणात्मिस्मादिना ॥ ६२ ॥ एतं च स्वतत्र पूर्वं किं विद्वांसो ॥ कथमिति ॥ पदेन तत्सकलसुरमनु
ष्यतुर्यादिसहितं जगत्तदात्मनः सकाशात्कथमुत्पन्नं ॥ आत्मा च तस्मिन् जगति कथं तिर्यगादिशरीररूपादि
शरीरतामवतिष्ठति ॥ एतस्मिन्वयं विमुह्यामः ॥ अतो मोहापनुत्यर्थमस्माकं विस्तरतो वदस्व ॥ ६३ ॥ ॥

॥ एवं मुनिभिः पृष्टः प्रत्युत्तरमाह ॥ मोहजालेति ॥ इदं जगति परिदृश्यमानकलेवरादावनात्मन्यात्माभिमानरूपं मो
हजालं तदपास्यानधुनिरिक्तो यः पुरुषोऽनेककरचरणलोचनः सूर्यवर्चा अनंतरश्मिः सहस्रकः सहस्रशि
राः स्वरूपतः ॥ एतच्च स्वशरीराणां चरणाद्याधारतयोच्यते ॥ तस्मात्साक्षात्कारादिसंबंधान्नात्र ॥ स एवात्मा यतः प्रजा
पतिश्च पतोसौ विश्वरूपः सर्वात्मकः वैश्वरूप्यमेव कथमिति चेत् ॥ यस्मादसौ विराजः पुरोडाशाद्यन्नरू

मोहजालमपास्येदं पुरुषो दृश्यते हि यः ॥ सहस्रकरपन्नेत्रः सूर्यवर्चाः सहस्रकाः ॥ ६४ ॥
स आत्मा चैव यज्ञश्च विश्वरूपः प्रजापतिः ॥ विराजः सोऽन्नरूपेण यज्ञत्वमुपगच्छति ॥ ६५ ॥
यो द्रव्यदेवतात्यागात्मस्तुतो रसजन्मनः ॥ देवान्संतर्प्य स रसो यजमानं फलेन च ॥ ६६ ॥ ॥

पेण यज्ञत्वमुपगच्छति ॥ यज्ञाच्च ब्रह्मादिद्वारेण प्रजासृष्टिरित्येवं वैश्वरूप्यं ॥ ६४ ॥ ६५ ॥ एतदेव प्रपंचया
ति ॥ य इति ॥ द्रव्यस्य च पुरोडाशादेर्देवतोद्देशेन त्यागो ॥ धर्मोऽदृष्टरूपमात्मनः परिणतं तरमुत्तमः ॥ सक
लजगज्जन्मबीजतयोत्कृष्टतमः संभूतः संभूतः स देवान्संप्रदानकारकभूतान्सम्यक्प्री ॥ णयित्वा यज

सि० गी०
६१

स्नानं चानिलखितरलेन संयोज्य पवनेन प्रेर्यमाणश्चन्द्रमण्डलं प्रतिनीयते ॥ ततः शशिमण्डलान्तररश्मिभिर्निर्गतु
मण्डलं ॥ सं प्राप्य अवविद्यातपतीत्स्य न दानि धान्यादग्य पतुः साम मर्यं व्रतु पनीयते ॥ ततः स्वमण्डलाद सौम्यो
मतरसं प्राप्य हि रूपमुत्तमं ॥ यस्य सकलभूतानां नगानामनो च संचरां ॥ जननं निमित्तं तस्य जति ॥ तस्माद् वृष्टि
संपादितोषधिमयाद्वत्रतोन्सन्निर्दिष्टो रस्मात्पुनर्यज्ञोपात्ताश्च पूर्वाणि हितमं गया पुनरन्नं स्यान्नाच्च पुनः कतु

संयोज्य वायुनासौ संनीयते रश्मिनिम्नतः ॥ कृष्यगुःसाम वि हितं सौरं धामोपनीयते ॥ ६७ ॥
स्वमण्डलाद सौम्यरूपः सुजलंममृतमुत्तमं ॥ यत्करमसर्वभूतानामन्नानां जननात्मना ॥ ६८ ॥
तस्मादन्नात्पुनर्यज्ञः पुनरन्नं पुनः क्रतुः ॥ एवमेतदनाद्यंतं चक्रं संपरिवर्तते ॥ ६९ ॥ ॥

तस्मिन्वृणनदखिलं संसारचक्रं प्रवाहरूपेणोत्पत्तिविनाशाविरहितं तथा सम्यक् परिवर्तते ॥ इत्यनेन
नकमेणात्मनः सकाशादखिलजगन्मद्भुतविस्मयवाच्यात्मनः स्वकर्मानुरूपविग्रहपरिग्रहः ॥ ६६ ॥ ६७ ॥
॥ ६८ ॥ ६९ ॥ ननु यथात्मनः संसरणमनाद्यन्तं तर्हि निर्मुक्ति कथं संगच्छत इत्यत आह ॥ अनादिरिति ॥ ॥

शिव०
६१

यद्यप्यात्मनो नादित्वा संसृतिर्न विद्यते ऽन्तरात्मनः शरीरव्यापिनः ॥ तथापि पुरुषः शरीरेण समवायीन
वति ॥ तेन तत्र नैसुखदुःखात्मकं नागजानमुपभुंक्ते ऽस्यैवं तेन संबंधेन संबंधी भवति ॥ स च समवायो
दिच्छादिप्रजनितकर्मनिर्मिर्यान तु निसर्गज्ञातः ॥ तस्य कार्यविनविनाशोपपत्तेर्ना निर्मुक्ति आत्मनो जगज्ज
न्मेत्युक्तं ॥ ७० ॥ तत्प्रपंचयितुमाह ॥ सहस्त्रात्मेति ॥ योऽसौ सकलजीवात्मा तयात्र पंचात्मकतया च सहस्त्र

अनादिरात्मा संसृतिर्विद्यते नांतरात्मनः ॥ समवायी च पुरुषो मोहेच्छाद्वेषकर्मजः ॥ ७० ॥ सहस्त्रात्मा मयायो
वा आदिदेव उदाहृतः ॥ मुखबाहूरूपजाः स्युस्तस्य वर्णा यथाक्रमं ॥ ७१ ॥ पृथिवी पादतस्तस्य शिरसो द्यौरजाय
त ॥ नस्तः प्राणो दिशः श्रोत्रात्स्पर्शाद्वायुर्मुखाच्छिखी ॥ ७२ ॥ मनसश्चन्द्रमा जातश्चक्षुषश्च दिवाकरः ॥ जघ
नादन्तरिक्षं च जगच्च सचराचरं ॥ ७३ ॥ सावहुरूपः तथा सकलजगद्धेतुर्योऽतो दिदेवो मयायुष्माकमुदाहृत
॥ तस्य वदनभुजसक्थिचरणजाता यथाक्रमं ब्रजन्मादयश्चत्वारो वर्णाः ॥ तथा तस्य पादाद्भूमिर्मस्त
काद्युः स्म नाघ्राणात्प्राणाः कर्णात्ककुभः स्पर्शात्पवनः वदनात्तत पहः मनसः शशांकः ॥ नेत्रात्तु
॥ जघनादाकाशं ॥ जंगमाजंगमात्मकं जगच्च ॥ ७३ ॥ अत्र चोदयंति ॥ ॥ ॥

मि०प्रा० ६२

प्स्यतीति॥ देवमनुष्ययोगीश्वर यद्यात्मैव जीवादिभावं भजनेतर्हि कथमसौ पापयोनिषु मृगपक्ष्यादिषु जायते। स्वा-
यमोहरागद्वेषादिदोषदुष्टत्वात्तज्जन्मेत्युच्यते॥ तच्च न यस्मादसावीश्वरः स्वतंत्रः कथं मनिष्टैर्मोहरागादिभिर्भा-
वैः संप्रयुज्यते॥ १४॥ किंच॥ करणैरिति॥ तथेदमप्ययुक्तं यत् मनःप्रभृतिज्ञानोपायैः सहितस्यात्मनः पूर्वज्ञा-
नं जन्मांतरानुभूतविषयं कस्मान्नोत्पद्यते। तथा सर्वप्राणिगतां वेदनां दुःखादिरूपां सर्वगोपि सर्वदेहग-

यद्येवं स कथं ब्रह्मन् पापयोनिषु जायते॥ ईश्वरः स कथं भावैरनिष्टैः संप्रयुज्यते॥ १४॥
करणैरन्वितस्यापि पूर्वज्ञानं कथं च न॥ वेत्ति सर्वगतां कस्मात्सर्वगोपि न वेदनां॥ १५॥
अंत्यपक्षिस्थावरतां मनोवाक्कायकर्मजैः॥ दोषैः प्रयाति जीवोयं भवं योनिशतेषु च॥ १६॥

तोपि कस्मान्न वेत्ति॥ तस्मादात्मैवेश्वरो जपादिनावतजनत्ययुक्तं॥ १५॥ अत्र पूर्वचोद्यस्योत्तरमाह॥ अंत्ये-
ति॥ यद्यपीश्वरः स्वरूपेणासंसृक्तानानंदलक्षणस्तथाप्यविद्यासमावेशान्मोहरागादिभिर्वशति तथैवं मनो-
वाग्बाहीनयोनिजननसाधनं मानसादिविविधं कर्म निरूपयमाचरति॥ तेन चांत्यादिहीनयोनिमाप्नोति। अंत्याः श्वपाक-
चंडालादयः। पक्षिणः काकादयः। स्थावरा वृक्षादयः। तेषां भावोंत्यपक्षिस्थावरता तां। यथाक्रमेण मनोवाक्कायारब्धकर्म- शिव० ६२
दोषैर्जन्मसहस्रेषु पर्यंतं जीवः प्राप्नोति॥ १६॥ ॥

किंच॥ अनंता इति॥ शरीरिणां जीवानां शरीरेषु भावा अभिप्रायविशेषाः सत्वाद्युद्रेकतारतम्याद्यथानंतास्तथा का-
र्याण्यपि रूपाणि कुब्जवामनत्वादीनि देहिनां सर्वयोनिषु भवंति॥ १७॥ ननु यदि कर्मजन्मानि कुब्जवामनत्वा-
दीनि तर्हि कर्मानंतरमेव भवेयुर्न विलंबमित्यत्राह॥ विपाक इति॥ केषांचित्तपोतिहिंसादिकर्मणां विपाकः फ-
लं प्रेत्य देहांतरे भवति॥ केषांचित्कारीर्यादिकर्मणां वृष्ट्यादिफलमिहैव भवति॥ केषांचिच्चित्रादीनां फलं पश्वा-

अनंताश्च यथा भावाः शरीरेषु शरीरिणां॥ रूपाण्यपि तथैवेह सर्वयोनिषु देहिनां॥ १७॥ विपाकः कर्मणां
प्रेत्य केषांचिदिह जायते॥ इह वामुत्र चैकेषां भावस्तत्र प्रयोजनं॥ १८॥ परद्रव्याण्यभिध्यायंस्तथानिष्टानि चिं-
तयन्॥ वितथाभिनिवेशी च जायतेंत्यासु योनिषु॥ १९॥ दिकमिह देहांतरे वा नियतं॥ न पुनरनंतरमेव कर्मफले-
न भवितव्यमिति नियमः इत्यर्थः॥ अत्र च कर्मणां शुभाशुभफलजनकत्वे सत्वादिभावा एव प्रयोजकास्तत्तद्भा-
वतारतम्यात्फलतारतम्यं॥ १८॥ मनोवाक्कायकर्मजैरित्यादि योनितो प्राप्तो तीयुक्तं तत्प्रपंचयितुमाह॥ परद्र-
व्याणीति॥ परधनानि कथमहमपहरेयमित्यनिशं ध्यायन् तथाऽनिष्टानि ब्रह्मवधादीनि हिंसात्मकानि का-
करिष्यामीति चिंतयन् वितथे असत्ये अनृते वस्तुनि अभिनिवेशः पुनः संकल्पः तद्वांश्चांडालाद्यंत्ययोनिषु
जायते॥ १॥ ॥ ॥

किंच॥ पुरुष इति॥ यस्त्वनृतवदनशीलः पुरुषः पिशुनः कर्णेजपः॥ परुषः परोद्वेगकरवाणी॥ अनिबद्धप्र
लापी प्रकृतासंगतार्थवादी च॥ बुद्धिपूर्वाहम्यादिना रतस्मादधीनोत्कृष्टमृगपक्षिषु जायते॥८०॥ किंच॥
अदत्तेति॥ अदत्तपरधनापहारप्रसक्तः प्रसक्तः परदारप्रसक्तश्च। अविहितमार्गेण प्राणिनां घातकश्चे
त्युरुलघुनावतारतस्मात्ततोप्यतोऽनिष्टस्थावरेषु जायते॥८१॥ सत्वादिगुणपरिपाकमाह॥ आत्मज्ञ इति

पुरुषोऽनृतवादी च पिशुनः पुरुषस्तथा॥ अनिबद्धप्रलापी च मृगपक्षिषु जायते॥८०॥
अदत्तादाननिरतः परदारोपसेवकः॥ हिंसकश्चाविधानेन स्थावरेष्वभिजायते ॥८१॥
आत्मज्ञः शौचवान्दान्तस्तपस्वी विजितेन्द्रियः॥ धर्मकृद्वेदविद्यावित्सात्विको देवयोनिषु
॥८२॥

॥ आत्मज्ञो विद्याधनादिजन्यनिमानरहितः॥ शौचवान्बाह्याभ्यंतरशौचयुक्तः॥ दान्तस्तपसा समन्वितः॥ तपस्वी
कृच्छ्रादितपोयुक्तः॥ तथेन्द्रियार्थेष्वप्रसक्तः॥ नित्यनैमित्तिकेषु धर्मानुष्ठाननिरतः वेदार्थवेदी च य एवं सर्वधर्मा
:समात्विकः स नरलोकेऽकृतारतस्माद्वक्ष्यमाणादुत्कृष्टोत्कृष्टतरसुरयोनितां प्राप्नोति॥८२॥ ॥

किंच॥ असदिति॥ असत्कार्यं युद्धपर्वतिकादिषु निरतो यस्तथा व्यग्रचित्तः सदा कार्याकुलः विषयेष्वतिप्रस
क्तो रजोगुणयुक्तस्तु तदा रतस्मादधीनोत्कृष्टमनुष्यजातिषु मरणानन्तरमुत्पत्तिं प्राप्नोति॥८३॥ किंच॥ निद्रालु
रिति॥ यः पुनर्निद्राशीलः प्राणिपीडाकरो हिंसो लोभयुक्तश्च तथा नास्तिको धर्मादिनिंदकः याचनशीलः प्रमादवा

असत्कार्यरतो धीर आरंभी विषयी च यः॥ स राजसो मनुष्येषु मृतो जन्माधिगच्छति॥८३॥
निद्रालुः क्रूरकृल्लुब्धो नास्तिको याचकस्तथा॥ प्रमादी भिन्नवृत्तश्च भवेत्तिर्यक्षु तामसः॥
८४॥ रजसा तमसा चैवं समाविष्टो भ्रमन्निह॥ भावैरनिष्टैः संयुक्तः संसारं प्रतिपद्यते॥८५॥

न्कार्याकार्यविवेकशून्यः॥ विरुद्धाचारश्चासौ तमोगुणयुक्तस्तदा तस्मादधीनतस्मादधीनहीनतरपश्वादिषु
तिर्यक्षु जायते॥८४॥ पूर्वोक्तमुपसंहरति॥ रजसेति॥ एवमविद्याविरुद्धो यस्मात्तस्माद्रजस्तमोभ्यां समावृतः इहसंस
रेपर्यटन्नानाविधदुःखपरंपराभिरभिभूतः॥ पुनःपुनःसंसारं देहग्रहणं प्राप्नोति॥ इष्टैरःसकलैर्भावैरनिष्टैः संयु
क्तः स तस्मादधास्माद्वकारणः॥८५॥ ॥

भि० गी०
६४

यद्यपि करोति तस्यापीति द्वितीयं चोद्यं तस्योत्तरमाह ॥ सूजिस्यइति ॥ यद्यपि स्वात्मांतःकरणादितादात्म्याध्यासे
पन्नस्तथापि जन्मांतरानुवृत्ता यां वबोधेन समर्थः ॥ न विपक्ककरणोऽगा दिमत्वात्कांतचित्तोपस्मात् ॥ यद्यथास्य
नीमत्वच्छन्नोरूपन्नानोमादनसमर्थो न तवुत्ति ॥ ८५ ॥ नतु यास्त्रवीयत्तानस्यात्मा प्रकाशत्वात्तस्य त्वस्ततः सि
द्धान्तानुपपन्नो युक्तस्यात्मंत्राह ॥ कदृ वैति ॥ कटुः वैति ॥ अपक्के कटुर्वैरी रोतिक कर्करिकायां विद्यमानोऽपि मधुरो
रजिस्तोद्वियपारधोरूपालोकस्य नन्दा मः ॥ तथापि विपक्ककरणस्यात्मातानस्य नस्य नन्दामः ॥ ८६ ॥ कदृबरीयथा
पक्के मधुरः सदामोपि न ॥ प्राप्यते त्मनि तथा नापक्ककरणेन ना ॥ ८७ ॥ सर्वाश्रया निजे देहे देही विंदति वेदना
॥ योगी मुक्तस्य सर्वा मीनचाप्नोविंदे ॥ ८८ ॥ सोयथानोपलन्यते तथाप्यात्मस्य पक्ककरणो विद्यमानापि ता
नानान्तनी वास्रवी यवस्तुगोचरानप्राप्यते ॥ ८७ ॥ वेत्ति सर्वगतां कस्मात्सर्वगोपि न वेदनामितियदुक्तं तत्राव्र
माह ॥ सर्वाश्रयेति ॥ यः पुजर्देही देहाभिमानयुक्तस्स सर्वाश्रयां स्रध्यात्मिकादिरूपां वेदनां स्वकर्मोपार्जितत्व
देहे प्राप्नोति न देहांतरं गतः ॥ योगपतेनारंता प्रपञ्चजस्याप्यादेव सुयोगी मुक्तो मुक्तो मुक्ताहंकारादिस्म
कत्वदेवतगतानां स्वदुःखादिसंविदां वेदितानवर्विति ॥ ॥

त्रि०
६४

नत्वेकस्मिन्ननात्मनि सुरनरादिदेहेषु नेदप्रत्ययोनघटन्तस्त्यातं कामाह ॥ आकाशेति ॥ यथैकस्मैव गगनं क
नाद्युपाधिषु नेत्रनिर्नं नानुलभ्यते ॥ यथाका नानुरेको पि निर्लिप्तेषु जलाधारेषु करकर्मणि कर्मिद्विकादिषु
नानैवानुलभ्यते ॥ तथैकोप्यात्मांतःकरणोपाधिभेदेन नानाप्रतीयते ॥ द्वितीय दृष्टांतो पाहानमात्मनेद
मापारमार्थिकत्व द्योतनार्थं ॥ ८९ ॥ पंचधानुतमस्वपंपष्टंश्लादत्ते पुगपत्सनुः ॥ स्थाद्युक्तमर्थमुपसंहृत्य

आकाशमेकं हि यथा घटादिषु पृथग्भवेत् ॥ तथात्मैको ह्यनेकस्थजलाधारेष्विवांशुमान् ॥
॥ ९० ॥ ख्रमस्वानिलतेजांसि जलं नूस्वेतिधातवः ॥ इमे लोकाएष चात्मा तस्माच्च सचराचरं ॥ ९१ ॥

खंमस्मिति ॥ खमस्त्राणां खं गगनं ॥ अनिलो वायुः ॥ तजोऽग्निः ॥ जलं भ्रसिद्धं ॥ भूस्वइत्येते या तादिधातवस्तेऽहं
रारीरस्यापधारयंतीति धातवो विधीयंते ॥ तत्र स्वादयः पंचधातवो लोकांते प्रच्यंतइति पावत ॥ एष चि
त्वीनुरात्मा ॥ एतस्मात्क्षेत्रज्ञसमुदायात्स्थावरं जंगमात्मकं सर्वं जगदुत्पद्यते ॥ ९१ ॥ कथं समवायात्
त्माजगनस्पजनीसत्त्वा

सि॰ प्रा॰ ६५

घटादेरिति॥ यथा रिक्तजालो मत्स्यबन्धकः धीवरादिकं कारणजातमुपादाय करकत्रागलादिकं नानाविधं कार्यं तन्नरच्च
यति॥ यथा वा वर्द्धकिस्तरुणम् काष्ठैः परस्परसापेक्षैरेकं महान्तं कार्यं करोति॥ यथा वा केवले हेमोपादाय हे
मानुगतमेव कटककमुकुटकुंडलादिकार्यमुत्पादयति॥ यथा वा कोशकारकः। कीटविशेषो निजला
लालयारब्धमात्मबंधनं कोशाख्यमारचनते॥ तथात्मापि पृथिव्यादीनि साधनानि परस्परसापेक्षाणि

घटादेश्चक्रसंयोगात्कुंभकारो यथा घटं॥ करोति मृत्स्नया काष्ठैर्गृहं वा गृहकारकं॥ ७७॥ हेमपात्रमुपादाय
रूपं वा हेमकारकः॥ निजलालासमायोगात् कोशं वा कोशकारकः॥ ७८॥ कारणान्येवमादाय तासु तासु प्रवृत्ति
षु। स्वयमात्मानमात्मैवं संभूय करणानि च॥ ७९॥ महाभूतानि समस्तानि यथात्मापि तथैव हि॥ कोशपैंडे
तेनैकं गादृष्टमस्मेनपत्रपति॥ ८०॥ ॥

॥ तथा करणानि चक्षुरादीन्युपादायास्मिन्संसारे तासु तासु सुरा
दिषु योनिषु स्वयमात्मानं निजकर्मबंधवद्धारीरि नियामजनि॥ ८१॥ किं पुनर्वैषयिकज्ञानेंद्रियव्य
तिरिक्तात्मसद्भावे प्रमाणमित्याशंक्याह॥ महाभूतानीति॥ यथा पृथिव्यादीनि महाभूतानि समस्ता
नि प्रमाणगम्यत्वात्॥ ॥ त्रि॰ १० ६५

तथात्मापि सत्यो यस्मात्तथा परिवुद्धिंद्रियव्यतिरिक्तो ज्ञाता। कुतो न स्मात्। तद्विरहे न च चक्षुरिंद्रियेण दृष्ट्वा
स्पर्शनेन स्पर्शनेंद्रियेण को विजानाति॥ यमहमद्राक्षं तमहं स्पृशामीति। यथा कस्यचित्पुरुषस्य वातेन
वंशं श्रुत्वा पुनः श्रूयमाणो वाते तस्यैव गीयमिति कः प्रत्यभिजानाति तस्मात् ज्ञानेंद्रियव्यतिरिक्तो ज्ञाताधव
तिष्ठते॥ ८२॥ किंच॥ अतीतार्थस्मृतेः॥ स्मृतिः पूर्वानुभवभावितसंस्कारोद्बोधनिबंधना कस्य भवेन्॥ अनवमे

वा तेन वा को विजानाति पुनः संश्रुत्य संश्रुतं॥ ८३॥ अतीतार्थस्मृतेः कस्य कोवान्यत्प्रत्यकारकः॥ जातिरूप
वयोवित्तविद्यादिनिरहंकृतः॥ ८४॥ शब्दादिविषयोद्योगं कर्मणा मनसा गिरा॥ यद्यात्मा ध्रुवो न स्यात्
थोनुस्मृतार्थगोचरः॥ ८५॥ नष्टे दृष्टे वस्तुनि च मनस्यस्मृतिरूपपद्यते तथा कः प्रत्यभिज्ञातस्य कारकः न हीन्द्रि
येणानुपलब्धापाराणां तत्कारत्वं॥ तथा देहमेवात्मेति तत्त्वादिसंपन्नस्यैवं विधोऽनुसंधानप्रत्ययः कस्मान्न
भवति॥ स्थिरात्मव्यतिरिक्तस्य तथा शब्दस्पर्शादिविषयोपभोगसिद्धार्थमुद्योगं मनो वाक्काये कः कुर्यात्॥
तस्मादपि वुद्धिंद्रियव्यतिरिक्तश्चात्मास्ति नः॥ ८६॥ उपासनाविशेषविध्यर्थं संसारस्वरूपं विवृण्वन्नाह॥

मि॰प्रा॰
६६

ससंदिग्धमतीति यो मोक्षविवेकिस्थात्मा विशुद्धोऽहंकारदूषितः सकलकर्मसुफलमस्ति न वेति॥ ससंदिग्धमति
र्भवति॥ तथाः सिद्धोपि स्वकृतार्थोपि सिद्धमित्रकृतार्थमेवात्मानं मन्यते॥७६॥ किंच ममदाराः सन्ति॥ तस्माद्वि
शुनमते र्ममकलत्रपुत्रवेश्मपादयोः हमेषामित्यतीवममताकुलात्मीति र्भवति॥ तथा हिताहितकार्यप्रक
रसविशुनमतिर्विपरीतमतिः सदा भवेत्॥७७॥ किंच॥ अन्ते पश्यति॥ तेयं जानातीति तेयं तं तस्मात्तस्मात्तम्

ससंदिग्धमतिः कर्मफलमस्ति न वेति वा॥ विशुद्धोसिद्धमात्मानं सिद्धोपिहितमन्यते॥७७॥ देहमदारा
नामास्वात्मेदमेषामिति स्थितिः॥ हिताहितेषु नावेषु विपरीतमतिः सदा॥७८॥ ज्ञेयतत्त्वप्रकृतौ नित्यविकारे
नादितोषवान्॥ अन्नात्माकानन्तोपानं तत्परतया धर्मी॥७९॥ देहात्मा विनीतात्मा विनयान्निर्विकल्प
न॥ कर्मणादेषमात्मासिद्धयाचेत्तेन बाध्यते॥८०॥ निष्कृतो नो वा आत्मनो गुणा मात्मा व स्थायी विकारे वा:
हंकारादेश्च विशेषत्वानुविवेकानन्तितो भवति॥ तथा नश्वरानहंकारादीनां बुद्धिविशेषेर्विषयादीनां दिशुविशेषक्त्वा त्रि॰ष॰
कृतत्वप्रयत्नानवेदेहेनानाप्रकाराकार्यप्रवृत्तोः विनीतात्मा स्वयं तत्त्वमात्कार्यानिनिर्विकारः युक्तस्तत्कृतक ६६
र्मजातेन रागद्वेषाभ्यां मेदेहेन नबाध्यते ज्ञानीस्य हरणाद्वारेण॥८०॥ ॥

कृपं पुनस्त्वं स्निग्नोनवतीमतस्माद्धाः॥ आचार्य इति॥ विद्यार्थमाचार्यमेवावेदांतार्थेषु पालनं तज्जलादियोगशा॥
स्त्रेषु च विवेकित्वं नस्त्रिपादितध्यानादिकर्मणामनुष्ठानं सत्पुरुषसंगः प्रियहितसत्तत्वालंबनालोक
नालंनयोपरित्यागः सर्वभूतेषु आत्मवद्दर्शनं॥ ममत्वदर्शने परिग्रहाणां च पुत्रदेहकलत्रादीनां त्यागः॥ जी
र्णकाषायधारणं॥ तथा श्रोत्रादिस्मृत्यादिविषयेभ्यो श्रोत्रादीन्द्रियाणां प्रवृत्तिनिरोधः॥ तन्द्रानिद्रानुकारिण्या आल

आचार्योपासनं वेदशास्त्रार्थेषु विवेकिता॥ तत्कर्मणामनुष्ठानं सङ्गः सद्भिर्गिरः श्रुताः॥१॥
आलोकालम्भविगमः सर्वभूतात्मदर्शनं॥ त्यागः परिग्रहाणां च जीर्णकाषायधारणं॥२॥
विषयेन्द्रियसंरोधस्तन्द्रालस्यविसर्जनं॥ शरीरपरिसंख्यानं प्रवृत्तिष्वघदर्शनं॥३॥ नि
रजस्तमता सत्त्वशुद्धिर्निःस्पृहता शमः॥ एतैरुपायैः संशुद्धः सत्त्वयुक्तोऽमृती भवेत्॥४॥

समनुसाहस्तयोर्निःशेषेण त्यागः॥ शरीरस्य परिसंख्यानं अस्थिरादिदोषानुसंधानं॥ तथा संकल्पितमार्गादिषु
प्रवृत्तिषु प्राणिवधादिदोषदर्शनं तथा रजस्तमसोर्विधुत्वं प्राणायामादिना सत्त्वशुद्धिः॥ निःस्पृहता विषयेषु अनि
च्छा शमः शमो वन्मुक्तो भवति॥ संयमः एतैराचार्योपासनादिभिरुपायैः सम्यक् शुद्धः केवलसत्त्वयुक्तो अमृतोपम
नेनामृती भवेन्मुक्तो भवति॥४॥ ॥

कथमसम्भवन्नवमाग्निरिस्थितस्यात्मास्यतत्त्वसम्पत्तिनिश्चलतयोपसम्पनात् सत्त्वसिद्धियोगात्केवलसत्त्वगुणयो
गात्कर्मबीजीनां परिक्षयात्सत्तुरूपाणां वर्मवैधाद्वात्मयोगः प्रवर्त्तते ॥५॥ किंच ॥ शारीरेति ॥ यस्य पुनर्योगि
नः विशुद्धमतेः शारीरसंक्षयसमयेमनः सत्त्वयुक्तं समग्रैकान्ततायाऽऽश्वर्यं ज्ञातिस्याद्भियतेसयथुपाम्नाऽऽ
योगात्प्रयोगात्प्रवीणानयात्मानंनाधिगच्छति ॥ गच्छति ॥ तर्हि विशिष्टसंस्कारपाटवचक्रेनजातंसंतरानुवृत्तस्य

तत्सम्पन्नेरूपसम्पन्नासत्त्वयोगात्सरित्त्वपात् ॥ कर्मणांमन्त्रिकर्षाच्चमतो योगः प्रवर्त्तते ॥५॥
शारीरसंक्षयेयस्यमनः सत्त्वस्थमीश्वरं ॥ अविशुद्धमतेः सम्यक्समजातिस्मरतामियात् ॥६॥ ॥
यथादिनरतानवर्णैर्वर्णयन्नात्मनस्तनु ॥ नानारूपाणिकुर्वाणस्तयात्माकर्मजास्तनूः ॥७॥

मिकीटादिनानागन्र्नवामादिसमुद्भूतः सम्परवंशापुयानानतस्मरणेनजातोहेगस्माद्विष्टेढकारिणिमोदे
प्रवर्त्तते ॥६॥ यस्मात्पटुसंस्कारतयापूर्वजातिंतस्मरतितस्मकामनिरिस्माह ॥ यथेति ॥ चरतोनटः सयथारा
मरावणादिनानारूपाणिकुर्वाणः सितासितपितादिनिर्वर्णैरात्मनस्तनुर्वर्णयतिरचयति ॥ तथैवात्म
नकर्मफलोपनोगार्थंकृवामनादिनानारूपाणिकर्मनिमित्तानिकलेवराणपादत्ते ॥७॥ ॐनमः ॥

किंच ॥ कालेति ॥ नकेवलंकमैवकुब्जवामनत्वादिनिमित्तंकिंतुकालकर्मणिस्वकारणबीजदोषोमात्रदोषश्चेति ॥
सर्वमेतस्सद्कारिकारणं ॥ एतेनदृष्टादृष्टरूपेणकारणकलापेनगर्भस्यांगहीनत्वादिविकारोजन्मनश्चारभ्या
नियतेकालेदृष्टः ॥८॥ ननुप्राकृतिकप्रलयावसरेमहदाद्यखिलविकारविनाशेकर्मणोनाशात्कथंतन्निब
धनः प्रथममपिंडपरिस्पंदइत्याशंक्याहंकारेणेति ॥ मनोहंकारेप्रसिद्धोगतिः संसारहेतुः तनोदोषराशिः कर्म

कालकर्मात्मबीजानांदोषैर्मातुस्तथैवच ॥ गर्भस्यवैकृतंदृष्टमंगहीनादिजन्मनः ॥८॥ अ
हंकारेणमनसागत्याकर्मफलेनच ॥ शारीरेणचनात्मायंमुक्तः पूर्वंकदाचन ॥९॥ वर्त्माधा
रस्नोहयोगाद्ययादीपस्यसंस्थितिः ॥ विक्रयापिचदृष्टैवमकालेप्राणिसंक्षयः ॥१०॥ ॥

फलंधर्माधर्मरूपंशारीरंलिंगात्मकं ॥ एभिरहंकारादिभिरयमात्माकदाचिदपिनमुच्यतेयावन्मोक्षः ॥९॥ ननुप्र
तिनियतकर्मणांजीवानांप्रतिनियतकालमेवोपरतिर्युक्तानपुनः संग्रामादौयुगपदकालेप्राणसंहारस्याचा
स्याह ॥ वर्त्मेति ॥ यथाशरावस्थतैललिप्तानेकवर्तिनीनांनानाश्चाद्यानांयुगपत्संस्थितिः तासांचस्थितानांपर
स्परंदोधूयमानपवनाहतिरूपविपविपत्तिहेतूपनिपातयोगपद्याद्युगपदुपरतिर्यथातथाप्राणिनांतथैवसं
रक्षिता ॥

सि०प्रा० ६८

जिकुंजरादिजीवानांपुद्गलस्योपरतिहेतुर्योगपद्यादेककालेपिप्राणापरिक्षयोनानुपपन्नः एतदुक्तंभवति। प्रति
नियतकालेविपत्तिहेतुभूतानदृष्टस्यानदिरुद्धकार्यकरत्वहेतुपनिपातेनप्रतिबंधइति॥१०॥मोक्षमार्गा
माह॥अनंतरइति॥यामोक्षदिपुरीप्रवस्थितजीवस्तस्मानंतास्त्रमयीनाडी॥सुखदुःखहेतुभूताद्यास्यप्रति
मदस्त्राणिइत्यादिनोक्ताः सितासितकर्बुरादिरूपाः सर्वतः स्थितानेषां एकोरश्मिरूर्ध्वंचव स्थितोयामार्गं।

अनंतास्त्रमयस्तस्य दीपवद्यःस्थितो यदि॥ सितासिताः कद्रुनीलाः कपिलाः पीतलोहिता॥११॥
ऊर्ध्वमेकः स्थितस्तेषां यो भित्वा सूर्यमंडलं॥ ब्रह्मलोकमतिक्रम्य तेन याति परां गतिं॥१२॥
यदस्यान्यद्रश्मिशतमूर्ध्वमेव व्यवस्थितं॥ तेन देवशरीराणि सधामानि प्रपद्यते॥१३॥ ॥

उमंडलं निर्भिद्य हिरण्यगर्भलोकं व्यतिक्रम्य वर्त्तते तेन जीवः परांगतिं अनुपरावृत्तिलक्षणां प्राप्नो॥
तेन रवं॥११॥स्वर्गमार्गमार्गमाह॥यदस्यान्मुनी मुक्तिमागादन्ताद्रश्मिरन्यद्रश्मिशतमूर्ध्वकारमेवव्य
वस्थितं तेन सुरशरीराणि तेजसा निमुखैकतोगाधिकरणानिसधामानिकनकरजतरत्नरचितामरपुर
वरसहितानि प्रपद्यंते॥१३॥ ॥

शिव० ६८

संसरणमार्गमाह॥येनेति॥येपुनः सप्ताधस्ताद्रश्मयोमंदप्रभास्तेरिहफलोपभोगार्थं संसारे संसरति
श्रवशाः स्वयंकृतकर्मपरतंत्राः॥१४॥भूतचैतन्यवादिनास्तिकंपक्षंपरिजिहीर्षुराह॥वेदैरिति॥वेदैः स
म्यतिनेतीसात्मेतिश्रुतिस्थूलमनएवह्रस्वमपाणिपादममारमिमारिरिनिः ज्ञात्मैवमात्मा न्वीक्षिकादिनिः वि
ज्ञानेश्वममेदशरीरमितो हि देहव्यतिरिक्तात्मानुभवैः तथाजन्ममरणानां जन्मीनरानुष्ठितधर्माधर्मप्रति

येनैकरूपाश्चाधस्ताद्रश्मयोस्य मंदप्रभाः॥ इहकर्मोपभोगाय तैः संसरति सोवशः॥१४॥
वेदैः शास्त्रैः सविज्ञानैर्जन्मना मरणेन च॥ आर्त्या गत्यागत्या सत्येन न्याय्येन च॥१५॥

निपत्तीनां देहातिरिक्तात्मानुमानेनात्मा अजन्मां नरानकर्मानुष्ठानं नियतेषा॥तथागमनागमनो
नां [illegible] नेच्छाप्रयत्नाधारनियतात्मामपिंचेतिक देहातिरिक्तात्मानुमानं॥ ह हि देहस्य चैतन्यं [illegible] समवायसंब
वतिपतः कारण॥गुण॥ प्रत्यक्षमेतत्कार्यत्र भैवेत्रेषिकगुणारंभोदृष्टः॥ नचकारणं [illegible] पार्थिवपरमाणुषु चेत
नादिसमावायः संभवतितदारब्धस्तनतेनादिनोतिकेषु अनुपलंभात॥ नच॥ मदशक्तिवत् [illegible] दिकारित्वप्राण
रमेयोगइतिचेत्॥ ॥

पि॰ प्रा॰ ६८

लोके। साधारणगुणत्वादात्मनो नैतिकदेहादिरिक्तत्वे तस्मादिममवाप्यं गीकर्तव्यं ॥ अस्मान्नेत्रप्रसिद्धो देहे
हितप्राप्तिः सुखं आमुष्मिकं तथाशुभकर्मानुष्ठानमशुभकर्मपरित्यागः ॥ एतैश्च तत्तानं नियतं देहादिरिक्त
मानुमानं निमित्तं शकुनादि शाकुनज्ञानं दिग्दाहादि पवनविचेष्टालिंगकज्ञानं ग्रहाः सूर्यादयः तत्संयोगजैः
फलैः ताराश्चाश्विन्यादिनक्षत्राणि तेषां संचारैः शुभाशुभफलदै

श्रेयसा सुखदुःखाभ्यां कर्मनिष्पत्त्युनाशनैः ॥ निमित्तशाकुनज्ञानग्रहसंयोगजैः फलैः ॥१२॥
तारानक्षत्रसंचारैर्जागरैः स्वप्नजैरपि ॥ आकाशपवनज्योतिर्जलभूतिमिरैस्तथा ॥१३॥ म
न्वन्तरैर्युगश्राद्धैर्मन्त्रौषधफलैरपि ॥ विद्धात्मानं विद्यमानं कारणं जगतस्तथा ॥ १४ ॥ ॥

तनैः जाग्रज्जागराद्वस्मात्तमेश्च स्वप्नदिग्दाहादिस्यादि दर्शनैः तथाम प्रजैः स्वप्नाद्युक्तरथारोहणादि तानैः आ
याकाशाग्नौ कोद्रेश्च जीवोपनामाद्यर्थतयामदेः ॥ तथाम वंतरश्राद्धायुगांतरश्राद्धादेहेनुपपद्यमानया ॥
तथा मंत्रौषधिफलैः वेदोक्तार्थकैः शुक्रमधिः स्याकालसंपद्याद्देहेनानुपपद्यमानेर्वं विद्यमानं देमुनयो वि
जानानी ताश्चात्मानं जगत्कारणं ॥१५॥१६॥ ॥

किंच ॥ अहंकार इति ॥ अहंकृतिरहंकारः स्मृतिः प्रागनुभूतानुभवनाविनसंस्कारो बोधनिबंधनास्मृतिः
गोचरा सुखमेहितं धृतिर्धैर्यं इन्द्रियांतरेण दृष्टे यदिन्द्रियांतरस्य संचारो यथा दृष्टमन्नं दृष्टान्तं मत्स्यादौ मीलितेम
नुसंधानरूपमिन्द्रियांतरस्य संचारः ॥ अत्र चेष्टायत्नचेतनानां [illegible] केतुगमनस्पन्दव
नादिदेहेन तयार्थिकं लिंगत्वमित्यपौनरुक्त्यं ॥ तथा च धारणा शरीरस्य जीवितं प्राणधीरणं स्वर्गो नियतदेहं

संचार

अहंकारः स्मृतिर्मेधा द्वेषो बुद्धिः सुखं धृतिः ॥ इन्द्रियान्तरसंचार इच्छा धारणजीविते ॥२०॥ स्वर्गः स्व
प्नभावानां प्रेरणं मनसो गतिः ॥ निमेषश्चेतना यत्न आदानं पाञ्चभौतिकं ॥२१॥ यत ए
तानि लिंगानि दृश्यन्ते परमात्मनः ॥ तस्माद्दस्ति परो देहादात्मा सर्वग ईश्वरः ॥२२॥ ॥

तरोपनीयः सुखविशेषः ॥ स्वप्नः प्रसिद्धः ॥ पूर्वश्लोके तु स्वप्नस्य शुभाशुभफलद्योतकत्वेन यालिंगत्वं
॥ अत्र स्वरूपेणैव मपौनरुक्त्यं भावानामिन्द्रियादीनां प्रेरणं मनसो गतिश्च तत्राधिष्ठानत्वात् ॥ निमेषः प्र
सिद्धः तथा पंचभूतानामुपादानं यस्माद्देतानि लिंगानि दृश्यन्ते पन्नानि ॥ सा [illegible] परस्यात्परस्मा
न्नानाधीनकानि दृश्यन्ते ॥ तस्मादस्ति देहादिरिक्त आत्मा सर्वग ईश्वर इति प्रसिद्धं ॥२२॥ ॥ ॥

शि॰ प्र॰ ६८

शि० गी०
७०

ष्ठेव स्वरूपमाह ॥ बुद्धीति ॥ बुद्धीन्द्रियाणि श्रोत्रादीनि सर्वाणि शब्दादि पंच महाभूतानि । अव्यक्तं प्रकृति
स्थितं तद्धेतोः । अस्माद्धेतोः सर्वं प्रपश्यामि सा वीश्वरः समं सर्वगत एवासा एव सद्रूपः प्रमाणानरेषाम व्याप्तत्वात तस्मात् सर्वत्र
वतीति कत्वात् सद्सद्रूपः साक्षात्मा इति निगद्यते ॥२२॥ बुध्यादेरुत्पत्तिमाह ॥ बुद्धेरिति ॥ सत्वादिगुण
साम्यमव्यक्तं ततस्त्रिप्रकारा या बुद्धेरुत्पत्तिः तस्माच्च वैकारिकस्तैजसो भूतादिरिति त्रिविधोऽहंकार उत्पद्यते

बुद्धीन्द्रियाणि सर्वाणि मनः कर्मेन्द्रियाणि च ॥ अहंकारस्य बुद्धिश्च श्रोत्रादीनि पंच दश ॥२२॥ अव्यक्तमात्माहे
तत्र हेतुस्तस्मात् निगद्यते ॥ ईश्वरः सर्वभूतस्थः सन्नसन्सत्सदाश्रयः ॥२३॥ बुद्धेरुत्पत्तिरव्यक्तात्ततोहंकारसं
भवः ॥ तन्मात्रादीन्यहंकारादेकोत्तरगुणानि च ॥२४॥ शब्दस्पर्शश्च रूपं च रसो गंधश्च तद्गुणाः ॥ यो यस्मा
न्न तस्यैषां मतस्मिन्नेव लीयते ॥२५॥

॥ तन्मात्रादीनि शब्दादीनि तत्तन्नामसाकृतादिमंत्ताकरहंकारात्तन्मात्राणि
आदिग्रहणात् गगनादीनि तानि तानि चैकोत्तरगुणानि गुणसंयुतानि ॥ शब्दाद्यैकारिकात्तैजसात् बुद्धिकर्मेन्द्रिया
णामुत्पत्तिः ॥२४॥ गुणस्वरूपमाह ॥ शब्द इति ॥ तेषां गगनादि पंच महाभूतानामेकोत्तरत्वमाह । पंचशब्दादयो गु
णा वृद्धितस्माः ॥ एषां च बुध्यादिविकाराणां मध्ये यो यस्मात्प्रकृत्यादेरुत्पन्नः स तस्मिन्नेव स्वस्वरूपेण प्रलयसम
ये प्रलीयते ॥२५॥ ॥

शिव० ७०

प्रकरणार्थमुपसंहरन्नाह ॥ यथेति ॥ मानसादि त्रिप्रकारकर्मणां पाकादीश्वरोपि सन्नात्मा यथात्मानं स
जति तथा वो युष्माकं कथितः ॥ सत्त्वादयस्त्रयो गुणास्तस्य वा विषया विशिष्य कीर्तिताः ॥ तथा सत्त्वरजस्तमो
मामा विशिष्य कव दिदं संसारे न्नात्मनेद्वत्यपि कथितं ॥ स एव अनादिः परमः पुरुषः शरीरस्य हृदये नादिमान्

यथात्मानं सृजत्यात्मा तथा वः कथितो मया ॥ विपाकस्त्रिप्रकाराणां कर्मणामीश्वरोपि स
न् ॥२६॥ सत्वं रजस्तमश्चैव गुणास्तस्यैव कीर्तिताः ॥ रजस्तमोमामा विशिष्य कव न्नात्मनेद्वसो
॥२७॥ अनादिरादिमांश्चैव स एव पुरुषः परः ॥ लिंगेन्द्रियग्राह्यरूपः सविकार उदाहृत
॥२८॥ पितृयाणोऽजवीथ्याश्च यदगस्त्यस्य चांतरं ॥ तेनाग्निहोत्रिणो यांति स्वर्गकामा दिवं
प्रति ॥२९॥

॥ कुर्वन् वामनत्वादिविकारसहितस्तथास्थूलाकारतया परिणतो लिंगेन्द्रियैस्स्वग्राह्यरूप उदाहृतः ॥
२८ ॥ स्वर्गमार्गमाह ॥ पितृयेति ॥ अजवीथ्यमरमार्गः तस्यागस्त्यस्य च यदंतरं ॥ असौ पितृयाणः स्वर्गमार्ग
:तेनाग्निहोत्रिणः स्वर्गकामाः स्वर्गं प्राप्नुवंति ॥२९॥ ॥

शि०गी०
७१

किंच ॥ ये च इति ॥ ये च दानादिस्मार्त्तकर्म्मपराः सम्यग्यथा दंभरहिताः स्तयाश्रमिणः गुणैर्दयादांतिरनसूयाशौ
त्पमनायासो मंगलमकार्पण्यमस्पृहेति गौतमादिप्रतिपादितैर्युक्ताः तथा ये च सत्यवदनतिरताः ते पितृणां च
पितृयाणेन सुरेश्वर सदनं प्राप्नुवंति ॥३०॥ ननु नैमित्तिकाद्विव्रतिसंचरे खिलाध्यापककलत्रादविहितवेदाः संन्यासि
परितनाजनाः कथमिवाग्निहोत्रादिकं कर्म करिष्यंतीति कथं तेरां चाकृतकर्माणः स्वर्गमार्गमधिगच्छंतीत्यत आह

येऽत्र दानपराः सम्यग्गृहस्था निश्चयगुणोपेताः ॥ ते पितृन्नैव गच्छंति सत्यव्रतपरायणाः ॥३०॥ नग्नाः शौचविवर्जिता
मादृशा मुनयो गृहमेधिनः ॥ पुनरावर्त्तिनो बीजभूता धर्म्मप्रवर्त्तकाः ॥३१॥ सप्तर्षिनागवीथ्यंतर्देवलोक
मुपाश्रिताः ॥ तावंत एव मुनयः सर्वारंभविवर्जिताः ॥३२॥

शा० ॥ नन्वेते निर्गता पितृयाणेः श्राद्धीतिसकृच्छ्रमला
मुनयो गृहस्थाश्रमिणः पुनरावृत्तिधर्मिणः सर्गादौ वेदस्योपदेशकतया धर्मं तत्त्वादुर्नावृत्तैर्बीजभूताः संतोऽग्नि
होत्रादिधर्मप्रवर्त्तकाः अन्यतो न प्रागुदितदोषप्रसंगः ॥३१॥ किंच ॥ सप्तर्षीति ॥ सप्तर्षयः प्रसिद्धाः नागवी
थी ऐरावतपथः तदंतराले वर्त्तनएव अष्टाशीतिसहस्रसंख्या मुनयः सर्वारंभविवर्जिताः ॥३२॥ ॥ ॐ नमः ॥ ॥

शि०गी०
७१

केवलज्ञाननिष्ठास्ते योगस्थच सुकृतास्तथा मंगलाशिनो देवलोकं समाश्रिताः ॥ आहूतसंप्लवं प्राकृतप्रलय
पर्यंतमवतिष्ठंते ॥ तत्र च स्थिताः सृष्ट्यादावाध्यात्मिकधर्म्माणां प्रवर्त्तकाः ॥३३॥ किं तत्त्वस्ते मुनयः इत्यत आह ॥
पत इति ॥ यतो द्विविधाः पि मुनिसमूहाश्चारो वेदाः पुराणानि विद्योपनिषदश्च ॥ नित्यमूलाणवाश्चेत्परंपरा
यात्राः प्रवृत्ताः ॥ तथा श्लोकाः इति इष्मात्मकाः सूत्राणि नित्रादाधनुशासनमिमांसागोत्राणि नाष्याणि च

तपसा ब्रह्मचर्येण संगत्यागेन मेधया ॥ तत्र गत्वावतिष्ठंते यावदाहूतसंप्लवं ॥३३॥ यतो
वेदाः पुराणानि विद्योपनिषदस्तथा ॥ श्लोकाः सूत्राणि भाष्याणि यच्चान्यद्वाङ्मयं क
चित् ॥३४॥ वेदानुवचनं यज्ञो ब्रह्मचर्यं तपो दमः ॥ श्रद्धोपवासः स्वातंत्र्यमात्मनो ज्ञानहेतवः ॥
३५॥

सूत्रव्याख्यारूपाणि ॥ यदन्यदायुर्वेदादिकं वाङ्मयं तदपि मत्तःकारण स्वरूपं तथा विधास्ते मुनयो धर्म्मप्रवर्त्त
काः एवं मनिवेदस्यापि नानित्यस्यादोषप्रसंगः ॥३४॥ ततः किमित्यत आह ॥ वेदा इति ॥ वेदस्य नित्यत्वे मत्तित
त्त्वामाण्यवर्णोद्देदानुवचनादयः सन्तवस्थापादनद्वारेणात्मज्ञानस्य हेतवः स्युरुपपन्नं भवति ॥३५॥ ॥

किंच॥यस्मान्निस्तनयोप्रमाणान्तूतोवदस्तस्मादस्मात्शुक्लमार्गे॥सकलान्श्रमिनिनाप्रकारंतितासितव्यम
मेवप्रकारंदर्शयति॥द्विजा॥निनिबद्धस्थाः परोक्षीकर्तव्यः॥तत्रोपायदर्शयंदर्शयति॥श्रोतव्यो॥यमंत्रमस्ति
॥प्रथमंतोवदांतश्रवणेननिर्णेतव्यम्तदनंतरंमननंयोयुक्तिभिर्विचारयितव्यः॥ततः सोध्यानेनापरोक्षीकर्तव्ये
द्विजातयोनित्रायप्रस्तायुक्तःसंतोनिर्जनप्रदेशमाश्रिताएवमुक्तेनमार्गेणेनमात्मानंसत्यंपरमार्थतत्त्वमुपासते

मत्याश्रमेविजिज्ञासमाःसमस्तैरेवंमेवतु॥यइदृव्यत्तपमंतम्यःश्रोतव्यश्चद्विजातिभिः॥३६॥यएवमेनंविदुरिति
येचारण्यकमाश्रिताः॥उपासतेद्विजाःसत्यंश्रद्धापरयायुताः॥३७॥क्रमात्तेसंभवंमार्चिरहःशुक्लन
योत्तरं॥अयनेदेवलोकंचसवितारंसवैद्युतं॥३८॥ततस्तान्पुरुषोमानसोब्रह्मलोकिकां॥तेकरोति
पुनरावृत्तिर्नेषामिहनविद्यते॥३९॥ तेआत्मानंविविदिंहंविद्यनंतिप्राप्नुवंति॥३७॥अग्निमार्गंदेवयानमा
हु॥क्रमादिति॥तेविदितात्मानःक्रमादस्मायनिमानिदेवतास्थानेषुमुक्तिमार्गगन्तेषुविश्रमणैःप्रस्थापिताःपरमं
पदंप्राप्नुवंति॥अर्चिर्वह्निःअर्हदिनंशुक्लंशुक्लपक्षः॥तयोत्तरायणंसुरसद्मामविताखयैःविद्युतंतेजः॥तानेवंक्रमा
दर्चिरादिस्थानगतान्मानसःपुरुषोब्रह्मलोकनाजःकरोतितेषामिहसंसारेपुनरावृत्तिर्नविद्यते॥३८॥ ॥

किंतुप्राकृतिसंचरणवमरेशुक्लिंगशरीराःपरमात्मनैक्यीनवंति॥३९॥पूर्वोक्तपितृयाणमाह॥यज्ञेनेति॥येपुनर्वि
हितैर्यज्ञदानतपोभिःस्वर्गफलाप्सवोलोकास्तेक्रमाद्धूमादिचंद्रपर्यंतपदार्थानिमानीनिदेवताःप्राप्यपुनःस्वर्गा
मुत्पत्तिजन्ममिःप्राप्तव्रीह्याद्यन्नरूपेणशुक्लत्वमेवाप्यसंसारिणोयोनिंव्रजंति॥एतन्मार्गद्वयप्रसंगेनोपान

यज्ञेनतपसादानैर्येहिस्वर्गजितोनराः॥धूमंनिशांकृष्णपक्षंदक्षिणायनमेवच॥४०॥पितृलोकं
चंद्रमसंवायुंवृष्टिंजलंमहीं॥क्रमात्तेसंभवंतीह पुनरेवव्रजंतिच॥४१॥एतद्योनविजानातिमार्ग
द्वितयमात्मवान्॥दंदशूक[illegible]टोऽथवाकृमिः॥४२॥उक्तस्त्रोतोनचरणैःस्वयेनसो
त्रैकरं॥ज्ञानेनकिंचिदुन्नाम्यमुखंविष्टभ्यचोरसः॥४३॥निमीलिताक्षःसत्त्वस्थोदंतैर्दंतान्नसंस्पृशन्॥

विजानातिमार्गद्वयोपायभूतधर्मानुष्ठानंनकरोति॥अमीदंदशूकोभुजंगःपतंगःशलभःकृमिःकीटः॥उक्तस्त्र
त्तानेचेत॥४२॥उपासनाप्रकारमाह॥उक्तस्त्रेति॥उक्तस्यावृत्तानचरणोपसमतयोक्तःबदपरमानसः॥अथो
त्तानेसव्यकरेदक्षिणमुत्तानंकरंन्यस्यसुखंकिंचिदुन्नाम्यकरसाचविष्टभ्यस्तनपिबानयानिमीलिताक्षःसत्त्व
स्थःकामक्रोधादिरहितोदंतैर्दंतानसंस्पृशन्॥४३॥ ॥

नयानाभुनिस्थितीचलाजिकायस्यसनयोक्तः॥ नयासंहृत्यास्यः पिहितानन सुनिश्चलोनिःप्रकंपः तयास्
म्यगिंद्रियसमूहं विषयेभ्यः प्रत्याहृत्य मनातिनीचासनेनानुच्चासनेनोपयांतिर्विह्नं पोनूनवातिनयोपविष्ट
:सन्नद्विगुणं त्रिगुणं वा प्राणायामाभ्यासमुपक्रमेत॥ ततोवशीकृतपवनेन योगिनायोसौ हृदयेदीपस्वरूप
कंपः प्रभुःस्थितामोधातव्यः॥ तत्र हृद्यात्मानं मनोगोचरतया धारयेत्॥ धारणास्वरूपं चाजान मन्त्रमगेन्हो

नानुस्थाचलनिकस्थसंहृताभ्यः सुनिश्चलैः॥ ध्यानमन्तिरुध्येंद्रियग्रामं नातिनीचोच्छ्रितासनः॥ द्विगुणं त्रिगु
णं वापि प्राणायाममुपक्रमेत्॥५५॥ ततोध्येयः स्थितोयोसौ हृदयेदीपवत्प्रभुः॥ धारयेत्तत्र चात्मानं धारणां धा
रयेद्बुधः॥५६॥

द्वितिकादानकालो मात्रा तानि पंचदश निर्मात्रादिनिरधमः प्राणायामः त्रिंषन्मध्यमः पंचचत्वा
रिंशद्भिरुत्तम एव प्राणायामत्रयात्मिकैका धारणा॥ तिस्रो योगज्ञा द्वादश चात्मानं धारयेत्॥ ततो ध्येकं मनस्त्वा
मं चात्मस्थो दीकं ह्याकाराग्नेजानुमंडलेमात्रा तानि पंचदशानि प्राणायामो धमः॥ मत्तःप्रमध्यमो द्विगुणः श्रेष्ट
स्त्रिगुणो धारणा तया॥ विनिश्चितिनिम्यन्नैकाना निर्योगस्त्वंयैव चेति॥५६॥ ॥

धारणात्मकयोगाभ्यासे प्रयोजनमाह॥ अंतर्दर्शनमिति॥ ऋणिमादिशास्यापरे रक्तप्रत्वमंतर्दर्शनं॥ स्मृतिरस्ती
न्द्रियेषु प्रत्येषु मन्वादिरविस्मरणं॥ कांतिः कमनीयता॥ दृष्टिरतीतानागतेषु प्रत्येषु॥ तया श्रोत्रता॥ अतिदवीय
सि देशे निषणमानतया श्रोत्रे पृथमनासे दुःखाम पित्राब्दानांत्मानं ता॥ निजशरीरस्यागेन परशरीरप्रवेश
नं॥ स्वर्वांछावत्तानां करणं निरपेक्षतया सृष्टिरित्येतद्योगस्य पिसिद्धेलक्षणं लिंगं॥ नत्वेवतावदेव

अंतर्दर्शनम्मृतिःकांतिर्दृष्टिः श्रोत्रता तथा॥ निजंशरीरमुत्सृज्य परकायप्रवेशनं॥५७॥
अर्थानां छंदतः सृष्टिर्योगसिद्धेस्तु लक्षणं॥ सिद्धेयंमित्यजन्नेदममृतत्वायकल्पते॥५८॥
आपवाप्यनमनवेदंमस्तकर्मावनेवमेतत्॥ अयोविनाशि मिवनुकपरं सिद्धिमवाप्नुयात्॥५९॥

प्रयोजनं किंतु सिद्धे योगे स्पजनन्नेदममृतत्वायकल्पते ब्रह्मत्वप्राप्तयेच भवति॥५७॥ यतत्तदानाधिसंनवे
मतवस्तु राजुपायांतरमाह॥ आपवेति॥ अथवा मस्तकाम्यनिषिद्धकर्माणमतमेवेदसमस्तमनन्य॥ काम्ना
लोपावितमिताशनायादिनसत्वक्रिरात्मोपासनेनपरां मुक्तिलक्षणां सिद्धिमाप्नोतीति॥५९॥ ॥ ॥

मि०प्रा० ७४ किंच॥न्यायेति॥सत्प्रतिग्रहादिन्यायेनोपार्जितधनोऽतिथिपूजनतत्परो नित्यनैमित्तिकश्राद्धानुष्ठाननिरतः स
त्यवदनशीलः सन्नात्मतत्त्वध्याननिरतो गृहस्थोपि यस्मान्मुक्तिमवाप्नोति॥तस्मान्न केवलमैहिकपरिव्रा
जकपरिग्रह एव मुक्तिसाधनं॥२०५॥इत्यध्यात्मप्रकरणं॥एवमाश्रमेतराणां बुद्धिधर्मानन्तरोपयतस्य तत्त्वप्रतिपा
दनया प्रतिज्ञातषड्विधधर्ममध्ये पंचप्रकारं धर्ममभिधायाधुना वशिष्टं नैमित्तिकं धर्मजातं प्रायश्चित्तपदाभिल
प्यं प्रारिप्सुः प्रथमतः तत्स्वरूपावगत्यर्थमधिकारविशेषदर्शनार्थं चार्थवादरूपं कर्मविपाकं तावदाह॥महापातक

न्यायागतधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः॥श्राद्धकृत्सत्यवादी च गृहस्थोपि हि मुच्यते॥२०५॥इत्यध्यात्मप्रकर
णं॥ ॥महापातकजान्घोरान्नरकान्प्राप्य दारुणान्॥कर्मक्षयात्प्रजायन्ते महापातकिनस्त्विह॥१॥

जानिति॥ब्रह्महत्यादिपंचकस्य महापातकसंज्ञा ब्रह्महा मद्यपस्तेनश्च वक्ष्यंते।तद्योगिनो महापातकिन
स्ते महापातकजनितांस्तामिस्रादिनरकाननुभवन्ति दुःकृतागुरुत्वान्घोरान्नरकानीति प्रवेदनापारकत्वे
नातिनिर्यंकरान्दारुणान्दुःखैकभोगविलयान्प्राप्य कर्मक्षयात्तत्कर्मजनितनरकदुःखोपभोगक्षया
दनंतरं कर्मशेषोपानुगरहितसंसारे दुःखबहुले धर्मगात्मादितिर्यग्योनिषु प्रकर्षेणान्त्ययोनिषु जायन्ते॥१॥ प्रा० ७४

महापातकिप्रकरणमितरेषामप्युपपातकादीनामुपलक्षणं॥तेषां च तिर्यगादियोनिप्राप्तिं वक्ष्यमाणत्वात्॥
॥महापातकिनां संसारप्राप्तिमुक्त्वा तद्विशेषकथनायाह॥मृगेति॥मृगादयः श्वसूकरोष्ट्राः प्रसि
द्धाः तेषां योनिं ब्रह्महा स्वकर्मशेषेण प्राप्नोति॥खरो रासभः पुल्कसः प्रतिलोमनिषादेन शूद्रायां जातः वैदेहिके
नांबष्ठ्यां जातो वेनः॥तेषां योनिं सुरापः प्राप्नोति॥कृमयः समानजातीयसंभोगनिरपेक्षा मांसविष्ठागोमयादिजन्मा
नः किंचित्स्थूलतराः पक्षास्थिरहिताः समानजातीयसंभोगरहिताः पिपीलिकादयः कीटाः पतंगाः शलभाः तेषां

मृगश्वसूकरोष्ट्राणां ब्रह्महा योनिमृच्छति॥खरपुल्कसवेनानां सुरापो नात्र संशयः॥२॥
कृमिकीटपतंगत्वं स्वर्णहारी समाप्नुयात्॥तृणगुल्मलतात्वं च क्रमशो गुरुतल्पगः॥३॥

योनिं ब्राह्मणस्वर्णहारी प्राप्नुयात्॥तृणं कुशकाशादि गुल्मस्तेषु गुल्मो लता अनवनतं च क्रमेण गुरुतल्पगः
प्राप्नोति॥एतच्चाकामकृतविषयं कामकृते तु मानवपिंडः स्वबहुलयोनिषु संसरति॥तथाह मनुः॥श्वसूक
रखरोष्ट्राणां गोजाविमृगपक्षिणां॥चांडालपुल्कसानां च ब्रह्महा योनिमृच्छति॥कृमिकीटपतंगानां
विड्भुजां चैव पक्षिणां हिंस्राणां चैव सत्त्वानां सुरापो ब्राह्मणो व्रजेत्॥लूताहिसरटानां च तिरश्चां चांबुचारिणां॥

सि०प्रा०
७५

हिंस्राणां च पिशाचानां स्तेनविश्वसद्मनः ॥ स्वतो र्णानि निःसरतः कृकलासः न ॥ गुल्मलतानां चक्रवारं
द्विजाम पि ॥ क्रूरकर्मकृतां चैव ज्ञानयो गुरुतल्पगः इति ॥ ३ ॥ किंच ॥ ब्रह्महा देहि ॥ एवं रौरवादिनरके पुष्कलं कृ
दियानि दुःखदारुणं दुःखमनुभूय अनंतरं दुष्टेन शेषेन जन्मसमये गलयरोगादि जायते ॥ पुत्रादुःखमनुभूय पु
मानुषनारीरेषु संभवति तत्र ब्रह्महा क्षयरोगी राजयक्ष्मा भवति ॥ निषिद्धसुरापानरतोऽश्वनाव नः ठ्नस्वा

वे ब्रह्महा क्षयरोगी स्यात् सुरापः श्यावदंतकः ॥ हेमहारी तु कुनखी दुश्चर्मा गुरुतल्पगः ॥ ४ ॥ यो येन संवसत्येषां
स तल्लिंगो निजायते ॥ अन्नहर्ता मयावी स्यात् मूको वागपहारकः ॥ ५ ॥ धान्यमिश्रोऽतिरिक्तांगः पिशुनः पू
तिनासिकः ॥ ६ ॥

तः ब्राह्मणादेर्वाददन्नं किन्नित नखवृंग ॥ गुरुदारगामी दुश्चर्मत्वं कुष्ठितां ॥ एतेषां ब्रह्महादी
नां मध्ये येन पतितेन यः पुरुषः संवसति स तल्लिंगो निजायते ॥ ४ ॥ किंच अन्नहर्त्रेति ॥ अन्नस्यापहर्ता
मयावी अजीर्णानिः ॥ वागपहारकोऽननुमतो ध्यायी पुस्तकापहारी च मूको वागी द्विपविक्रेता नत्वेन ॥ धान्य
मिश्रको धान्यहारकोऽतिरिक्तांगः षडंगत्वादि पिशुनो विद्यमानपरदोषप्रख्यापनशीलो दुर्गंधिनासिकः ॥

तैलस्य हर्ता तैलपायी कीटविशेषो भवति ॥ सूचकोऽसद्दोषसंकीर्तनो दुर्गंधिवदनो जायते ॥ एतच्चातिर्यक्षास्त्रा
नरकानंतरमानुषशरीरप्राप्तौ तर्हि ज्ञेयं ॥ यदा तदा पुरुष्यमपहृत्यवला न्तरः अन्यः पति तिर्यक् जप्यावैव दुर्लं दा
विरिति मनुस्मरणात् ॥ ६ ॥ किंच ॥ परस्येति धर्मस्वं स्य ॥ यः परदारगमनं प्रहरति ब्रह्मस्वं वा तु सुवर्णं पतिरिक्तं ग्र

तैलहृत्तैलपायी स्यात् पूतिवक्त्रस्तु सूचकः ॥ ६ ॥ परस्य योषितं हृत्वा ब्रह्मस्व
मपहृत्य च ॥ अरण्ये निर्जले देशे भवति ब्रह्मराक्षसः ॥ ७ ॥ हीनजातौ प्रजाय
त परत्रापहारकः ॥ पत्रशाकं शिखी हृत्वा गंधान् छुछुंदरी शुभान् ॥ ८ ॥

पहृमस्य वा पनिर्जले देशे ब्रह्मराक्षसाख्यो भूतविशेषो जायते ॥ ७ ॥ किंच ॥ हीनजातावि ॥ हीनजातौ हेमकारा
ख्यायां पक्षिजातौ परत्रापरस्वापहारको जायते ॥ तथा च मनुः ॥ मणिमुक्ताप्रवालानि हृत्वा लोभेन मानवः ॥ वि
विधानि च रत्नानि जायते हेमकर्तृषु ॥ इति ॥ तथा पत्रशाकं हृत्वा मयूरः ॥ शुभान् गंधान् प्रहृत्य छुछुंदरिः ॥ राजदुहि
ता ख्याता मूषिका जायते ॥ ८ ॥

शि०प०
७५

मि० प्रा०
७६

किंच॥ सुखकरतिः॥ आम्रहार्यास्तुःपानं हृत्वोद्दुःफलं वानरः॥ लवणं च वशाकरं च काण्डः पक्षी॥ क्षीरं च ध्वांक्षः॥ गृहोपस्कर
रसं कान्त्यादि हृत्वापहृत्कारी वरटाख्यः कीटविशेषः॥ मधुहृत्वा दंशाख्यः कीटः॥ पलं मांसं हृत्वा गृध्राख्यः पक्षी॥ गोहृत्वा
गोधाख्यः प्राणिविशेषः॥ अग्निं हृत्वा बकाख्यः पक्षी॥ वस्त्रं हृत्वा श्वित्री॥ इक्ष्वादिरसं हृत्वा सारमेयः॥ लवणं हारी
चीरवाक्स्त्रैः स्वरः कीरः॥१०॥ एवं ग्रादवर्णा यं किंचिद्द्रव्यं त्वातीद्रव्यं दृष्ट्वा कोष्टेन वर्के कुपचाकेरको पाधिनाकर्म

मुखकोधान्यहारी स्याद्यानमुद्रः फलं कपिः॥ जलं पूर्व पयः काकी गृहकारी ह्युपस्करं॥ ९॥
मधुदंशः पलं गृध्रो गां गोधाग्निं बकस्तथा॥ श्वित्री वस्त्रं श्वा रसं तु चीरी लवणहारकः॥ १०॥
प्रदर्शनार्थमेतत्तु मयोक्तं स्तेयकर्मणि॥ द्रव्यप्रकारा हि यथा तथैव प्राणिजातयः॥ ११॥ ॥

विपाकं दर्शयितुमाह॥ प्रदर्शनार्थमिति॥ द्रव्यस्यापहृतस्य यथा यथा प्रकारास्तथा तथा प्राणिजातयः
स्तेयकर्मण्यपहर्तारो भवंति॥ यथा कांस्यहारी हंस इति॥ अथ पापक्रमसाधनं द्रव्यमपहरतीति साधनविक
लः॥ यथा पंगुतामश्वहारक इति॥ एवं वनक विद्विशेषो दर्शितः॥ ब्रह्महा कुष्ठी तैजसापहारी मंडली देवब्राह्मणकां
कोलाकः स्ववलितवाक्॥ गरदा स्त्रियानुमन्ता॥ गुरुपत्नीहंता अपस्मारी॥ गोघ्रश्चांध्य॥ धोषर्मपत्नीमुक्ताः सवयह
रेदेवे धीतारोगविशेषः॥ ११॥

५

कुंडाशी नगननहः देवब्रा स्वतास्य पहारी पांडुरोगी मांसापहारी काणः॥ स्त्रीयपणोपजीवी षंढः॥ कोमारदारत्यागी दुर्न
गः॥ मृष्टैकाशी वा नगुल्मी॥ अनृतस्तनन्न गंडमाली॥ ब्राह्मणीगामिनी वाजी॥ क्रूरकर्मा वामनः॥ वस्त्रापहारी पतंगः॥
शय्यापहारी क्षपणाकः॥ शंखस्वर्णापहारी कपाली॥ दीपापहारी कौशिकः॥ मित्रध्रुकृत्तपी॥ मातापित्रोराक्रोश
स्वंडकार इति॥ इत्यगौतमोपिकविद्विशेषमाह॥ अनृतवाक्स्खलो मुहुर्मुहुः संलग्नवाक्॥ जलोदरो हारत्यागी॥
कूटमाली शीपदी उच्छ्रनजंघचरणः॥ विवाहविघ्नकर्त्ता छिन्नोष्ठः॥ अंबगोरणोच्छिन्नहस्तः॥ मानगंधः स्नुषा
गामी वातवृषणः॥ चतुष्पथे विण्मूत्रविसर्गेन मूत्रकृच्छ्री॥ कन्यादूषकः षंढः॥ ईर्ष्यालुर्मत्ताकः॥ पिशाचविदग्ध
नोः पस्मारी॥ न्यासापहार्यनपत्यः॥ रत्नापहार्यत्यंतदरिद्रः॥ विद्याविक्रयी पुरुषमृगः॥ वेदविक्रयी द्वीपी॥ बहुयाज
नको जलप्लवः॥ अयाज्ययाजको वराहः॥ अनिमंत्रितभोजी वायसः॥ मृष्टैकाशी वा नरः॥ यतीस्तनो श्वनमार्ज
रः॥ कक्षवनदहनात्खद्योतः॥ दारिकाचार्यो मुखविगंधिः॥ पर्युषितभोजी कृमिः॥ अदत्तादायी बलीवर्दः॥ मत्स
री भ्रमरः॥ अग्न्युत्सादी मंडलकुष्ठी॥ शूद्राचार्यः श्वपाकः॥ गोहर्त्ता सर्पः॥ स्नेहापहारी क्षयी॥ अन्नापहारी अजी
र्णी॥ ज्ञानापहारी मूकः॥ चंडालीपुल्कसीगमने अजगरः॥ प्रव्रजितागमने मरुपिशाचः॥ शूद्रीगमने दीर्घकीटः॥ स
वर्णानिगामी दरिद्रः॥ जलहारी मत्स्यः॥ क्षीरहारी बलाकः॥ वार्धुषिको गहीनः॥ अविक्रेयविक्रयी गृध्रः॥ राजमहिषीगामी

मि॰प्रा॰ नपुंसकः॥राजान्कोशकोगर्द्दनः॥गोगामीमंडूकः॥अनध्यायेष्वध्ययनेशृगालः॥परद्रव्यापहारी परद्रेष्यः॥मस्त्र
७१ धेगर्त्तवासी इत्येते त्वनुर्ध्वगमनेति॥स्त्रियोप्येतेषुनिमित्तेषु पूर्वोक्तास्वनातिषु स्त्रीत्वमनुभवंति॥यथाह
मनुः॥स्त्रियोप्येतेनकल्पेनहृत्वाहेतमवाप्नुयुः॥एतेषामेवजंतूनां भार्यात्वमुपयांतिताः इति॥एतच्चसर्वप्रा
सादिलक्षणकथनं प्रायश्चित्तान्मुखीन्नजनसहायुद्वेगजननार्थंनपुनःस्वरूपमुक्तानां दाह्यावार्षिकादिप्रन
प्रामर्थंसंसर्गनिरूपणर्थं वा तथाहि पापफलपापफलयार्थ्यप्रायश्चित्तं॥नचप्रारब्धफलपापापूर्वविनाशे किंचनप्र
योजनप्रयोजनमस्तिनहिकार्मुकनिर्मुक्तोबाणोलक्ष्यवेधंवेगुल्यापारमप्राममतां पुनरपेक्षते॥नचतदारब्धफ
लवन्नैमर्गिककौन्तव्यादिकं भक्तानेत्रुत्रासने॥किंचनरकतिर्यकर्योन्यादिजन्मदुःखपरंपरानुभूतस्य हिकोक्षय
दिकोविकारश्चरं मफलं॥तेनचोमन्त्रमात्रेणाप्यकरणा पूर्वनाशोजन्यते मंषनजनिताशुभ्रदृक्षाणिनिवारणोद्य
॥तस्मात्पापविनाशार्थं व्रतचर्या न॥यिनंव्यवहारार्थं॥नहिविशिष्टाः कुनखादिनिसहसंबंधंपरिहरंति प्राचीनन
यात्नापनाशोनसंव्यवहाराचार्यतस्यापितिद्वैर्नार्थौव्रतचर्यया॥यन्तुवसिष्ठेनोक्तं कुनखीश्यावदंतस्त्वकृच्छ्रं चरे श्रि॰
द्वादशरात्रंचरेदिति॥तत्स्नामवन्मावस्यादिवन्नैमित्तिकमात्रं नपुनःपापक्षयार्थं संव्यवहार्यत्वसिद्ध्यर्थं वेतिमंतव्यं ७१
॥२१॥

किंच॥धूर्यैति॥यथेति॥यथाकर्मस्वदुःकृतानतिक्रमेणानदनुरूपं नरकादिफलं यत्कंतत्प्राप्यकालक्रमेणा
क्षीणकर्माणिदुष्टलक्षणादरिद्राश्चपुरुषेषुनिकृष्टाजायंते॥२२॥किंच॥ततश्चेति॥ततोदुर्लक्षणमनुष्यजन्मा
श्म नंतरं निकृष्टानतानस्कायुधनागेनक्षीणपापाः पाण्ड्यानवीयमुकनरोषेण महाकुलेनोगसंपन्नाविद्याधनधा
न्यसंपन्नाजायंते॥एवंप्रायश्चित्तेषुपरोऽत्तनार्थंकर्मविपाकमभिधायस्त्रधुनातेषामधिकारिणं निरूपयितुमा

यथाकर्मफलंप्राप्यतिर्यक्त्वंकालपर्ययात्॥जायंतेलक्षणभ्रष्टादरिद्राःपुरुषाधमाः॥२२॥
ततोनिष्कल्मषीभूताःकुलेमहतियोगिनः॥जायंतेविद्ययोपेताधनधान्यसमन्विताः॥२३॥
विहितस्याननुष्ठानान्निंदितस्यचसेवनात्॥अनिग्रहाच्चेंद्रियाणांनरःपतनमृच्छति॥२४॥

दः॥२३॥विहितस्येति॥विहितमिनियदावश्यकंसंध्योपासनाग्निहोत्रादिकंनित्यं॥अश्रुतिस्मृत्यनादौनैमित्तिक
तेनचाहितस्नानादिकंच॥तदनुयमुच्यते॥तस्यकरणान्निंदितस्यनिषिद्धस्यसुरापानादेःकरणात्॥इंद्रियाणाम
निग्रहाच्चनरःपतनमृच्छतिप्राप्नोतिप्रत्यवायीनवतीत्यर्थः॥नचविहितार्थेपुसर्वेपुनःप्रसज्जेनकामनरस्ती॥

मि० प्रा०
७८

यत्र सकेरपि निषिद्धत्वात्॥ निंदितमहत्त्वेन नरकार्यत्वान्निरर्थमनिग्रहाच्चेंद्रियाणामिति दृष्टयगुपादानं॥ अत्रो
च्यते॥ इंद्रियप्रसक्तिनिषेधस्यानेकांतनः त्रिनिषेधरूपतात्मानकत्वेन मध्योस्य मायात्रचरतानीमानिधार
येदिति प्रतत्राब्दाधिकारान्नरश्रवणाच्चेंद्रियप्रसक्तिप्रतिषेधकः संकल्पो विधीयते॥ सचात्मयरूपप्रति
ष्ययगुपादानं॥ ननु विहिताकरणास्यप्रत्यवेनीतिकुतो व्यवसितं॥ नतावद्दग्निहोत्रादिचोदनासु रूपप्रव
र्तनात्मिकानुष्ठानस्य प्रत्यवायहेतुत्वमाक्षिपति॥ विषयानुष्ठानस्य पुरुषार्थत्वावगतिमात्रपर्यव

तस्मात्तेनेह कर्तव्यं प्रायश्चित्तं विशुद्धये॥ एवं सम
स्यांतु रात्माच लोकश्चैव प्रसीदति॥१५॥ ॥ॐ॥

[illegible]द्विहितानाचरणमात्रेण प्रत्यवायानुपपत्तेः॥ न पुनरकरणस्य प्रत्यवायहेतुत्वमपि वक्ति॥ क्षीणत्वाक्रि
यास्त्वनुपपत्तेः॥ किंन्ना यद्यनुपपत्त्युपगमेपि चहत्निमित्तमपूर्वमपि न संकल्प्येत नहि निषिद्धमाणात्रिमा
जन्यप्रत्यवायपरिहारार्थतयैव तद्वर्जनस्य पुरुषार्थत्वसिद्धावपि फलांतरं कल्प्यते॥ तत्कस्य विद
पि मंगनेन ननु यथा निषिद्धेषु अर्थवादावगतप्रत्यवायपरिहारार्थतयैव पुरुषार्थत्वं तु॥

श्रि० वृ०
७८

तथा विहितेष्वर्थवादावगताकरणजन्यप्रत्यवायपरिहारार्थतास्मात्तस्यामेवं॥ न हि सर्वत्राग्निहोत्रादिषु तादृ
ग्विधा अर्थवादाः संति॥ न च विहितस्यानुष्ठानान्नरः पतनमृच्छतीति॥ इयस्मृतिरेव वाक्यशेषस्थानीयेति चतु
रस्रं॥ न हि वाक्यान्तरप्रमितेकार्ये वाक्यांतरेणार्थवादः संभवतु कथं विविदकवाक्यार्थेन यार्थवादस्तथापि नान्य ति॥ नव
वरूपं विहिताकरणकार्यांतरं जनयितुं क्षमते॥ ननु द्वारेणैवातिसारं चलं घनं परमौषधमिमा पुर्वेदवचा
नो जननात्मा वरूपं लंघनद्वारत्वांतिजनयतीति यथावगम्यते॥ तथात्रापि नवितुमेवं॥ यतो नात्रापि लं
घनात्मद्वारत्वं किं नहि द्विारनाशप्रतिबंधकतो जननाभावे सति जठरानलपरिपाकजनिताधातुसाम्या
दि तिमंतव्यं॥ तस्माद्विहितस्याननुष्ठानान्नरः पतनमृच्छतीति कथमस्याः स्मृतेर्गतिरिति वाच्यं न च वं
ति॥ अग्निहोत्रादिविषयाधिकारासिद्धिरूपं तत्प्रत्यवायानिप्रायेणेति नेदोषः॥ ननु वांतस्युल्कामु
खः प्रेतो विप्रो न च निविच्युतः॥ अमेध्यकुणपाशी तु क्षत्रियः कटपूतनः॥ मैत्राक्षज्योतिकः प्रेतो वैश्यो
भवति पूयभुक्॥ चैलाशकस्तु भवति शूद्रो धर्मात्स्वकाच्युतः इत्येतानि विहिताकरणप्रत्यवायपराणि मनु
वचनानि कथं घटंते॥ उच्यते॥ यथावांतमश्नतद्ग्रूकाया वा दह्यमानमुखस्य दुःखं तथास्यापि विहितमकु
र्वतः पुरुषस्य पुरुषार्थासिद्धेरिस्य करणनिंदनमनुष्ठानप्रशेवनार्थमित्यविरोधः॥ यदा प्रायश्चीयनिषिद्धान

मि० प्रा०
७९

रणाच्छिमविहितानुष्ठानविरागात्तस्मादित्तमेवंवोताश्रुत्युक्तमुखप्रेतत्वादित्युपमिति॥नकेवलेनावस्यकारणा
तेनिमित्तत्वं॥नतु पुंश्चलीवानरखरदष्टमिथ्याभिशस्तादौ विहिताकरणादिनिमित्ताभावमननमस्याप्यनावाव
॥कथंप्रत्यवायिता॥कथंचनदनावेप्रायश्चित्तविधानेउच्यते॥अस्मादेवपापक्षयार्थंप्रायश्चित्तविधानाज्ज
न्मांतराचरिताचरितनिषिद्धसेवादिजन्मपापापूर्वंसमाश्लिष्टमिथ्याभिशंसनादिकंतन्निमित्तप्रायश्चित्तापनो
द्यनमनानुष्ठितमितिकल्पते॥पुरुषप्रयत्ननिरपेक्षेणकार्यरूपपापोत्पत्त्यनुपपत्तेः॥नचपुंश्चल्यादिगत
प्रयत्नेनपुरुषांतरेपापोत्पत्तिःकर्तृसमवायित्वनियमाद्धर्माधर्मयोः॥तस्माद्युक्तैवप्रायश्चित्तेनिमित्तत्वप
रिणता॥तथाचमनुः॥अकुर्वन्विहितंकर्मनिंदितंचसमाचरन्॥प्रसक्तश्चेंद्रियार्थेषुप्रायश्चित्तीयतेन
रः॥इति॥नरग्रहणंचानुलोमानामपिप्रायश्चित्ताधिकारप्राप्त्यर्थंतेषामप्यहिंसादिसाधारणधर्मप्रति
कप्रसंगत्वात्॥यस्मादेवंनिषिद्धाचरणादिनाप्रसंगेति॥तस्मात्तेनेदकर्तव्यंप्रायश्चित्तंविशुद्धये॥तस्मात्त
नकृतनिषिद्धसेवनादिनापुरुषेणप्रायश्चित्तंकर्तव्यं॥इहलोकेपरत्रचविशुद्धयर्थं॥प्रायश्चित्तशब्दश्चायंपा
पक्षयार्थेनैमित्तिकेकर्मविशेषेरूढः॥एवंप्रायश्चित्तेकृतेसांतरात्माशुद्धपाप्रसीदति॥लोकश्चसंव्यवह
र्तुंप्रसीदति॥एवंचवदतेनदर्शितंनैमित्तिकोयंप्रायश्चित्ताधिकारः॥ ॥ शि० वृ०
७९

ततश्चार्थवादादवगतदुरितक्षयोपिजातेष्टिन्यायेनसाध्यतयास्वीक्रियते॥नचदुरितक्षयेजिहासुनामुनानु
ष्ठीयतेऽन्येनावनाकामाधिकारात्तत्रांकाकार्या॥यस्माच्चरितयमतोनिमित्तंप्रायश्चित्तंविशुद्धये॥निंद्यैर्हि
लक्षणैर्युक्ताजायंतेनिष्कृतेनसः॥इत्युक्तदोषप्रत्ययेनावश्यकत्वावगमात्॥२५॥प्रायश्चित्तात्करणेदोष
माह॥प्रायश्चित्तमिति॥पापेषुगम्यमानार्थव्यतिक्रमजनितेषुप्रसक्ताःपुरुषाअपश्चात्तापिनोमयाद्कृतमिति

प्रायश्चित्तमकुर्वाणाःपापेषुनिरतानराः॥अपश्चात्तापिनःकष्टान्नरकान्यांतिदारुणान्॥२६॥तामिस्रं
लोहशंकुंचमहानिलयशाल्मली॥रौरवंकुड्मलंपूतिमृत्तिकंकालसूत्रकं॥२७॥संघातंलोहितोदंसविषं
लोहशंकुंचमहानिलयशाल्मली॥रौरवंकुड्मलंपूतिमृत्तिकंकालसूत्रकं॥ संघातंलोहितोदंचस
विषंसंप्रपातनं॥महानरककाकोलसंजीवनमहापथं॥२८॥अवीचीमंधतामिस्रंकुंभीपाकंतथैवच॥अ
सिपत्रवनंचैकविंशतिं॥२९॥महापातकजैर्घोरैरुपपातकजैस्तथा॥अन्विता यांत्यचरितप्रायश्चित्ता
नराधमाः॥३०॥तमिस्रन्यैवउद्वेगरहिताःप्रायश्चित्तमकुर्वाणाःसुदुःसहान्नरकान्प्राप्नुवंति॥२६॥नरक
स्वरूपंविवृत्यन्नाह॥तामिस्रमिति॥तामिस्रप्रभृतीन्त्यपनपर्यंतानेकविंशतिनरकान्युगसहस्रसंख्यावधि
तिष्ठंतरनेदान्महापातकोपपातकजनितभयंकरदुरितैरन्विताअचरितप्रायश्चित्ताःपुरुषाधमाःप्राप्नुवं
ति॥२७॥२८॥

मि० प्रा०
८०

उपपातकदुरितनिरासार्थं प्रायश्चित्तमित्युक्तं विशेषमाह॥ प्रायश्चित्तैरिति॥ प्रायश्चित्तैर्वक्ष्यमाणैरज्ञानापूर्वे
नः पापं कृतं तदपैति निगच्छति॥ न कामतः कृतं। किंतु तत्र प्रायश्चित्तविधायकवचनबलादिह लोके व्यवहार्यो
जायते॥ अत्र च प्रायश्चित्तैरपैत्येनो यदज्ञानकृतमित्युपक्रमात् तत्र च नियोगिनयाज्ञानतस्त्रिवर्केप्यपतत्का
मतः स्पृष्टं तज्ज्ञानकामयोस्तुल्यत्वप्रदर्शनार्थं॥ तथा हि विहितपरकामानां कामाज्ञानतद्विगुणं भवेत्॥ अ
यावुद्दिष्टनिःपायामर्द्धं प्रायश्चित्तं॥ तथाज्ञे छेनाधिगनाश्च ज्ञाज्ञानानुकम्पयचना॥ कृच्छ्रं त्र्यंचकृतानि सा

प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत्॥ कामतो व्यवहार्यस्तु वचनादिह जायते॥२२६॥

नेन द्विगुणं भवेदित्यादिनिर्वचनेनाज्ञानकामयोस्तुल्यप्रायश्चित्तदर्शनात्तुल्यफलत्वमेव॥ किंच स्वतंत्रप्रवृत्तिनि
षयज्ञानकामनाम्नो नियतत्वात् योरस्य तत्र पापं पि तस्मा अस्मन्नवादतः कामतः स्पृष्टं ज्ञानं ज्ञानेन स्पृष्टेपि क
मः प्राप्नोत्यविनाभावात्॥ न च चौरादिनिर्बलात्कृतस्य ज्ञानस्य सत्यपि विषयज्ञाने कामनाभावात्तेन विना
वृत्तिर्व्याप्यत इति वाच्यं यतो न विद्यमानस्यापि ज्ञानस्य प्रवृत्तिहेतुत्वाभावेनाकामत्वं॥ यतु व्रतेऽपि पतितोन्यो मा
हं मपतनं तत्रापि वा

शिव०
८०

स्ववज्ञानाभावात् द्विषयकामनायाश्चाभावात् एवमज्ञानकामनयोरव्यभिचारात्॥ ननु प्रायश्चित्तैर
पैत्येनः इति नयुक्तं फलविनाशवत्त्वात्कर्मणामेवं॥ यथा पापो मन्त्रैः॥ अस्त्रगम्यानयानमरिष्टयोपीतिनात्र
प्रमाणं नसंक्रमणे॥ अत एव गौतमेन पूर्वोक्तरपक्षानंग्याः यमर्यादर्शितः॥ तत्र प्रायश्चित्तं कुर्यान्न कुर्यादिति मि
मांसं तेन कुर्यादित्याहुः॥ न हि कर्म परिक्षयं न इति॥ कुर्यादित्यपरे॥ पुनः स्तोमेनेष्ट्वा पुनः सवनमायान्तीति विज्ञा
यते॥ व्रात्यस्तोमेनेष्ट्वा तरति सर्वं पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजत इति॥ पुनः मायान्तीति सर्वेन संप
घ्नोति॥ षष्ठीमादि द्विजातिकर्मणि योग्योऽनवनीमर्थः॥ न वेदमर्यादामाश्चात्त्वधिकारिविशेषणाकाङ्क्षायां
रात्रिसत्रन्यायेनार्थवादिकफलस्यैव कल्पनायाम्प्राप्यत्वादतो युक्तं प्रायश्चित्तैरपैत्येनैः इति॥ ननु कामकृते
प्रायश्चित्ताभावात्कथं व्यवहार्यत्वं तदज्ञानकृतनिमित्ताधिकृतेपराधे प्रायश्चित्तमिति वसिष्ठवचनात्॥ अयं
विशुद्धिरुदिता प्रमाप्याकामतो द्विजं॥ कामतो ब्राह्मणवधे निर्विधीयते इति मनुवचनाच्चावगम्यते नैतत्
॥ अयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजं॥ न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते इति॥ तथा विहितं यद
कामानां कामानां कामात् द्विगुणं भवेत्॥ अनिकामकृतेऽपि प्रायश्चित्तदर्शनात्॥ यत्तु वसिष्ठवचनं॥ तस्मा
प्यकामकृते पराधे प्रायश्चित्तं अश्वत्त्वधिकरमित्यनिप्रायो न पुनः कामकृते प्रायश्चित्ताभाव इति॥ यत्तु मनु
वचनं॥ अयं विशुद्धिरुदितेत्यवमारीतदपीयमितिमर्वनामपरामृष्टद्वादशवार्षिकव्रतचर्याया एव कामतो ब्रा

मि० प्रा०
८१

स्मरणविधेर्निष्कृतिर्न विधीयत इत्यनेन प्रतिषेधो न पुनः प्रायश्चित्तमात्रस्य मरणान्तिकादेः प्रायश्चित्तस्य दर्शितं॥
ननु यदि कामकृतेपि प्रायश्चित्तमस्ति तर्हि पापक्षयोपि कुतो नास्मादविशेषात्॥ यदि पापक्षयोपि नास्ति त
र्हि व्यवहार्यतापि कथं भवति॥ उच्यते॥ उच्यते॥ उभयप्रायश्चित्ताविशेषेपि फलविशेषः शास्त्रतोवगम्यते
॥ अज्ञानकृते सर्वत्र पापक्षयः॥ यत्र तु ब्रह्महसुरापगुरुतल्पगमातृपितृयोनिसंबद्धागस्तेननास्तिकनिंदित
कर्माभ्यासिपतितत्यागिनः पतिताः पातकसंयोजकाश्चेति गौतमोक्तमहापातकादेरव्यवहार्यत्वं निषिद्धं त
स्मिन्नुपपन्ने यत्कर्मणि कामतः कृते व्यवहार्यमात्रत्वं न पापक्षय इति॥ नच पापक्षयाभावे व्यवहार्यत्वमनु
पपन्नं देहिपापस्य नरकोत्पादिका व्यवहारविरोधिका चेति॥ नच च नरकोत्पादिका शक्तिविनाशेपि
व्यवहारविरोधिकायाः शक्तेर्विनाशो नानुपपन्नः॥ तस्मात् पापानपगमेपि व्यवहार्यत्वमनुपपन्नं॥ यत्तु मनु
वचनं॥ अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः॥ कामकारकृतेप्याहुरेके श्रुतिनिदर्शनात् इति॥ तदपि काम
कृतेपि प्रायश्चित्तशास्त्रार्थं न पुनः पापक्षयप्रतिपादनपरं॥ आपस्तंबीये पुनः कामकृतेपि प्रायश्चित्तेन पाप
क्षयो भवत्येव॥ अकामतः कृतं पापं वेदाभ्यासेन शुध्यति॥ कामतस्तु कृतं मोहात्प्रायश्चित्तैः पृथग्विधैरि
ति मनुस्मरणात्॥ अत्र नीयकर्मणि कामकृते मरणान्तिकप्रायश्चित्ते पुरुषक्षयो न वर्तते फलान्तराभाव
त्॥

शि० पृ०
८१

न्मास्मिन् लोके प्रत्यापत्तिर्विद्यते कल्मषनिर्दग्ध इत्यापस्तंबस्मरणात्॥२॥ निषिद्धाचरणादिकं प्रायश्चि
त्तनिमित्तमित्युक्तं तत्प्रपंचयितुमाह॥ ब्रह्महेति॥ इतिरयं प्राणवियोगकरे फलके व्यापारे कृतः व्यापारः
समनंतरं फलं तदेव कारणं तत्र निरपेक्षः प्राणवियोगो न भवति॥ ब्राह्मणं हत्वा निबर्हणो मद्यपो निषि
द्धसुरायाः पाता स्तेनो ब्राह्मणसुवर्णस्य हर्ता ब्राह्मणसुवर्णापहरणं महापातकमित्यापस्तंबस्मरणात
॥ गुरुतल्पगो गुरुभार्यागामी॥ तल्पशब्देन शयनवाचिना भार्या लक्ष्यते एते ब्रह्महादयो महापात

ब्रह्महा मद्यपः स्तेनस्तथैव गुरुतल्पगः॥ एते महापातकिनो यश्च तैः सह संवसेत्॥२२७॥

किनः पातयंतीति पातकानि ब्रह्महत्यादीनि महत्त्वेन तेषां गुरुत्वं ख्याप्यते॥ तद्योगिनो महापातकिन इति
लोकव्यवहार्यसंज्ञाकरणं यश्च तैर्ब्रह्महादिभिः अन्यतमेन सह संवसति॥ एभिस्तु संवसेद्यो वै वत्सरं पतितेन सह
न स्यादेन सोपि महापातकी तथाह॥ शावः प्रकारवचनो नु ग्राहकशायो नकारादिकर्तव्यता यः॥ अनुया
त्येकम्बायः पल्यायमानममित्रमुपैति सहसा हंतारं कुरु हेतुर्दिमानमुपजनं उपकरोति स उच्यते॥

रुंपनप

त एवमनुमंतुः अनुमोदकस्य हिंसाफलसंबंधो दर्शितः ॥ बहूनामेककार्याणां सर्वेषां नानाव्यापारिणां येके
षां तयेव न समर्वे तेयातकाः सा नाऽस्ति ॥ तथा प्रयोजकादीनामपि प्रत्यासन्नत्वेन फलसंबंधत्वकः ॥ प्रयोजयिताः
नुमंताकर्त्ता चेति स्वर्गनरकफले युक्तम्मंमुनेगिनोऽन्ह्यो यस्मात् नरैर्तेनस्मिन् फलविशेष इति ॥ तत्र प्रेरकस्य
प्रवर्त्तकः प्रयोजकः स च त्रिप्रकारः आज्ञापयिता नर्थयमान उपदेष्टेति ॥ तत्राज्ञापयिता नाम स्वयं प्रभुः सन्
नीचैन्नृत्यादिकं प्रवर्षे न यति ॥ मदीयमपि त्वं न हीनिस इत्युक्ते ॥ अभ्यर्थयमानस्तु परः स्वयमसमर्थः प्रार्थनादिना
ममवानुव्यापारये त्युक्तं प्रवर्त्तयति सोऽभिधीयते ॥ अनयोस्तु स्वार्थसिद्ध्यर्थमेव प्रयोक्तृत्वं ॥ उपदेष्टा पुनः स्व
ल्प्तानुमिच्छं व्यापारयेतिः समोच्चारणाद्युपदेशपुरःसरं प्रेरयन् कथ्यते ॥ त्रय प्रयोजक एव फलमिति विषां ने
दः ॥ अनुमंतानुप्रवर्त्तनस्य प्रवर्त्तकः स च द्विप्रकारः कश्चित् स्वार्थसिद्ध्यर्थमनुजानाति कश्चिन्परार्थमिति
॥ नन्वनुमननस्य कथं हिंसाहेतुत्वं नना वल्लाणाविप्रयोगो माऽदने नैतस्मान्नात् कर्त्तृव्यापारजनकत्वात् ॥ नापि
प्रयोजकस्य कस्मात् कर्तृ प्रवृत्त्युत्पादनद्वारेण प्रवर्त्तकत्वात् ॥ न च साधुत्वयामवसिनमिति
प्रवृत्तस्यैवानुमन्तव्यतः इति शंकनीयं ताद्रूप्यहिंसां प्रत्यहेतुत्वाभावादिति उच्यते ॥ यत्र हि राजादिः पार
लश्यकस्य मनसा प्रवृत्तोऽपि प्रवृत्तिं विच्छेदनयोदागामिराजदंडनयाद्वात्रि पिलप्रयत्नो राजा यद्यनु ॥

मातिमपेन्न तेन ज्ञानुमतिं दत्तु अत्र त्विमुपोवल्लयन्तो हिंसाफलं प्रतिहेतुतां प्रतिपद्यते ॥ तथा यो पि न र्म्ननता
ऽनर्थनाऽऽहारादिना परानुकोपयति सोऽपि मरणहेतुत्वत मसंपादनद्वारेण हिंसाहेतुर्न च नता नविद्युतो
क्ताः आकुष्टनाडिनोवापि धनेर्वा विष्णुयो जितः ॥ यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकं ॥ तथा ताक्षि
प्तेन कष्टार्थमुद्दिष्टेत्वार्थमेव च ॥ यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकमिति ॥ न च वंचकेनेयुष्मा
कोत्रान्नादिषुमसति स्मृत्स्य दर्शनादकारणत्वे निरंकनीयं ॥ पुरुषस्वभावस्य विज्ञातये न नरेणापि निम्मि
ते न ज्ञातमन्यथेन वंदि ॥ तेषामपि निवारयितुं नाकरणता ॥ एते षां चानुग्राहक प्रयोजकादीनां प्रत्यासत्ति
स्य वधानापेक्षयोद्यापापरगतगुरुलाघवापेक्षया च फलगुरुलाघवात्वाय श्चित्तगुरुलाघवं वेदितव्यं ॥
यो त्रूयस्मात्रनेतस्मिन् फलविशेष इति वचनात् ॥ तथा अनुग्राहकस्य नावश्यमेव हिंसायां प्रवृत्तत्वे
न स्वतंत्रकर्त्तृत्वे समपि माद्यान्नाणवियोगफलकत्वं द्रव्यागदि व्यापारयोगित्वा नावेन साक्षात्कर्त्त
त्वहिंसारंभकत्वाभावादल्पफलत्वं च मत्वा प्रायश्चित्तं च ॥ प्रयोजकस्यानुमंतृकर्तृप्रवर्त्तितत्वेनक
त्वे न व्यवहितत्वात् ॥ ततोऽप्यल्पफलत्वं प्रयोजकादीनां मध्ये परार्थप्रवृत्तत्वेनोपदेष्टुरल्पफलत्वा
नुप्रयोजकहृत्स्थानीयत्वात् प्रयोजनस्य नफलसंबंधो युक्तः ॥ यदि परप्रयुक्ता प्रवर्त्तमानस्यापि
फलसंबंधस्तर्हि त्तिपतित उपारवनिनयन्तीनामपि मूले न प्रवर्त्तमानानां स्वर्गादिफलं स्या

त्ति प्रसंगः ॥ उच्यते। आम्रफलं प्रयोक्तरि इति न्यायेनाधिकारिकर्तृगतफलजनकादेरेव कूलतडागनिर्मा-
णादेर्यन्न च स्थपतिन्तडागकर्त्रादियोरेव कूलतडागकरदिष्वधिकारिणो स्वर्गगामित्वात् ॥ अत्र पुनः परप्र-
युक्तानां प्रवर्तमानानामप्यहिंसायामधिकारित्वाज्ञवस्यैव न व्यतिक्रमनिबंधनो दोषः ॥ अनुमंतुस्तु प्र-
योजकवादल्पफलत्वाप्रयोजकव्यापाराद्बहिरंगत्वाद्प्रयुक्ताज्ञानुमननस्य निमित्तकर्तुः पुनराक्रोशका-
देः प्रवृत्तिहेतुकृतमन्युजनकत्वेनाव्यवहितत्वात् मरणानुसंधानं विना प्रवृत्तत्वाच्चानुमंतुः सकाशादप्य-
फलत्वान्नैव परिक्षिप्तवद्गि तस्याधिकारणत्वेन हिंसा नापित्रोरपि दंडपुत्रोत्पादनद्वारेणाहननकर्तृत्वप्र-
प्रसंगः उच्यते। न हि पूर्वन्नाविद्यमानेणाकारणत्वे कारणाकारणानया पितयानावितोपपत्तेः। पयसस्वरूपेण
स्वरूपातिरिक्तकार्योत्पत्त्यनुगुणव्यापारयोगित्ववितद्विकारणं। यदि स्यात् तस्मात् सोमः स्यादिंद्रवाय-
वायवानां न यद्दानग्रहणीयादिति दिर्श्यते तस्मान्नैव कर्तारि द्रव्यापवाप्रनायां निबंधनं न हि तत्र सोमप्र-
गः स्वरूपेणाकारणत्वं निवारावान न तत्पित्रोस्त्वाद्द्विधकारणत्वयोगित्वमिति नातिप्रसंगः ॥ अनेनैव
न्यायेन धर्मान्निसंधिना निर्मितकूपवाप्यादौ प्रमादपतितस्य नृयादिमरणे खनयितुर्दोषाभावः ॥ न
हि कूपेन नखानितो दृमान्मानेव्यापारयोरेवं कूपखननमेव निमित्तं व्यापादनं यथाक्रोशादौ

तः कूपकर्तुरपि कारणत्वमेव न पुनर्हिंसाहेतुत्वमिति ॥ मातापितृतुल्यनैव ॥ तथा च न्यायपि हिंसा
निमित्तयोगित्वपरोपकारार्थप्रवृत्तेर्वचनाद्दोषाभावः ॥ यथाह संवर्तः ॥ बंधने गोश्चिकित्सार्थे गूढ-
गर्भविमोचने ॥ यत्ने कृते विपत्तिश्चेत्प्रायश्चित्तं न विद्यते ॥ औषधं स्नेहमाहारं ददद्गोब्राह्मणादिषु ॥ दीय-
माने विपत्तिः स्यान्न स पापेन लिप्यते ॥ दाहच्छेदशिराभेदप्रयत्नैरुपकुर्वतां ॥ प्राणसंत्राणसिद्ध्यर्थं प्रा-
यश्चित्तं न विद्यते ॥ न विद्यत इति णत्वं चारानिराननिरूपणानि पुणानि पश्चिषं ॥ इतरस्मृतिनिषेधस्याप्य-
तरत्वादप्यदृष्टदोषाद्दनिवृत्तिः ॥ यत्र च मनुनिमित्ताक्रोशनादिकमकुर्वतोपि नाम गृहीत्वोन्मादादिना
त्मानं व्यापादयति तत्रापि न दोषः ॥ अकारणं तु यः कश्चिद्द्विजः प्राणान्परित्यजेत् ॥ तस्यैव तत्र दोषः स्यान्न तु
यं परिकीर्तयेदिति स्मरणात् ॥ न्यायतः प्राप्ताक्रोशादिना जनितमन्युरात्मानं खड्गादिना प्रहृत्य मरणाद
र्वाक् आक्रोशनादिकर्तां धनदानादिना संतोषितो यदि ज्ञानसमक्षमुच्चैः श्रावयति नास्याक्रोशकस्याप-
राध इति गतत्रापि वचनान्न दोषः ॥ यथाह विष्णुः ॥ उद्दिश्य कुपितो हत्वा तोषितः श्रावयेत्पुनः ॥ तस्मिन्म-
ते न दोषोऽस्ति द्वयोरुच्छ्रावणे कृते इति गतानैषां च प्रयोजकारीणां दोषे गुरुलघुभावपर्यालोचनया
प्रायश्चित्तविशेषः स्मर्तव्यः ॥ २२ ॥ ॥

मि०प्रा० ८४

ब्रह्महत्यासमत्वमाह ॥ गुरूणामिति ॥ गुरूणामाधिक्येनाधिक्षेपः ॥ अनृतवादित्वं ज्ञानं गुरोरनृतवादित्वज्ञाप
नमिति महापातकसमानीति गौतमस्मरणात् ॥ एवं वेदनिन्दा नास्तिक्याभिनिवेशेन वेदविषयं दोषं बुद्ध्वान
न्दं परेषां समाख्यानं स्मादिन्ना पत्नीवस्मरणात् ॥ नास्तिकाभिनिवेशेन वेदकुत्सनं ॥ सुहृद्वधे त्वेतत्साम्यं

गुरूणामध्यधिक्षेपो वेदनिन्दा सुहृद्वधः ॥
ब्रह्महत्यासमं ज्ञेयमधीतस्य च नाशनं ॥२३॥

सरणस्यापि वधः ॥ अधीतस्य वेदस्याभ्यासच्छास्त्रविनोदेनालस्यादिना वा नाशनं विस्मरणं ॥ एतानि प्रत्येकं ब्रह्म
हत्यासमानि ॥ पुनः स्वाध्यायाभ्युत्थानमागत्याधीतस्यागम्योपपातकध्यो परिगणनं तत्क यत्किंचिद्
चनरणाकुलतया मच्छास्त्रश्रवणव्यग्रतया वा विस्मरणे द्रष्टव्यं ॥२३॥ सुरापानसमान्याह ॥ निषिद्धेति

प्रा० ८४

भक्षितं लशुनादिकं तस्य मतिपूर्वं भक्षणं ॥ अत एव मनुः ॥ छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटं ॥ पलाण्डुं गृञ्जनं
चैव मत्या जग्ध्वा पतेद्द्विजः ॥ अमतिपूर्वं तु प्रायश्चित्तान्तरं अमत्यैतानि षड् जग्ध्वा कृच्छ्रं सांतपनं चरेत् ॥ य
तिचान्द्रायणं वापि शेषेषूपवसेदहः इति नैवोक्तत्वात् ॥ जैह्म्यं कौटिल्यं ॥ अभिसंधानेनान्यवादित्वमन्यक
र्तृत्वं च ॥ अत्र च जैह्म्यमिति यद्यपि सामान्येनोक्तं ॥ तथापि प्रायश्चित्तस्य गुरुत्वान्निमित्तस्यापि गुरुविषयं जै
ह्म्यमिति गौरवमवगम्यते ॥ अत्र च नैमित्तिकपर्यालोचनया निमित्तस्य विशेषावगतिः ॥ यथाग्स्यो नावघ्री

निषिद्धभक्षणं जैह्म्यमुत्कर्षे च वचोऽनृतं ॥ रजःस्वलामुखास्वादः सुरापानसमानि तु ॥२४॥

अनुगतेष्वाताम्नीति क्षीरे चेदमनुद्याद्वा पुनराधेयं तत्र प्रायश्चित्तैरग्निनावस्यनिमित्तविशेषणते
नदविमनयत्वं दवविक्षिप्तं तत्र च पुनराधेयं निष्पादकं पुनराधेयरूपनैमित्तिकविधिबलादग्निदयानुमति
रेवं निमित्तमिति कल्प्यते ॥ तथात्रापीति युक्तं निमित्तं गौरवकल्पनं ॥ तथा समुत्कर्षनिमित्तं राजकुलादौ च तु
र्वेद एव चतुर्वेदाहमित्यनृतभाषणं ॥ रजःस्वलाया वक्त्रासवसेवनं ॥ एतानि सुरापानसमानि ॥२४॥ ॥

मि॰प्रा॰
८५

सुवर्णस्तेयसमान्याह ॥ अश्वेति ॥ अश्वादीनां ब्राह्मणसंबंधिनां निक्षेपस्य सुवर्णव्यतिरिक्तस्यापहरणं त
त्सुवर्णस्तेयसंमितं वेदितव्यं ॥२५॥ गुरुतल्पसमान्याह ॥ सखीति ॥ सखा मित्रं तस्य भार्या कुमारी उत्तमजातीया
कन्यका संकामास्वनुलोमासु न दोषस्तस्या यत्पतम ॥ दूषणे तु करच्छेद उत्तमायां वधस्तथेति तत्रैव दंडविधि
प्रतिपादनात् ॥ प्रायश्चित्तं गुरुतल्पयुक्तं स्वयोनिर्भगिनी ॥ अंत्यजा चांडाली ॥ सगोत्रा समानगोत्रा ॥ सुतस्त्री
स्नुषा ॥ एतासां गमनं प्रथमे कं गुरुतल्पसमं ॥ एतच्च रेतःसेकादूर्ध्वं वेदितव्यं अर्वाग्निवृत्तौ तु न गुरुतल्पसमत

अश्वरत्नमनुष्यस्त्रीभूधेनुहरणं तथा ॥ निक्षेपस्य च सर्वं हि सुवर्णस्तेयसंमितं ॥२५॥
सखिभार्याकुमारीषु स्वयोनिष्वंत्यजासु च ॥ सगोत्रासु सुतस्त्रीषु गुरुतल्पसमं विदुः ॥२६॥

॥ किंतु तत्समेव प्रायश्चित्तं ॥ रेतःसेकः कुमारीषु स्वयोनिष्वंत्यजासु च ॥ सख्युः पुत्रस्य च स्त्रीषु गुरुतल्पसमं विदुरि त्रिव॰
ति ॥ मानवे रेतःसेक इति विशेषणोपादानात् ॥ सगोत्रग्रहणेनैव सिद्धे सुतस्त्रीग्रहणं प्रायश्चित्तगौरवप्रतिपा ८५
दनार्थं ॥ अत्र च ब्रह्महत्यादिसमत्वकथनं गुर्वविधिदोषादेशार्थं तन्निमित्तप्रायश्चित्तोपदेशार्थं ॥ न तु वेदनिंदा
दोषस्य लघुत्वाद् गुरुतरं ब्रह्महत्यादिप्रायश्चित्तं न युज्यते ॥ मेवं गुरुप्रायश्चित्तोपदेशबलादेव दोषगुरुत्वाव
गतेः ॥ न च ब्रह्महत्या

दिप्रायश्चित्तातिदेशार्थमेवेदं वचनं न भवति ॥ किंतु दोषगौरवमात्रप्रतिपादनपरमित्याशंकनीयं ॥ यतस्तत्प्राय
श्चित्तप्रतिपादनपरत्वे ब्रह्महत्यासममिदं इदं गुरुतल्पसममित्यादिनिर्देशेन समत्वाभिधानं चोपपद्यते ॥ तत्प्राय
श्चित्तं समत्वादितोपदिश्यमानं ब्रह्महत्यादिप्रायश्चित्तेभ्यः किंचिन्न्यूनमेवोपदिश्यते ॥ लोके राजसमो मंत्री
मातृसमा पितृष्वसेत्यादौ किंचिद्धीनप्रयोगदर्शनात् ॥ महतः पातकस्येतरस्य च तुल्यत्वस्यायुक्तत्वाच्च ॥ एवं च स
ति यान्यत्र ब्रह्महत्यासमत्वेनोक्तानामपि ब्रह्मोज्झत्ववेदनिंदासुहृद्वधानां मनुना च सुरापानसाम्यं ॥

पितुः स्वसारं मातुश्च मातुलानीं स्नुषामपि ॥ मातुः सपत्नीं भगिनीमाचार्यतनयां तथा ॥२७॥

ब्रह्मोज्झता वेदनिंदा कौटसाक्ष्यं सुहृद्वधः ॥ गर्हितान्नाद्ययोर्जग्धिः सुरापानसमानि षट् ॥ इत्युक्तं तत्प्रायश्चित्त
विकल्पार्थं ॥ एवमन्येष्वपि वचनेषु विरोधः परिहर्तव्यः ॥ यत्तु वसिष्ठेन गुरोरलीकनिर्बंधे कृच्छ्रं वा स्नात्रं चरित्वा
सचेलः स्नातो गुरुप्रसादात्पूतो भवतीति लघुप्रायश्चित्तमुक्तं ॥ तदमतिपूर्वमकृद्दुष्टानेन वेदितव्यं ॥ अगु
रुतल्पातिदेशमाह ॥ पितुरिति ॥ पितृष्वसारं यः प्रसिद्धा ॥ गच्छन् गुरुदारतल्पलिंगच्छित्ता राज्ञा वधः कर्तव्यो द
ण्डार्थं प्रायश्चित्तं च तदेव वचनाद्वाज्ञाती प्रहृतीनारीणां भद्रणं ॥ यथाह नारदः ॥ माता मातृष्वसा श्वश्रूर्मातुला
गः तस्य[illegible] नी ॥

मि० प्रा०
८६

पितृष्वसा॥ पितृव्यसखिशिष्यस्त्रीभगिनीतत्सखीस्नुषा॥ दुहिताचार्यभार्या च सगोत्रा शरणागता॥ राज्ञी प्र
व्रजिता धात्री साध्वी वर्णोत्तमा च या॥ आसामन्यतमां गच्छन् गुरुतल्पग उच्यते॥ शिश्नस्योत्कर्तनं तत्र वधो दंडो
विधीयते इति॥ राज्ञी राजन्यकर्तृकगमनविषयैव। तद्गमने प्रायश्चित्तांतरोपदेशात्। तथा धात्री मातृव्यतिरिक्ता स्त
नपानादिना पोषयित्री। साध्वी व्रतचारिणी। वर्णोत्तमा ब्राह्मणी॥ अत्र च मातृस्नुषादुहितॄणां तु लिंग
छेदवधात्मको दंडो ब्राह्मणव्यतिरिक्तस्य न तु ब्राह्मणस्य हन्तव्यत्वं सर्वपापेष्वपि स्थितमिति तस्य वधनिषेधात्

आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः॥ छित्वा लिंगं वधस्तस्य सकामायाः स्त्रिया अपि॥२३३॥

प्रायश्चित्तत्वात्॥ अस्य च विषयं गुरुतल्पप्रायश्चित्तप्रकरणे प्रपंचयिष्यामः॥ अत्र च सुषुप्तगमनेः पू
र्वश्लोकेन गुरुतल्पसमीकृतयोः पुनर्ग्रहणं प्रायश्चित्तविकल्पार्थं॥ यदा पुनरेताः स्त्रियः सकामाः सत्य एतान्
पुरुषानन्यवशीकृत्योपभुंजते तेन दासामपि पुरुषवद्वधो दंडः प्रायश्चित्तं च तदेव॥ एतानि च गुरुतल्पादि
ननयागमनपर्यंतानि महापातकातिदेशविषयाणि॥ सद्यः पतनहेतुत्वात् पातकान्युच्यंते॥ यथाह यमः॥ मा
तृष्वसा मातृसखी दुहिता च पितृष्वसा॥ मातुलानी स्वसा श्वश्रूर्गत्वा सद्यः पतेन्नरः इति॥ गौतमेन पुनरन्येषामपि

मि०
८६

पदेशस्तेननास्तिकनिंदितकर्माभ्यासिपतितात्यागिनः पतिताः पातकसंयोजकाश्चेति तेषां महापातकोप
पातकमध्ये पाठान्महापातकान्न्यूनमुपपातकाच्च गुरुत्वं चावगम्यते। तदुक्तं महापातकतुल्यानि पापा प्र
युक्तानि यानि तु। तानि पातकसंज्ञानि तन्न्यूनमुपपातकं। तथा चांगिराः॥ पातके तु सहस्रं स्यान्महत्यु द्वि
गुणं तथा। उपपापे तुरीयं स्यान्नरकं वर्षसंख्ययेति॥२३॥ एवं महापातकानि तत्समानि च पातकानि परि
गणय्योपपातकानि परिगणयितुमाह॥ गोवध इति॥ गोवधो गोपिंडव्यापादनं। कालेऽनुपनीतत्वं व्रात्यता॥

गोवधो व्रात्यता स्तेयमृणानां चानपक्रिया॥ अनाहिताग्नितापण्यविक्रयः परिवेदनं॥२३४॥

ब्राह्मणसुवर्णातत्समव्यतिरिक्तपरद्रव्यापहरणं स्तेयं गृहीतस्य सुवर्णादेरप्रदानमृणानामनपाकरणं।
तथा देवर्षिपितृणां संबंधऋणस्यानपाकरणं च सत्यधिकारे अनाहिताग्नित्वं॥ ननु ज्योतिष्टोमादिकामश्रु
तयः स्वांगत्वेनाग्निनिष्पत्त्यर्थमाधानं प्रयुंजत इति मीमांसकप्रसिद्धिः॥ अस्य चात्मनिः प्रयोजनेन तस्यानु
पादने तदाधाने प्रवृत्तिस्याद्यर्थिनः स्वधनार्जने। यस्य पुनरग्निः प्रयोजनं नास्ति तस्य प्रवृत्तिरितिकथमनाहिता
ग्नितादोषः उच्यते॥ अस्यास्वाधानस्याकरणपक्षत्वं वचनान्निसमृतयोपि साधिकारत्वाविरोधादाधा

मि०प्रा०
८७

नस्यत्रयोजिकाऽनिस्मनिकारणामनिष्ठापोल्लङ्घनस्येदोषः॥ तथा पण्यस्य लवणादेर्विक्रयः॥ सहोदरस्यज्ये-
ष्ठस्यनिष्ठतकनीयसो दारानुराग्निसंयोगः परिवेदनं॥ पणपूर्वकमध्यापकादध्ययनग्रहणं॥ पणपूर्वमध्यापनं
च परदारसेवनं गुरुदारतल्पसमव्यतिरेकेण॥ पारिवित्त्यं कनीयसि कृतविवाहे ज्येष्ठस्याविवाहः पारिवित्त्यं॥ वार्धु-
ष्यं प्रतिषिद्धवृद्ध्युपजीवित्वं॥ लवणक्रिया लवणस्योत्पादनं॥ स्त्रियाद्यवधोऽत्र स्वरूपाः। धिआत्रेयीव्यतिरेकेण
शूद्रवधः॥ अदीक्षितविट्क्षत्रवधः॥ निन्दितार्थोपजीवनं। आराजस्थापितो योपजीवनं॥ नास्तिकंनास्ति

भृताद्ध्ययनादानं भृतकाध्यापनं तथा॥ पारदार्यं पारिवित्त्यं वार्धुष्यं लवणक्रिया॥ ३०॥ स्त्रीशूद्रविट्क्षत्र-
वधो निन्दितार्थोपजीवनं॥ नास्तिक्यं व्रतलोपश्च सुतानां चैव विक्रयः॥ धान्यकुप्यपशुस्तेयमयाज्यानां च याज-
नं॥

कं नास्ति परलोक इत्यादि निश्चयः॥ व्रतलोपो ब्रह्मचारिणः स्त्रीप्रसंगः॥ सुतानामपत्यानां वि-
क्रयः॥ धान्यं व्रीह्यादि॥ कुप्यमसारद्रव्यं त्रपुसीसकादि॥ पशवो गवादयः॥ तेषामपहरणं॥ गोवधो ब्राह्मणस्ते-
यमिश्रेनेन स्तेयग्रहणेनैव सिद्धेः॥ पुनर्धान्यकुप्यादिस्तेयग्रहणं निमायीं नतो धान्यादिव्यतिरिक्तद्रव्यस्ते-
येनावत्पकर्मेतदेव प्रायश्चित्तमपि तु ततो न्यूनमपि भवतीति बांधवग्रहणेनैव सिद्धेः॥ पुनः पुत्रोदिता॥

शिव०
८७

ग्रहणं व्याख्यातं॥ अयाज्यानां जातिकर्मदुष्टानां शूद्रव्रात्यादीनां याजनं॥ पितृमातृसुतानामपतितानां त्यागो
ग्रहीन्निवासनं। तडागस्यारामस्य चोद्यानोपवनादेर्विक्रयः॥ कन्यादूषणमंगुल्यादिना योनिविदारणं॥ न तु संभो-
गः॥ तस्य सखीनार्याकुमार्यादिविषये गुरुतल्पसमत्वोक्तत्वात्॥ परिविंदकयाजनं तस्य कन्याप्रदानं। कौटिल्यं गुरो-
रन्यत्र गुरुविषयस्य कौटिल्यस्य सुरापानसमत्वमुक्तं॥ पुनर्व्रतलोपग्रहणमत्रिप्रतिषिद्धप्रतिषिद्धपदिरस्वरणाकम-
लवेदनरणं सा कृतं वुलं न दयामीत्येवं रूपेषु प्रायश्चित्तं। न तु स्नातकः॥ व्रतप्रायश्चित्तं तत्स्नातकव्रतलोपे

पितृमातृसुतत्यागस्तडागारामविक्रयः॥ कन्यासंदूषणं चैव परिविंदकयाजनं॥ कन्याप्रदानं तस्यैव कौटि-
ल्यं व्रतलोपनं॥ ३३॥ आत्मनोऽर्थे क्रियारंभो मद्यपस्त्रीनिषेवणं॥ स्वाध्यायाग्निसुतत्यागो बांधवत्याग एव च॥
३४॥

व्रतप्रायश्चित्तमनोजनमितिमनुनाल्पप्रायश्चित्तस्य प्रतिपादितत्वात्॥ तथाऽऽत्मार्थं च पाकादेरा-
क्रियारंभः स्वार्थमेव केवलं भुंक्ते यः पचत्यात्मकारणादिति तस्यैव प्रतिषिद्धत्वात्॥ क्रियामात्रविषयत्वे तु प्रति-
षेधकल्पनायां गौरवं स्यात्॥ मद्यपायाः स्त्रिया जायाया अपि निषेवणमुपभोगः॥ स्वाध्यायस्य त्यागो व्याख्यातः॥
अग्नीनां श्रौतस्मार्तानां त्यागः॥ सुतत्यागः॥ संस्काराद्यकरणं। बांधवानां पितृव्यमातुलादीनां त्यागः॥ ॥

मि॰प्रा॰ ४४

मतिविनवेः परिरक्षणपाकादिदृष्टप्रयोजनसिद्ध्यर्थमार्द्रद्रुमछेदेन त्वादृष्टवनीपयपरिरक्षणार्थमपि निषिद्धियादि
सम्भकौषधेनवजीवनं वर्त्तनं स्त्रीहिंसौषधिजीवनं ॥ तत्र स्त्रीजीवनं नाम भार्यापण्यभावेन प्रयोजनलब्धोपजी
वनं स्त्रीधनोपजीवनं हिंसया जीवनं प्राणिवधेन जीवनं औषधजीवनं वशीकरणेन हिंस्रयंत्रस्य तिलेक्षुपीडाकर
णस्य प्रवर्त्तनं ॥ व्यसनानि मृगयादीनि अष्टादश ॥ आत्मविक्रयो द्रव्यग्रहणेन परदासीकरणं ॥ हीनेषु मैत्रीकर
णं ॥ अन्यवर्णदारस्य केवलहीनदारोपगमनं ॥ साधारणस्त्रीसंभोगश्च ॥ अग्न्यहीताश्रमित्वं परपाकरति

रेंधनार्थं द्रुमछेदः स्त्रीहिंसौषधजीवनं ॥ हिंस्रयंत्रविधानं च व्यसनान्यात्मविक्रयः ॥ ३५ ॥ ॥
शूद्रप्रेष्यं हीनसख्यं हीनयोनिनिषेवणं ॥ तथैवानाश्रमे वासः परान्नपरिपुष्टता ॥ ३६ ॥

तं ॥ असच्छास्त्रस्य चार्वाकादेर्ग्रंथस्याधिगमः ॥ सर्वाकरेषु सुवर्णाद्युत्पत्तिस्थानेषु राजाज्ञयाधिकारित्वं
॥ भार्यायाविक्रयः ॥ चशब्दान्मन्वाद्युक्तानि चारामनिपूर्वैलग्नानादिनस्त्रणादेर्ग्रहणं ॥ एषां गोवधादीनाम् त्रिवृ॰ ८८
एकैकमुपपातकसंज्ञं वेदितव्यं ॥ मनुना पुनरस्यापि निमित्तानि जातिभ्रंशकरसंकरीकरणपात्रीकरण
मलिनीकरणसंज्ञानि परिगणितानि ॥ ब्राह्मणस्य रुजः कृत्वा घ्रातिरघ्रेयमद्ययोः ॥ जैह्म्यं पुंसि च मैथुनं जाति

भ्रंशकरं स्मृतं ॥ खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा ॥ संकरीकरणं ज्ञेयं मीनाहिमहिषस्य च ॥ निंदिते
भ्यो धनादानं वाणिज्यं शूद्रसेवनं ॥ अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणं ॥ कृमिकीटवयोहत्या मद्यानुगत
भोजनं ॥ फलैधःकुसुमस्तेयमधैर्यं च मलावहमिति ॥ अतोऽन्य निमित्तजातं प्रकीर्णकं कथ्यते ॥ हृद्ध्रेदसु
नाच ॥ समस्तानि प्रायश्चित्तनिमित्तानि नरकप्राप्तिसिद्ध्यर्थं कसंतानोऽदर्शिनां निर्दर्शितानि ॥ सुरसुरा
पानं ब्राह्मणसुवर्णापहरणं गुरुदारानिगमनमिति महापातकानि तत्संयोगश्च ॥ अगम्यागमनं दुहितृ

असच्छास्त्राधिगमनमाकरेष्वधिकारिता ॥ भार्याया विक्रयश्चैषामेकैकमुपपातकं ॥ ३७ ॥

गमनं त्वघागमनमिति पातकानि ॥ याग्रस्थाग्याच्छत्रियस्य वधो वैश्यस्य च रजःस्वलायाश्चांतर्वत्न्या आ
त्रेयी याश्चाविज्ञातस्य गर्भस्य शरणागतस्य च घातनं ब्रह्महत्यासमानि ॥ कौटसाक्ष्यं सुहृद्वधश्चेति
सुरापानसमे ॥ ब्राह्मणस्वन्यस्य हिरण्यं सुवर्णस्तेयसमं ॥ पितृव्यमातामहमातुलश्वशुरनृपपत्न्यभिगमनं गुरु
दारसमं ॥ पितृष्वसुर्मातृष्वसुर्गमनं श्रोत्रियर्त्विगुरुपाध्यायमित्रपत्न्यभिगमनं च ॥ स्वसुः सख्याः सगोत्रा

मि० प्रा०
८९

पात्रत्वमवगार्ण्यपारजस्वलायाः शरणागतायाः स्त्रीजितायानिक्षिप्तायाश्च गमनमित्येतानुपपातकानि॥ अ
नृतवचनं समुत्कर्षे राजगामि च पैशुन्यं गुरोश्चालीकनिर्बन्धो वेदनिन्दाधीतस्य त्यागोऽग्निपितृमातृसुतदा
राणां चाभोज्यानां चान्नभक्षणं परस्वापहरणं परदाराभिगमनमयाज्यानां च याजनं॥ व्रात्यसवान्तकाध्यापनं
भृताद्ध्ययनादानं सर्वाकारेष्वधिकारो महायन्त्रप्रवर्तनं॥ द्रुमगुल्मवल्लीलतौषधीनां हिंसा स्त्रीजीवनं अ
भिचारमूलकर्म च मिश्रनिरात्मनोऽर्थं क्रियारंभो नास्तिकता देवर्षिपितृणामृणानपाकरणं पक्षिपाः सच्छा
स्त्राधिगमनं नास्तिकता कौशीलवता मद्यपस्त्रीनिषेवणमित्युपपातकानि॥ ब्राह्मणस्य रुजःकरणं घ्रेय
मद्ययोर्घ्राणं जैह्म्यं॥ पशुषु पुंसि च मैथुनाचरणमित्येतानि जातिभ्रंशकराणि॥ खराश्वोष्ट्रमृगेभाजाविकवधः सं
करीकरणं॥ निन्दितेभ्यो धनादानं वाणिज्यं कुसीदजीवनमसत्यस्य भाषणं शूद्रसेवनमित्यपात्रीकरणानि॥ प
क्षिणां जलचराणां जलजानां च घातनं॥ कृमिकीटघातनं मद्यानुगतभोजनमिति मलावहानि॥ एतदनु
क्तं प्रकीर्णकमिति कामायनेन तु महापातकसमानां विदुषानुपातकत्वेनोक्तानां पापसंतारत्रिंशा
॥ महापापं चातिपापं तथा पातकमेव च॥ प्रासंगिकं चोपपापमित्येवं पंचको गणः इति मनुपपातकादी
नां कथं पापकत्वं पतनहेतुत्वाभावात्॥ यद्यपि तेषामपि न हेतुत्वं नहि माचरणियोनिस्संबद्धा॥ ॥

शिव०
८९

गइत्यादिपरिगणनमनर्थकं॥ अथैवच्यते॥ यद्यपि महापातकसमानेष्विव सद्यःपतनहेतुत्वं नास्ति
यापस्मासापेक्षया पातित्यमविरुद्धं॥ निन्दितकर्माभ्यासितिगौनमवचनादितिमेवं॥ अभ्यासमानि
रूपमाणत्वादहिश्रनकृत्वोपेतिनवाविशेषेणं॥ क्रियमाणयोपिहिरिवाभ्यपिनियः ज्ञानकृत्वावागोवधं
केरोति॥ नयोरविशेषणपातित्यमात्॥ अत्रोच्यते॥ याज्ञवल्क्यं वारंयप्रवत्तायविशेषः श्रूयते॥ आपस्ति
नबकृत्वानम्भिनिन्दितकर्मणियवनासमानेमहापातकतुल्यत्वं नवनिनावानमामःपातित्यहेतुःस्यि

शिरःकपाली ध्वजवान् भिक्षाशी कर्म वेदयन्॥ ॥

सापारो तु महद्वकृत्वोऽप्यसमानेनमहापातकतुल्येन न वनीनिनत्रपातिसं॥ अतोपुत्रमुपपातक
देरभ्यासापेक्षयापतनहेतुत्वं॥ ३॥ एवं संक्षेपादार्थं मतानेदार्थमहितेन्प्रायश्चित्तं निमित्तपरिगणनं कृत्वा
नैमित्तिकं निरूपयितुमाह॥ शिर इति॥ शिरसः कपालमस्यास्तीति शिरःकपाली तथा ध्वजवान् ठत्वा
वानशिरोध्वजमितिमनुस्मरणात्॥ अस्मच्छिरःकपालं दण्डाग्रसमारोपितं ध्वजशब्दवाच्यं गृह्यो पातान्त
चकपालं स्वव्यापादितब्राह्मणशिरःसंबंधियाह्यं॥ ब्राह्मणं ब्राह्मणघातयित्वा तस्यैव शिरःकपालमारा
पतीयोमनुसंचरेदिति॥ ॥

मि॰ प्रा॰
९०

ख्यातात्पस्मरणात् ॥ तस्यानेनस्य त्राणायेत्यस्य स्मृत्यर्थं ॥ एतद्दुनयं प्राणिनैवयाह ॥ खट्वांगकपालपाणिरिति
गौतमस्मरणात् ॥ खट्वांगमाद्देनदंडारोपितशिरःकपालो ध्वजी ग्रहीतेन पुनः षट्कैकंठेनाः महोक्षाः खट्वांगं
पस्त्रुरिस्यादिस्मवहारेवैतनैवधमिदं ॥ एतच्चकपालधारणं निकार्यं न पुनर्भोजनार्थं भिक्षार्थं वा ॥ मन्मयेक
पालपाणिर्भिक्षार्थं ग्रामं प्रविशेदिति गौतमस्मरणात् ॥ तथा वनवासिना तेन च न वितन्यं ॥ ब्रह्महा द्वादशाब्दा
नि कुटीं कृत्वा वने वसेदिति मनुस्मरणात् ॥ गाममीपादौ वा कृतकापनो वानि वसेद्ग्रामांते गोव्रजे तपाश्रमे

ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नुयात् ॥२४३॥

मे वृक्षमूले वा सर्वभूतहितेरतः इति नैनवीक ल्वात् ॥ कृतवापनो वेति विकल्पाभिधानात् कुटीवेतिगमनेन
श्मनाएव संवर्त्तः ॥ ब्रह्महा द्वादशाब्दानि बालवासा जटी ध्वजीति ॥ तथा भिक्षाशनः शीर्ष्णः कवे त ॥ भिक्षानि
हितकेन मन्मयखंडेन शरीर्वेणया वा ॥ लोहितकेन खंडशरावेण या मे भिक्षायै प्रविशेदिसा पस्तंबस्मर
णात् ॥ सप्तागारा एव वा त्र्य सकृत्मनेन वनेसोवमसंकल्पितानि भिक्षार्थं प्रविशेदिति सप्तागाराण्यसंकल्पि
तानि चरेद्भैक्षमिति च वसिष्ठस्मरणात् ॥ तथैककालाशनो वमायात् ॥ एककालाहारः इति नैनवीक ल्वात् ॥
ते॰

प्राय॰
९०

तच्चैनेसंब्रास्मरणादि वर्णीधैवकार्यं ॥ चातुर्वर्ण्यं चरेद्भैक्षं खट्वांगी संयतः पुमानिति संवर्त्तस्मरणात् ॥ तथात्र
स्रहास्मीति स्वकर्म ख्यापयन् ॥ द्वारि स्थितो भिक्षायां चैव वेद्मनो द्वारि तिष्ठन् मिनिमिक्षार्थं ब्रह्मघातकृद्भिक्षा
च ॥ मन्मरणात् ॥ अयं च भिक्षाशितनियमो व्यवस्थावनात् ॥ कोऽह्नः स्यः ॥ भिक्षायै प्रविशेत्सप्तसंवत्सरान्ब्र
ती तिसंवर्त्तस्मरणात् ॥ तथा ब्रह्मचर्यादियुक्तेन च नेन न वितन्यं ॥ खट्वांगकपालपाणिर्द्वादशसंवत्सरान्ब्र
ह्मचारी भिक्षायै ग्रामं प्रविशेत् कर्माचक्षाणः पथोपक्रामेत्संदर्शनेदाचार्यस्य स्थानासनाभ्यां विहरन्स
वनेनेषूदकोपस्पर्शी शुध्येदिति गौतमस्मरणात् ॥ ब्रह्मचारिणश्च वर्जयेन्मधुमांसगंधमाल्यादिवास्त्राञ्ज
नाभ्यंजनोपानच्छत्रकामक्रोधलोभमोहहर्षनृत्यगीतपरिवादनयानीति ब्रह्मचारिप्रकरणोक्तवि
रुद्धधर्मप्राप्त्यर्थं ॥ अत एव चोक्तः ॥ स्थानवीरासनी मौनी दीर्घरत्तु ॥ भिक्षाचर्याग्निकार्यं च कृष्णाजिनसंग
जप इति नियमनवेदिति शेषः ॥ अत्र सवनेषूदकस्पर्शी निस्नानविधानात्त्रिदंगकृतमंत्रादिस्नाने वग
तो ॥ तथा शुचिनाकर्मकर्त्तव्यमिमिस्यमर्वकर्मसाधारणत्वात् ब्रह्मचर्यांगत्वेनोचसंपन्नं ध्यानवस
धोपासनमपिकार्यं ॥ तस्यापिकार्यं ॥ तस्यापि दोषापादनद्वारेण सर्वकर्मशेषत्वात् ॥ तथा च दक्षः ॥
संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ॥ यत्किंचित्कुरुते कर्म न तस्य फलभाग्भवेदिति सच्चरित्रा

[illegible] ८१

निकर्मणोहानिःपतनमितिवचनात्तत्प्रसंगाच्चद्विजातिकर्मत्वात्प्राप्तिरितिचेत्कथनीयं॥तस्मात्पतितस्येव
ननचर्यापरेणतुतानरेणनयैवसंध्योपासनादिप्राप्तिरनोद्विजातीनामध्ययनमिज्यादानंतत्रास्त्रणस्याधिक
श्चवचनपाठनप्रतिग्रहाइत्यादीनामेवद्विजातिकर्मणांतत्रतच्चर्यायांनिगृह्णतांहानिर्नसंध्यादीनावश्यकानामा
पिनहानिवचनस्यचरितार्थत्वात्॥इयंचमनुयाज्ञवल्क्याभ्यांनमादिप्रतिपादिनाद्वादशवार्षिकव्रतस्यचैथे
कत्वनपुनर्भिन्नाप्रस्परस्मात्प्रवृत्तत्वाद्विरोधात्॥तथाहिनिषिद्धकर्मवृद्धयन्तियुक्तोकिंनिष्पाप
नकेयागदेवयुक्तनियुक्तसाकांक्षोपजायेतेवान्ततत्रहिलोहितकेनखंडनारावेणास्यापसंवादिवचनैःपरिपू
र्यमाणनिरूढं॥स्तनःसर्वेषांकृकल्पापदेशानयनेकेविदुक्तं॥मनुगौतमाद्युक्तेतिकर्तव्यतायाःपरस्परसापे
क्षत्वेविकल्पइतिनदतिरूपेवाकमितिमंतव्यं॥एवंवादतावप्रतिव्रतचर्यामावस्त्रब्रह्महासुरापा
नुपावा॥इयंचाकामकृतब्रह्मवधविषया॥इयंविशुद्धिरुदिताप्रमाप्याकामतोद्विजं॥कामतोब्राह्मण
वधेनिष्कृतिर्नविधीयतइतिमनुस्मरणात्॥अत्रेदंचिंतनीयं॥किंद्वित्रिब्राह्मणवधेप्रायश्चित्तस्यतंत्रत
युनाहोस्विदावृत्तिरितितत्रकेचिन्ममंते॥ब्रह्महाद्वादशाब्दानीत्यत्रब्रह्महाशब्देकस्मिन्नपिवधेप्रयुज्यमानस्या
पादेकस्मिन्ब्राह्मणवधेयत्प्रायश्चित्तंतदेवद्वितीयेतृतीयेपि॥नत्वेकब्राह्मणवधनिमित्तेकप्रायश्चि

त्तानुष्ठानेसमनीदंकृतमितिनेनिवृत्ताकांक्षतेनवकुंदेशकालकर्तृणांप्रयोगानुबंधत्वेनानाप्रमनेदेनागत्प्रमाणादि
रूपत्वात्तत्रानुष्ठानेनैवपापक्षयलक्षणकार्यनिष्पत्तिर्युक्ता॥यथानत्रानुष्ठितैःस्वयाजादिभिरायैरेवा
दियुतंत्रेणैवानेकोपकारलक्षणकार्याणांनिष्पत्तिःनचैवंवाच्यं॥द्विब्राह्मणवधेपापस्यगुरुत्वादेन
मिगुरूणिगुरूणिजघ्नतिलघूनीतिवचनाद्गुरुत्वमेवप्रायश्चित्तानुष्ठानेयुक्तं॥विलक्षणकार्यतोत्रेवे
णानिष्पन्नंनुपपन्नेरितिपनोनेदवचनमाहुर्निर्विधायकं॥किन्तुप्रदिष्टानांगुरूत्वयुक्तानांप्रवस्थाप्रतिपा
दनपरंगमनवद्वितीयब्राह्मणवधेपापस्यगुरुत्वमप्रमाणानावात॥पञ्चमनुदेवलोक्तमयुक्तं॥विधेःप्रायश्चित्तकार
स्यानद्वितीयेद्विगुणंचरेत्तृतीयेत्रिगुणंप्रोक्तंचतुर्थेनास्तिनिष्कृतिरिति॥तदपिद्वादशवार्षिकमितिप्रकृत्यैवैनैमित्तिक
ताभ्यासपावर्तनःसिस्पापेनद्विब्राह्मणवधेचरनिमित्तिकत्वाभ्यासानुवादेनचतुर्थेनदत्वाविधिपरं
नतुनर्मेद्वितीयब्राह्मणवधप्रायश्चित्तानुष्ठानेद्विगुणविधिपरमिति॥वाकानेहरोषप्रसंगात्॥तस्माद्विद्वि
ब्राह्मणवधेपिप्रकृतद्वादशवार्षिकानुष्ठानंपुनःपुनःप्रायेणामवतेपुरोडाशादिवृत्तपाल्लंनिर्वपेदित्यादि
तदाहाद्विनिमित्तेनुपादितानादाभवमादीनांपृथगपरनेकेषांपिगदूराहादिनिमित्तेपृथक्त्वेनानुष्ठानं
पञ्चमोचमानोहिवचनविरोधेनाप्यांनवतिवचनान्तिपेःप्रायश्चित्तकादिनादिकंद्विब्राह्मणवधेप्रायश्चि

८१

मि० प्रा०
९२

त्ताउष्ठानाद्धत्रिविधिपर॥ एवं समतिक्रमाय जन्मतं त्रानुष्ठानबाधेनाष्ट त्रिविधा विदं वचनं नव वृत्तिर्निरोधकं स्या
दितस्या ग्रास्त्रप्राप्त्यनुवादकत्वेनानर्थकं स्यात्। नान्यपापाकानेदः॥ चतुर्थादिब्रह्मवधपर्युदासेनेतरन्नारन्न
प्रायश्चित्तविधानेन कार्यत्वात्॥ किंच चतुर्थे नास्ति निष्कृतिरिति लिंगदर्शनात्। हन्यमानस्य (सगणसंख्यो
कर्पोदाघ्नो गौरवं गम्यते॥ तथा देवलादिवचनाच्च। यस्मादनभिसंधाय पापकर्म चपंकृतं॥ तस्मैयं निष्कृतिर्दृ
शधर्मविद्भिर्मनीषिभिरिति॥ न च विलक्षणापोर्गुरुलघुत्वापयोः क्षयमंत्रेण निष्पद्यते। अत एवं विधं पुरो
१३७ अवस्थाविशेषेण॥ इयांस्तु विशेषः। परिवेत्तुर्यस्मिन्विषये कृच्छ्रो न तत्र परिवित्तेः प्राजापत्यमिति॥ परिवित्तिः कृच्छ्रं
कृत्वा दाराग्रे चरित्वा पुनर्विवाहितां चैवोपयच्छेदिति वसिष्ठस्मरणात्॥ वार्धुष्यलवणक्रिययोस्तु मनुयोगीश्व
रोक्तमासमात्रोपपातकप्रायश्चित्तानि जातिशक्तिगुणाद्यपेक्षया योज्यानि॥ इदानीं लवणक्रियानन्तरं क्षत्रशूद्र
विट्क्षत्रवधस्तु उपपातकमध्ये पठितं तत्र प्रायश्चित्तान्तरमाह॥ ऋषभेति॥ एकमधिकं यस्मिन्सहस्रे तत्

ऋषभैकसहस्रा गा दद्यात्क्षत्रवधे पुमान्॥ ब्रह्महत्याव्रतं वापि वत्सरत्रितयं चरेत्॥ १॥

सहस्राणाम् एवम् एकसहस्रैः ऋषभः॥ एकसहस्रो यासां गवां ताः ऋषभैकसहस्राः ताः क्षत्रवधे दद्यात्॥ अथ
वा ब्रह्महत्याव्रतं वर्षत्रयं कुर्यात्॥ वैश्यघाती पुनरेतद्ब्रह्महत्याव्रतं एकं वर्षं चरेत्॥ गवाम् ऋषभैकशतं
दद्यात्॥ शूद्रघाती तु ब्रह्महत्याव्रतं षण्मासान्मासान् चरेत्॥ यद्वा दश धेनुर्निरभ्यस्ताः सवत्सा दद्यात्॥ इदं चाका
मतो जातिमात्रब्राह्मणादिवधविषयं॥ अकामतस्तु राजन्यविनिपाते तिसृकर्मेतेषामेव प्रायश्चित्तानां
...नवेः निधानाद्दानतपसोः शक्त्यपेक्षया व्यवस्था॥ ईषद्वृत्तस्थयोस्तु रीयो ब्रह्महत्या॥ ॥

...त्रियस्य वधे स्मृतः॥ वैश्ये पष्टमांशो वृत्तस्थे शूद्रे ज्ञेयस्तु षोडश इति मनुकं द्वष्टव्यं सद्वृत्तविषये तु मार्द्ध
तुर्यपिकं कल्प्यं॥ हन्ताब्देन चान्यगुणादिकमुच्यते॥ गुरुष्ट्वा श्रेण्णां श्रीवंसमसि क्षियनियह॥ ब्रवर्तमहि
तानां तत्र सर्वं व्रतमुच्यते इति मनुस्मरणात्॥ यत्तु षष्ट्वा शीतवचनं॥ ब्राह्मणः क्षत्रियं हत्वा षड्वर्षाणि व्रतं चरेत्
॥ वैश्यं हत्वा चरेदेतद्व्रतं त्रैवार्षिकं द्विजः॥ शूद्रं हत्वा चरेद्वर्षं वृषभैकादशाश्च गाः॥ इति तदकारविषयं॥ श्रोत्रि
यक्षत्रियादिविषयं तु रीयोन क्षत्रियस्य वधे ब्रह्महत्याव्रतं॥ अर्द्धं वैश्ये पादं धेकुर्यात्तु रीयं तु षष्ठमपि विनिर्दिष्टमार्य

वैश्यहाब्दं चरेदेतद्दद्याद्वैकशतं गवाम्॥ षण्मासाच्छूद्रहाप्येतद्धेनुर्दद्याद्दशाथवा॥ ८॥

तीकं द्रष्टव्यं॥ यत्तु वसिष्ठवचनं॥ ब्राह्मणो राजन्यं हत्वाष्टौ वर्षाणि व्रतं चरेत्॥ षड्वैश्यं त्रीणि शूद्रमिति तद
पिहारीतीयेन समानविषयं॥ क्षत्रिये तिवगुणानुत्तमस्ते तावान्विशेषः तत्रकः॥ यदा श्रोत्रियो वृत्तस्थश्चन
तितदा पूर्वयोर्वर्णयोर्वेदाध्यायिनं हत्वा ऽत्यपघातीनरेतद्ब्रह्महत्याव्रतं इति द्रष्टव्यं॥ श्रोत्रियेषु नर्यागस्थ
क्षत्रियादौ ब्राह्मणस्य राजन्यवधे षड्वार्षिकं प्राकृतं ब्रह्मचर्यम् ऋषभैकसहस्राश्च गा दद्यात्॥ वैश्यवधे त्रै
वार्षिकम् ऋषभैकशतानां गवां दद्यात्॥ शूद्रवधे सांवत्सरीकम् ऋषभैकादशाश्च गा दद्यादिति गौतमोक्तोदान
तपसोः समुच्चयो द्रष्टव्यः॥ ॥

मि०प्रा०
१३७

मि० प्रा०
१३९

एतच्चामतिपूर्वविषयं पूर्ववदमतिपूर्वं च तुर्यवर्णेषु प्रमाप्य ब्राह्मणः पूर्वोक्तं संवत्सरं व्रतमाचरेत्॥ ते
षामन्ते गोसहस्रं च ततोऽर्द्धं तस्मादर्द्धं तदर्द्धं दद्यात्॥ सर्वेषामानुपूर्व्येण तिस्रो वत्सरस्मरणात्॥ इदं च गौतमीयविष
यत्वं किंचिन्न्यूनगुणे क्षत्रिये गुणाधिकयोर्वैश्यशूद्रयोर्वधे द्रष्टव्यं॥ स्त्रीशूद्रविट्क्षत्रवधः उपपातकमध्ये विशेष
त एव पठितो नोत्सर्गापवादन्यायगोचरत्वात्। वादुपपातकसामान्यप्रायश्चित्तान्यपि प्रायश्चित्तासन्नयोजनीयानि। तत्र
दुर्वृत्तक्षत्रियादौ कामतो व्यापादिते मानवं त्रैमासिकं चान्द्रायणं च वर्णक्रमेण योज्यं॥ अकामतस्तु योगीश्वरो
क्तं त्रिरात्रोपवाससहितमृषभैकादशगोदानं॥ मासं पञ्चगव्याहारं त्रैमासिकं च पयोव्रतं॥ यथाक्रमेण योज्यं॥
एतच्चाप्युक्तं व्रतजातं ब्राह्मणकर्तृकक्षत्रादिवधे द्रष्टव्यं॥ अकामतस्तु राजन्ये विनिपात्य द्विजोत्तमः॥ तथा
ब्राह्मणस्य राजन्यवधे षड्वार्षिकं॥ तथा ब्राह्मणः क्षत्रियं हत्वा इत्यादिषु मनुगौतमहारीतवाक्येषु ब्राह्मणग्र
हणात्॥ क्षत्रियादिकर्तृके तु क्षत्रियादिवधे पादन्यूनं द्रष्टव्यं॥ विप्रे तु सकलं देयं पादोनं क्षत्रिये स्मृतं॥ वैश्येऽर्द्धपा
दकस्तु शूद्रजातिषु ब्राह्मणेऽपि दृष्टं द्विगुणस्मरणात्॥ यत्तु पर्षद्या ब्राह्मणानां च समाराधितो द्विगुणं मतं॥ वैश्यघाता
त्रिगुणं प्रोक्तं पर्षद्वच्च व्रतं स्मृतमिति अङ्गिरोवरोवचनं॥ तत्प्रातिलोम्येन वा प्रारूप्यविषयमिति युक्तं॥ गोव
[…]रणे मूर्द्धावसिक्तादीनां वधे एतत्प्रायश्चित्तजातं न भवति॥ प्रा० १३९

[…]क्षत्रियादिव्यापादने वा॥ अतो दण्डानुसारेणैव तद्वधे पूर्वोक्तव्रतकरणं स्पष्टं द्विष्टः कामतोऽकल्पनीयो दण्डस्म
र्त्वकामतो द्विगुणः॥ दण्डप्रणयने कार्यं वर्णजात्युत्तराधरैः॥ इत्युत्तरस्त्रीवधे प्रायश्चित्तमाह॥ दुर्वृत्तेति॥ ब्राह्म
णादिनार्यो दुर्वृत्ताः स्वैरिण्यः प्रमाप्य क्रमेण दृतिं जलाधारं चर्मकार्मुकं बस्तं छागं॥ अविं मेषं च विशुद्धये द
द्यात्॥ इदं च प्रातिलोम्येनास्याज्जातिप्रसूतानां ब्राह्मण्यादीनामकामतो वधविषयं॥ ए॥ कामतस्तु ब्रह्म
गर्न्धआरुः॥ प्रतिलोमइति॥ ब्राह्मण्या वधे षण्मासाः क्षत्रियायाः स्मृताः त्रैवैश्यायाः द्विमासं पादं तथान्त्यजः॥

दुर्वृत्तब्रह्मक्षत्रविट्शूद्रयोषाः प्रमाप्य तु॥ दृतिं धनुर्बस्तमविं क्रमाद्दद्याद्विशुद्धये॥२३॥
प्रातिलोम्यप्रसूतानां स्त्रीणां मासावधिः स्मृतः॥ अन्तरप्रभवानां च सूतानां चतुर्द्विघाति॥२४॥

यदा तु वैश्यपकर्मणा जीवन्तीं व्यापादयति तदा किंचिदधिकं वैश्यिकेन किंचिदधिगौतमस्मरणात्॥ वैश्यिकेन
वैश्यपकर्मणा जीवन्तीं व्यादिना यां किंचिदेव देयं तत्र जलं॥ कोशकं पेविशेषो वा ब्राह्मण्याः प्रतिपादयेत् वधे पतु
ः क्षत्रियापाव स्त्री वैश्यवधेन याः॥ शूद्रायां मासिकं वैश्यपादकृत्यां जलं न रक्तं गिरस्मारणात्॥ यदा पुनः क्ष
त्रियादिभिः प्रातिलोम्येन व्यभिचारिता ब्राह्मण्याघाः प्रतिपादयति तदा गोवधप्रायश्चित्तानि पूर्वाश्र
स्यानि॥२५॥

मि०प्रा० १३७

स्वयमनिचारितब्राह्मण्यादिवधे विशेषमाह ॥ अप्रदुष्टामिति ॥ परशरीरसंपर्केणादुष्टामीषदनिचारिणीं ब्राह्म-
णीं विकामव्यापादयति तदा शूद्रहत्याव्रतं षाण्मासिकं कुर्यात् ॥ इदं च षाण्मासिकं अकामतो
ब्राह्मण्या व्यापादने क्षत्रियादिवधे च कामकृते द्रष्टव्यं ॥ कामतो वैश्यावधे तु ईषदात् । कामतः शूद्रावधे तु षण्मा-
सकसाधारणप्रायश्चित्तं पंचगव्याशनं । यदा कामतो ब्राह्मणीं व्यापादयति तदा सार्द्धमासिकं क्षत्रियादीनां
तु अकामतो व्यापादने त्रैमासिकं सार्द्धमासं सार्द्धमासं सार्द्धद्विदिनानि ॥ यथाह प्रचेताः ॥ अन्नतुमती

अप्रदुष्टां स्त्रियं हत्वा शूद्रहत्याव्रतं चरेत् ॥ ॥

ब्राह्मणीं हत्वा कृच्छ्रपादं षाण्मासान्वेति ॥ क्षत्रियां हत्वा षाण्मासान्मासत्रयं वेति । वैश्यां हत्वा मासत्रयं सार्द्ध-
मासं वेति । शूद्रां हत्वा सार्द्धमासं सार्द्धमासं सार्द्धद्विदिनानि वेति ॥ यत्तु हारीतेनोक्तं षडुणो राजन्ये शूद्रे तु
त्रयं चीर्णे वैश्ये मासद्वयं शूद्रे इति प्रतिपाद्योक्तं तद्विषयं ॥ ब्राह्मणीं पुंश्चलीं व्रतस्थां या यागस्थां वेश्या
स्त्रीं हत्वा नवमासानिस्यकं तद्विकर्मसाधनतादिगुणयोगिनीं कामतो व्यापादने द्रष्टव्यं ॥ अकाम-
कृतं कल्प्यं ॥ आत्रेय्यां तु अङ्गुष्ठं दिनान्याह ॥ यस्मिन्व्रतसागत ॥ विकीर्णकपद्यैनिधेयानुपपातकप्राणिवधे

१३८

ति ॥ अस्थिमतां प्राणिनां कलायाप्रवृत्तीनां अप्रमुक्तनिःसृतीनां सहस्रं हत्वा अनस्थिमतां पुरुकमनडु-
त्वामनाकप्रवृत्तीनां अनडाकटं तत्सरिपूर्णमात्रं हत्वा व्रतं षाण्मासिकं ब्राह्मणं ब्रह्मचर्यं चरेत् ॥ एवं चाधेनुर्दद्या-
दस्य हत्वमिति परिमाणनियमात्ततोधिकवधे निरिकं कल्प्यं ॥ अर्वाक् पुनः अनेकवधे तु किंचिद्देयमस्थि-
वधे एवं प्राणायामस्त्वनस्थिके इति वक्ष्यति । तथानस्थिमतामनडुत्वेन चोदितं जंतुविषयं ॥ अस्थिमतां अस्थि-
षुणीदिजंतुवधे तु एकैकस्मिन्कीटवयोहत्ये मादिनामालिनीकरणीयानि ॥ अनिधाय मालिनीकरणी मे पुनःसाय

अस्थिमतां सहस्रं तु तथानस्थिमतां मनः ॥ ११ ॥ मार्जारगोधानकुलमं
डूकांश्च पतत्रिणः ॥ हत्वा त्र्यहं पिबेत्क्षीरं कृच्छ्रं पादिकं चरेत् ॥ १२ ॥ ॥

वकस्त्रैर्म्मिहमिति मन्त्रकं द्रष्टव्यं ॥ १ ॥ मार्जारइति ॥ मार्जारादयः सिद्धाः पतत्रिणः चाषकाकोलूकाः तान्ह-
त्वाग्नि रात्रेपयः पिबेत् पादकृच्छ्रं वा चरेत् ॥ वाराहपोजनगमनादिकं वा कुर्यात् ॥ यथाह मनुः ॥ पयः पिबे-
त्त्रिरात्रं वा योजनं वाध्वनो व्रजेत् ॥ उपस्पृशेत्स्रवन्त्यां वा सूक्तं वाब्दैवतं जपेदिति ॥ इदं च प्रत्येकं वधविषयं ॥ अस-
कृदिनवधे तु मार्जारनकुलौ हत्वा त्वा पंमंडूकमेव च ॥ श्वगोधोलूककाकांश्च शूद्रहत्याव्रतं चरेदिति मन्त्रकं षा-
ण्मासिकं द्रष्टव्यं ॥ यत्तु नर्वसिष्ठेनोक्तं । श्वमार्जारमंडुकनकुलसर्पदहर ॥ ॥

मि० प्रा०
२४७

मूषिकान् हत्वा कृच्छ्रं चरेत् ॥ किंचिद्वृत्तपादिविनिकामतो ग्राम्यविषयं वेदितव्यं ॥ दहरो मूषिक
श्छुछुन्दरी वा ॥ २३ ॥ किंच ॥ गजे इति ॥ गजनिपातादिनिमित्तं पंच नीलवर्णान् वृषान् दद्यात् ॥ शुके पक्षिणि द्विवर्षो वत्सः ॥ खर
अजमेषेषु व्यापादितेषु प्रत्येकमेको वृषः ॥ क्रौंचे च पक्षिणि त्रिहायनो वत्सः देयः इति सर्वत्रानुषंगः ॥ मनुना
प्य त्रिवर्षो पंचकः ॥ वासो दद्यात् पंचदश पंच नीलान् वृषान् गजं ॥ अजमेषावनड्वाहं खरं हत्वैकहायनमिति
॥ २४ ॥ किं च ॥ हंस इति ॥ क्रव्यं मांसमेषामस्तीति क्रव्याद् व्याघ्रशृगालादिमृगविशेषः ॥ अक्रव्यादस्तत्पर्याया हंसश्ये

गजे नीलवृषाः पंच शुके वत्सो द्विहायनः ॥ खराजमेषेषु वृषो देयः क्रौंचे त्रिहायनः ॥ २३ ॥
हंसः श्येनः कपिः क्रव्याज्जलस्थलशिखंडिनः ॥ भासं च हत्वा दद्याद्गामक्रव्यादस्तु वत्सिकां ॥ २४ ॥

नसमभिव्याहारात् कंकगृध्रादिपक्षिविशेषः प्रसिद्धः ॥ जलग्राहेन जलचारा बकादयो ग्राह्या ॥ स्थलचरा
दिनस्थलचरा बलाकादयः ॥ शिखंडी मयूरो भासः पक्षिविशेषः प्रसिद्धाः ॥ एषां प्रत्येकवधे गामेकां दद्यात् ॥ अ
क्रव्यादस्तु हरिणादिमृगान् ॥ खंजरीटादिपक्षिविशेषान्वा वत्सतरीं दद्यात् ॥ तथा च मनुः ॥ हत्वा हंसं बला
कं बकं बर्हिणमेव च ॥ वानरं श्येनभासौ च स्पर्शयेद्ब्राह्मणाय गां ॥ क्रव्यादस्तु मृगान्हत्वा धेनुं दद्यात्पयस्वि
नीं ॥ अक्रव्यादो वत्सतरीमुष्ट्रं हत्वा तु कृष्णलमिति ॥ २४ ॥ ॥

शिव०
२४०

॥ उरगे इति ॥ सरीसृपेषु व्यापादितेषु योमयो दंडस्तीक्ष्णाग्रो देयः ॥ पंडके नपुंसके व्यापादिते त्रपुसी
सकं च माषपरिमितं दद्यात् ॥ पलालभारं वा पंडकं हत्वा पलालभारं वा त्रपुसीसकं वा दद्यात् ॥ इति स्मृत्यंत
रे दर्शनात् ॥ यद्यपि पंडको लिंगहीनः स्यात् संस्काराद्यभावेन भवति देवलवचनसामान्येनैव स्त्रीपुल्लिंगरहि
तो निर्दिष्टस्तथापि न गोब्राह्मणरूपस्य पंडस्य वध इह ॥ गोब्राह्मणवधनिषेधस्य जातमवच्छेदेन प्रवृत्तेर्लिंगविर
हितपंडे जातिस्सत्वात्तापि विशेषानन्निमित्तमेव लघुप्रायश्चित्तं लिंगविरहितपक्षिणामेव विहिता

उरगेष्वायसो दंडः पंडके त्रपुसीसकं ॥ कोले घृतघटो देय उष्ट्रे गुंजा हयेंऽशुकं ॥ २५ ॥ तित्तिरौ तु तिलद्रो
णं गजादीनामशक्नुवन् ॥
: स्मृत पक्षिमनिव्याहाराद् ... कोले सूकरे व्यापादिते घृतकुंभो देयः ॥ उष्ट्रे गुंजा
देया ॥ वाजिनि व्यापादिते सकंशुकं वस्त्रं देयं ॥ तथा च मनुः ॥ अक्रव्याद् ... सर्पं हत्वा द्विजो
मः ॥ पलालभारकं षंढे सीसकं चैव माषकमिति ॥ २५ ॥ किंच ॥ तित्तिराविति ॥ तित्तिरौ पक्षिणि व्यापादि
ते तिलद्रोणं दद्यात् ॥ द्रोणश्चाढकचतुष्टयपरिमाणविशेषवचनः ॥ अष्टमुष्टिर्भवेत्किंचित्किंचिदष्टौ तु पुष्कलं ॥ पुष्क
ना

त्तिकृत्वा शिश्नावकः परिकीर्त्तितः ॥ चतुरष्टकोनवेत्रोगात् इत्येतमान्मानजन्तूनामितिस्मरणात् ॥ पूर्वोक्ता
नां गजैर्नां व्यापादने निर्दहननीलकंठषंपंचकादिदानं कर्तव्यमत्र कुर्वन् प्रत्येकं कृच्छ्रं न रेदित्युपपर्यकृच्छ्रं
श्वानलनक्षत्रणायांके राक्षवाधे तपोमात्रे इष्टव्यः ॥ तपोसिचगोतमेन दर्शितानि ॥ संवत्सरे प्रस्मासाश्चत्वारश्चैपो
वा केकस्त्वतुर्विंशमाहोके रुद्रादषडदस्त्वहो होरात्रस्तिकाल्पः ॥ एतानेवा वा दोनरे तु विकल्पेन कियेरन्ने नसि
गुरूणि गुरूणि लघूनी लघूनीति ॥ परिकृच्छ्राब्देन मुख्य एवार्थो गृह्यते ॥ न हिं गजे शुके चाविशेषेण प्राजापत्यं एव स्या

द्दानेदानु बचरे न्कृच्छ्रमेकैकस्य विशुद्धये ॥ ६ ॥ फलपुष्पान्नरसजे सत्वघाते घृताशनं ॥

त्रयचनतुक्तं ॥ तयोर्मात्रपरत्वेन दानगुरुलघुनावेकालनपानपश्चो पिगुरुलघुनावेयुज्यते ॥ तस्मात् गजे दैवमा
सिकं यावत्कालानं शुक्रे तु उपवास इति ॥ एवमसमत्रापि दानानुसारेण प्रायश्चित्तं कल्प्यं ॥ ६ ॥ किंच ॥ फलइ
ति ॥ अदुंबरादौ फले चमधुकादौ चकुसुमे चिरच्छिस्थिते सत्कारस वचो वरसे चगुडादौ यानि सत्वानि त्र
णि ते जायंते तेषां घातने घृतप्राशनं शुद्धिसाधनं ॥ इदं च घृतप्राशनं भोजनकार्य विधौ यत्तेषां प्रायश्चित्तानां
रूपत्वाद्दर्शितं ॥ ततपोरूपत्वं तु गिरसे प्रायश्चित्तपरनिबंधमाजेन प्रायोनाम तपः प्रोक्तं चित्तं निश्च
यउच्यत ॥

स्थयपसंयुक्तं प्रायश्चित्तमनुच्यते इति प्राणि प्रायश्चित्तं स्मानंत्यात् दृष्टकोष्टेन वक्तुमशक्यत्वान्नामा
सं न प्रायश्चित्तमाह ॥ किंचिदिति ॥ अस्थिमतां कृकलासादि प्राणिनां सूनमदस्त्रसंख्यानां प्रत्येकवधे किं
चित्स्वल्पं धान्यं हिरण्यादिकं देयं अनस्थिके वेकः प्राणायामः ॥ तत्र किंचिदिति पदं हिरण्यं दीयते तस्य माणं
अस्थिमतां वधे प्राणो देयः इति सुमंतुस्मरणात् ॥ पदानुधान्यं तदाष्टमुष्टि देयं ॥ अष्टमुष्टिर्भवेत्किंचिदिति स्म
रणात् ॥ एतच्चानुक्तनिःकृति प्राणिवधविषयं ॥ यत्र तु प्रायश्चित्तविशेषः एवश्रूयते तत्र सर्वत्र ॥ यथाह परा

किंचिन्नास्थिवधे देयं प्राणायामस्त्वनस्थिके ॥ ७ ॥ ॥

शरः ॥ हंससारसचक्राक क्रौंचकुर्कुटघातकः ॥ मयूरमेषौ हत्वा च एकनक्तेन शुध्यति ॥ मंडुंचटिहिभं
चैवशुकं पारापतं तथा ॥ अटिकां चबकं हत्वा शुध्येदेनक्तभोजनात् ॥ वायसकपोतानां मारीतित्तिरघातक
त्तंनक्तेन संध्ये प्राणायामेन शुध्यति ॥ गृध्रश्येनविहंगानां मुलूकस्य च घातकः ॥ अपक्वाशी दिनं
तिष्ठेत्रीकालं मारुताशनः ॥ हत्वा मुषकमार्जारसर्पाजगरडुंडुभान् ॥ प्रत्येकं भोजयेद्विप्रान्लोहदंडश्च द
क्षिणा ॥ गोधाकच्छपगोधानां घातकः ॥ हंतात्मकलगुंजांशी अहोरात्रेण शुध्यति ॥ शोहि
वरो लोहो मविवाकम् घातने ॥ ॥

वृकतेबुककुलालाणां नरवानांच घातकः ॥ तिलप्रस्थं द्विजे दद्याद्वायुभक्षो दिनत्रयं ॥ गजमेधनुमेषतुरंगो
ष्टगर्दभानां निपातने प्रायश्चित्तं विमहेण त्रिमिन्धं चावगाहने ॥ खरं वानरसिंहानां चित्रकव्याघ्रघातकः ॥ शु
द्धिमेति त्रिरात्रेण ब्राह्मणानां च भोजनेनेति ॥ एवमपि स्मृत्यंतरे संदेशकालाद्यपेक्षया विषमसमत्वेन कल्प
नीयः ॥ २७॥ इंधनार्थं द्रुमच्छेदस्तु उपपातकेषु उक्तो हिंसाप्रसंगेनानेन तत्र स्वकम्पवित्तमप्युपात्तम्
त्र प्रायश्चित्तमाह ॥ वृक्षेति ॥ फलदानाम् अपनमारि वृक्षगुल्मादीनां चपद्यवृक्षार्थं विनाच्छेदने वृत्तेः

वृक्षगुल्मलतावीरुच्छेदने जप्यमृक्शतं ॥ स्यादोषधीवृथाच्छेदी क्षीराशी गोनुगो दिनं ॥ ७ ॥

वृक्षादीनां रानेन रूपितत्वं । कूर्षधीनां वृथामारणपादीनां वृथैव छेदने दिनं कृत्स्नमवर्गावीपरिचर्यायम
नुगम्या तेषां क्षीरं पिबेत् ॥ आहारोन रपरिमागेन पंचयज्ञाद्यर्थेन दोष एव च फलादिवारेणापप्रेणमिपु
वृक्षं फलदानां वृक्षाणां छेदने जप्यमृक्शतं ॥ गुल्मवल्लीलतानां च पुष्पितानां च वीरुधामिति मनुस्
मरणात् । वृक्षेष्वपि कर्षणं गतेन्तल्याघवनदोषः ॥ फलपुष्पोपभोगाम्मारपादिहिंसाकर्षणा
...पहमारि निवमिष्टस्मरणात् । यत्र तु स्थानविशेषादं ढाधिकं तत्र प्रायश्चित्ताधिकं कल्पनीयं ॥ यथो
...ग्रानसीमासु पापस्थानेसु गजये ॥ ॥ ॥

मि॰ प्रा॰
१५२

...णाणां द्विगुणो दमो वृद्धोपविश्रुत इति ॥ अयं च कृच्छ्रत जपो द्विजातिविषयो न पुनः शूद्रादिविषयस्ते
...जपेनधिकारात् ॥ अतस्तेषां दंडानुसारात् द्विनिरात्रादिकं कल्पनीयं ॥ उपपातकमध्ये विशेषतः पाठ
स्यानर्थक्यपरिहारार्थमुपपातकसाधारणप्राप्तं प्रायश्चित्तमप्यत्र भवति । तच्च गुरुलाघवमासविषयंक
ल्प्यं ॥ २७॥ पुंश्चलीवानरादिवधप्रसंगात्तद्दंशनिमित्तं प्रायश्चित्तमाह ॥ पुंश्चलीति ॥ पुंश्चल्यादयः प्रसि
द्धाः एतैर्दष्टः पुमान् जले प्राणायामं कृत्वा घृतं प्राश्य विशुध्यति । आदिग्रहणाच्छृगालादीनां ग्रहणं ॥ यथाह

पुंश्चलीवानरखरैर्दष्टः श्वोष्ट्रादिवायसैः ॥ प्राणायामं जले कृत्वा घृतं प्राश्य विशुध्यति ॥ २७७ ॥

मनुः ॥ श्वशृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च । नराश्वोष्ट्रवराहैश्च प्राणायामेन शुध्यति ॥ अयं च घृतप्राशने
जनशक्त्यपायेर्दष्टः ॥ प्रायश्चित्तानां तपोरूपत्वेन शरीरसंतपनार्थत्वात् ॥ एतदशक्तिविषयं ॥ श्वशृगालमृगम
हिषाजाविकखरकरभनकुलमार्जारमुषिकाप्लवकाकदष्टपुरुषाणामापोहिष्ठीयाभिः स्नानं प्राणायामं च
यीचेति सुमंतुवचनं तन्नाभेरधःप्रदेशदष्टविषयं ॥ यच्चांगिरोवचनं ब्राह्मणस्तु शुना दष्टः त्र्यहं सायं पयः पि
बेत् ॥ गृहस्थस्य द्विरात्रं तु एकाहं योगिहोत्रवान् ॥ नाभेरूर्ध्वं तु दष्टस्य तदेव द्विगुणं भवेत् स्यादेतत् त्रिगुणं व
से मस्तके तु चतुर्गुणमिति ॥ ॥

मि०प्रा०
१९३

तत्सम्यग्दृष्टविषयं॥ क्षत्रियवैश्ययोस्तु पादपादपादन्यूनं कल्पनीयं॥ शूद्राणामपि चोपवासेन शुद्धिर्दिनेन चापुनः
गवां दत्वा वृषं चैकं ब्राह्मणाय विशुध्यतीत्यङ्गिरसोक्तं द्रष्टव्यं॥ पत्तु वसिष्ठवचनं॥ ब्राह्मणस्तु शुना दष्टो न
दीं गत्वा समुद्रगां। प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यतीति तदुत्तमांगदंशविषयं॥ स्त्रीणां तु ब्राह्मणी
शुना दष्टा जंबुकेन वा। उदितं ग्रहनक्षत्रं दृष्ट्वा सद्यः शुचिर्भवेदिति पराशरोक्तं द्रष्टव्यं॥ कृच्छ्रादिव्रतस्थायाः पु
नस्तत्रैव विशेषो दर्शितः॥ त्रिरात्रमेवोपवसेच्छुना दष्टा तु सुव्रती। सघृतं यावकं भुक्त्वा व्रतशेषं समापयेदिति
॥ रजस्वलायामपि विशेषस्तत्रैव दर्शितः॥ रजस्वला यदा दष्टा शुना जंबुकरासभैः। पञ्चरात्रं निराहारा पञ्च
गव्येन शुध्यति॥ ऊर्ध्वं तु द्विगुणं नाभेर्वक्त्रे तु त्रिगुणं तथा। चतुर्गुणं स्मृतं मूर्ध्नि दष्टे नान्या श्रुतिर्विदितिर्॥ अत्र
यत्रारजस्वलावस्थायां यत्तु श्वादिभिः स्त्रीणां दीनोपहन्यते तत्र ख्यातान पेन विशेष उक्तः॥ शुना घ्रातावा
लीढस्य नखैर्विलिखितस्य च। अद्भिः प्रक्षालनं प्रोक्तमग्निना चोपचूलनं। उपचूलनं तापनं॥ यदा तु श्वादिद
ष्टाघातादिजनितव्रणे कृमयः समुत्पद्यन्ते तदा तत्र तु न विशेष उक्तः॥ ब्राह्मणस्य व्रणद्वारे पूयशोणितसंभवे क्रि
मिः समुत्पद्यते यस्य प्रायश्चित्तं कथं भवेत्॥ गवां मूत्रपुरीषेण त्रिसंध्यं स्नानमाचरेत्॥ त्रिरात्रं पंचगव्याशीत्यधोना
भिरुत्पतिता निकं गं तरो स्त्रूते व्रणे कृमिः समुत्पद्यते कृमी। षडात्रं तदा प्रोक्तं प्राजापत्यं शिरो व्रण इति॥ तत्र श्वादिदंष्ट्र
प्रायश्चित्तानन्तरमिदं कर्तव्यं॥ श्वाघ्राणदंशेनजनितव्रणे तदेवत्र्यहं पंचगव्याशनादिकं शक्तिविशेष

[damaged]

...धातुविच्छेदकरं दण्डप्रायश्चित्तप्रसंगाद्ब्रह्मचारिणश्चरमधातुविच्छेदकस्कन्दने प्रायश्चित्तमाह॥ यन्मेऽद्य रेत इति
...दं कथं चित्स्त्रीयोगमन्तरेणापि स्रवाच्चरमधातुर्विसृष्टः॥ तदा तत्स्कन्नो रेतोऽभिमन्त्रयेत यन्मेऽद्य रेतः पृथिवी
पुनर्मामैत्विन्द्रियमित्याभ्यां मन्त्राभ्यामभिमंत्रयेत्॥ तेन चाभिमंत्रितेन रेतसा स्तनयोर्भ्रुवोश्च मध्यमुपक
निष्ठिकया स्पृशेत्॥ अत्र मेतु स्कन्नस्मरेतसोऽशुचित्वेन स्पर्शकर्मणः प्रयोग्यत्वात्तेनैतेनानामिकासाहचर्यबुद्धिष्ठा
गुष्ठपरत्वेन व्याचक्षते तेनांगुष्ठेनानामिकया चेति॥ अङ्गुष्ठपदग्रहणे व्रततं गप्रसंगात्तेनेति निर्दिष्टमिति

यन्मेऽद्य रेत इत्याभ्यां स्कन्नं रेतोऽभिमन्त्रयेत्॥ स्तनान्तरं भ्रुवोर्मध्यं तेनानामिकया स्पृशेत्॥ २०॥

इ सत्यां अङ्गुष्ठस्याबुद्धिस्थत्वान्न च शब्दसन्निहितपरित्यागेनार्थाद्बुद्धिस्थस्यान्वयो युक्तस्तदुक्तं॥ गम्यमाना
नस्य चार्थस्य नैव शब्दं विशेषणं॥ शब्दान्तरैर्विभक्त्या वाह्यूमो यं ज्वलतीवदिति॥ न च रेतसोऽशुचित्वेन स्पर्शा
योग्यत्वविधानादेव प्रायश्चित्तरूपस्पर्शायोग्यत्वमेव गम्यते॥ प्रायश्चित्तरूपं पानस्येव सुरायाः इदं च प्रायश्चि
त्तं गृहस्थस्यैव कामतः स्कन्नविषयं। ब्रह्मचारिणः स्वप्ने जागरणावस्थायां गुरुप्रायश्चित्तस्याबुद्धस्माणत्वा
त्॥ यत्तु यमवचनं॥ गृहस्थः॥ कामतः कुर्याद्रेतसः स्कन्दनं भुवि। सहस्रं तु जपेद्देव्याः प्राणायामैस्त्रिभिः सहेति त
त्कामकारविषयं॥ २०॥ ॥

शिव०
१९३

किं चामयीति। स्वीयं प्रतिबिंबमंबुगतं चेद्दृष्टं तदा मयि तेज इति छायां स्वां दृष्ट्वाम्बुगतां जपेत्। सावित्रीमशुचौ दृष्टे चा
पल्ये चानृतेऽपि च। इंद्रियमिती मां मंत्रं जपेत्॥ अशुचिद्रव्यदर्शने पुनः सावित्रीं सविन्द्रदेवत्यां तत्सवितुरित्यादिकां
कं च जपेत्। तथा वाक्पाणिपादादिचापल्यकरणे तामेव जपेत्॥ अनृते तत्कामकारेण द्रष्टव्यं। अकामकृते तु
सुप्त्वा च भुक्त्वा च निष्ठीव्योक्त्वानृतानि च। पीत्वापोऽध्येष्यमाणश्च आचामेत्प्रयतोऽपि सन् इति मनूक्तमाचमनं द्रष्ट
व्यं। यत्तु संवर्तवचनं। क्षुते निष्ठीवने चैव दंतश्लिष्टे तथानृते। पतितानां च संभाषे दक्षिणं श्रवणं स्पृशेदि

मयि तेज इति छायां स्वां दृष्ट्वाम्बुगतां जपेत्॥ सावित्रीमशुचौ दृष्टे चापल्ये चानृतेऽपि च॥२१॥

ति तदल्पप्रयोजनत्वाभिप्रायं॥ स्त्रीशूद्रविट्क्षत्रवधानंतरं निंदितार्थोपजीवनं पठितं। तत्र मनुयोगी
श्वरप्रोक्तासूपपातकप्रायश्चित्तातिदिष्टातिजातिभ्रंशकरगुणापेक्षया वेदितव्यानि॥ नास्तिकेऽपि तानि प्रा
यश्चित्तानि तथैव योज्यानि। नास्तिक्यशब्देन च वेदादिनिंदनं न तु जीवनमुच्यते॥ तत्रोत्पन्नाप्यपि वसिष्ठ
प्रायश्चित्तांतरमप्युक्तं। उपपातकप्रायश्चित्तान्यमासविषयाणि। यच्च कृच्छ्रं संवत्सरेणोक्तं॥ नास्तिको ना
[illegible]तिः कृतघ्नः कूटव्यवहारी मिथ्याभिशंसी त्येते पंच संवत्सरं ब्राह्मणगृहे भैक्षं चरेयुरिति॥ ॥

रतेन नास्तिको नास्तिकवृत्तिरिति प्रक्रम्य पंचतपोन्नावकान्नाजलान्नायामनुतिष्ठेयुः॥ ग्रीष्मावषाहिमं
[illegible]तो। तदुनयमप्यन्नान्निनिवेदनेन बहुकालाभ्यासविषयं॥२७॥ नास्तिक्यानंतरं व्रतलोपस्तत्रावकीर्णित्वमा
प्रसक्तसिद्धितत्तल्लक्षणकथनपूर्वकं प्रायश्चित्तमाह॥ अवकीर्णीति॥ ब्रह्मचार्युपकुर्वाणको नैष्ठिकश्चासौ
योषितं गत्वावकीर्णी भवति। स चरमधातोर्विसर्गोऽवकीर्णं तदस्यास्तीति सोऽवकीर्णी स निर्ऋतिदेवतेन ग
र्दभेन पशुना यागं कृत्वा शुध्यति गर्दभस्य पशुत्वसिद्धेः पुनः पशुग्रहणमयपशुकल्पस्त्याश्वलायनगृह्योक्त

अवकीर्णी भवेद्गत्वा ब्रह्मचारी तु योषितं॥ गर्दभं पशुमालभ्य नैर्ऋतं स विशुध्यति॥२२॥ ॥

पशुधर्मप्राप्त्यर्थं॥ एतच्चारण्ये चतुष्पथे लौकिकेऽग्नौ रक्षोदैवतं गर्दभं पशुमालभनेति वसिष्ठस्मरणात्॥
तथा रात्रावेकाकिविकल्पेन यष्टव्यं। तथा च मनुः। अवकीर्णी तु काणेन गर्दभेन चतुष्पथे पाकयज्ञविधा
नेन यजेत निर्ऋतिं निशीति। पशोरवदानेन चरणायष्टव्यं नैर्ऋतं चावदानानि निर्वपेत्। तस्य जुहुयात् कामाय स्वाहा
।कामकामाय स्वाहा। निर्ऋत्यै स्वाहा। रक्षोदेवताभ्यः स्वाहेति वसिष्ठस्मरणात्। तस्याग्निविषयं॥ शाकलमपु
नर्गर्दभेनावकीर्णी निर्ऋतिं चतुष्पथे यजेत। तस्याजिनमूर्ध्ववालं परिधाय लोहितपात्रः सप्त गृहान् भैक्षं चरेत्॥

मि० प्रा० १५५

कर्माचक्षाणः संवत्सरेण शुध्येदिति ॥ गौतमोक्तवार्षिकं तपः समुचितं तपश्चर्या गर्द्दभरूपं द्रष्टव्यः ॥ तथा त्रिषव
णस्नानमेककालं भोजनं च द्रष्टव्यं ॥ एतस्मिन्नेव सिद्धान्ते वसिष्ठो गर्दभाजिनं सप्तागारं चरेद्भैक्षं स्वकर्म परि
कीर्तयेत् ॥ तच्च लब्धेन भैक्षेणावर्तयेदेककालिकं ॥ उपस्पृशेत्त्रिषवणमब्देन स विशुध्यतीति मनुस्मरणात् ॥
इदं च वार्षिकं क्षत्रियब्राह्मणपत्न्यां वैश्यायां च क्षत्रियपत्न्यां द्रष्टव्यं ॥ यदा तु गुणवत्यां ब्राह्मण्यां क्षत्रियो
ऽवकिरति तदा त्रैवार्षिकं द्वैवार्षिकं च क्रमेण योज्यं ॥ यथाह मनुः ॥ शंखलिखितौ ॥ गुप्तायां वैश्यायामवकीर्णः
संवत्सरं त्रिषवणमनुतिष्ठेत् क्षत्रियायां द्वे वर्षे ब्राह्मण्यां त्रीणि वर्षाणीति ॥ यत्तु गिरीवचनं ॥ अवकीर्णनिमित्तं तु
ब्रह्महत्याव्रतं चरेत् ॥ चीरवासास्तु षण्मासांस्तथा मुच्येत किल्विषादिति ॥ तदकामतो मानवाद्विकविषयं वा
ऽसत्यव्यभिचारितासु पुनः स्वैरिणीषु पत्न्यामवकीर्णः सचैलः स्नात उदकुम्भं दद्यात् ॥ ब्राह्मणाय वैश्या
यां चतुर्थकालाहारो ब्राह्मणान्भोजयेद्यवसभारं च गोभ्यो दद्यात् ॥ क्षत्रियायां तु त्रिरात्रमुपोषितो घृतपा
त्रं दद्यात् ब्राह्मण्यां षड्रात्रोपोषितो गां दद्यात् गोष्ठेऽवकीर्णः प्राजापत्यं चरेत् षंडायामवकीर्णः पलालभा
रं सीसमाषं च दद्यादिति शंखलिखितोदितं वेदितव्यं ॥ एतच्चावकीर्णप्रायश्चित्तं त्रैवर्णिकस्यापि ब्र
ह्मचारिणः समानं ॥ अवकीर्णी द्विजो राजा वैश्यश्चापि खरेण तु ॥ इष्ट्वा नैर्ऋतयज्ञेन … शुध्यन्त्यब्दात्तु स
… इति शाण्डिल्यस्मरणात् ॥ यत्पुनर्मनोगमतरेण कामतश्चेरमधातुर्विसृष्टिर्दिवास्वप्नेवा

शिव० १५

…न्तरेनैकृत्स्नयागमात्रं द्रष्टव्यं ॥ तदेव रेतसः प्रयत्नोत्सर्गे दिवास्वप्ने वा तिवसिष्ठेन यागमात्रस्यातिदिष्टत्वा
…त्तान्तरेषु च कृच्छ्रं चान्द्रायणं ॥ दिविहितं ब्रह्मचर्ये पुंस्कंदने सत्ये तदेव यागमात्रं व्रतान्तरेषु चैव मिति तैनैवा
तिदिष्टत्वात्स्वप्नस्कंदने तु द्रष्टव्यं ॥ स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः ॥ स्नात्वार्कमर्चयित्वा त्रिः पुनर्मा
मित्येतां जपेदिति वानप्रस्थादीनां चेदमेव ब्रह्मचर्यखंडनेऽवकीर्णिव्रतं कृच्छ्रत्रयाधिकं भवति ॥ वानप्र
स्थो यतिश्चैव खंडने सति कामतः ॥ पाराकत्रयसंयुक्तमवकीर्णिव्रतं चरेदिति शाण्डिल्यस्मरणात् ॥ यदा तु गा
र्हस्थ्याश्रिपरिग्रहेणात्मा च्युतो भवति तदा संवर्तोक्तं द्रष्टव्यं ॥ समस्थ दुर्मतिः कश्चित्प्राजापत्यं व्रजेद्यदि स
कुर्यात्कृच्छ्रमश्रान्तः षण्मासान्ब्रह्मनंतरमिति ॥ प्रत्यापत्तिर्गार्हस्थ्यपरिग्रहः ॥ अत एव वसिष्ठः ॥ यस्तु प्रव्रजि
तो भूत्वा पुनः सेवेत मैथुनं ॥ षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः ॥ तथा पाराशरः ॥ यः प्रत्यवसितो वि
प्रः प्रव्रज्यासो विनिर्गतः ॥ अनाशकनिवृत्तश्च गार्हस्थ्यं चेच्चिकीर्षति ॥ स चरेत्त्रीणि कृच्छ्राणि चान्द्रायण
नि त्रीणि जातकर्मादिभिः सर्वैः संस्कृतः शुद्धिमाप्नुयादिति ॥ तत्र ब्राह्मणस्य षण्मासिकः कृच्छ्रः क्षत्रियस्य त्रा
यणं त्रयो वैश्यस्य कृच्छ्रत्रयमिति व्यवस्था ॥ अथवा ब्राह्मणस्यैव संवत्सरात्प्रागूर्ध्वं मासाधिकमपेक्ष्य व्य
वस्थितं प्रायश्चित्तत्रयं द्रष्टव्यं ॥ तथा मरणसमासिनामपि यमेन प्रायश्चित्तमुक्तं ॥ जलाग्न्युद्बन्धन च
भ्रष्टाः प्रव्रज्यानाशकच्युताः ॥ विषप्रपतनप्रायशस्त्रघातच्युताश्च ये ॥ नवैते प्रत्यवसिताः सर्वलोकबहि

ःकृताः चांद्रायणेन शुध्यंतीति प्रकृच्छ्रद्वयेन वेति॥ इदं चांद्रायणं तप्तकृच्छ्रद्वयात्मकं प्रायश्चित्तद्वयं गुर्वाद्यपेक्ष
याव्यवस्थितं विज्ञेयं। ब्रह्मघातहतास्रेति पाठः॥ तदात्मसमागाधुत्रा स्त्रीयमरणनिमित्तस्तत्पुत्रादेरुपदेशेनद
ष्टव्यः॥ यत्पुनर्वसिष्ठेनोक्तं। यावत्त्वात्मत्यागी कृच्छ्रं द्वादशरात्रं चरेत्त्रिरात्रं वोपवसेदिति॥ तदप्यध्यवसितब्रा
स्त्रीयमरणस्यैवकर्णविज्ञीवनेनात्मापेक्षयाद्रष्टव्यं। अथवाऽध्यावसायमात्रे त्रिरात्रं ब्रह्मादिक्षतस्य द्वादश
रात्रमिति व्यवस्था॥ इदं चावकीर्णिप्रायश्चित्तं गुरुदारतत्समव्यतिरिक्तागम्यागमनविषयं। तत्र गुरुतरप्रा
यश्चित्तस्यदर्शितत्वात्॥ नचपुनरावकीर्णिव्रतेतेन दारत्रावषाधिपनोधमहापातकनिर्हरणमुचितं। नचब्र
ह्मचारित्वोपाधिकं लघुप्रायश्चित्तविधानमिति युक्तं॥ आश्रमांतराणां द्वैगुण्यादिहदे ब्रह्महत्याप्रकरणेद
र्शितत्वात्। नचान्यागम्यागमनप्रायश्चित्तं पृथक्कर्तव्यं॥ अब्रह्मचारिणो योषिति ब्रह्मचर्यस्खलनस्यागम्या
गमनांतरीयकत्वात्॥ अतोऽन्यत्रापि यास्मिन्निमित्तांतरं समन्तूनं वावरूपं नावितत्वयात्रैमित्तिकं युज्यते॥
तथावगर्धर्पनरेकृच्छ्रमिति कृच्छ्रं निपातने कृच्छ्रातिकृच्छ्रौ समकाले कृच्छ्रौ संतरणेणेतितद्वत्तत्रेणेणेनोत्तादेनैनि
मित्तेश्चवगौरणनिपातलक्षणं॥ ॥श्रीगोपीजनवल्लभायनमः॥ ॥

॥त्रद्वयमवरूपं नावित्वात्रैमित्तिकं कृच्छ्रमिति कृच्छ्रं च न प्रयुंक्ते॥ एवमन्यत्राप्यूहनीयं। यत्र पुनर्निमित्तानामं
तर्नाविनियमो नैमित्तिनत्वश्यनैमित्तानियथा पदापर्वणि। पर्वणि परनार्यामारजस्वलायांतेलानकेक्षि
जलेगच्छतीति॥ ननु ब्रह्मचारिणो योषिति ब्रह्मचर्यस्खलनस्यागमनांतरीयकत्वं नास्त्येव। पुत्रिकागमनेगम्या
गमनेद्दोषाभावात्॥ तथाहि पुत्रिकान कन्या दत्तयोनित्वात्। नापि विधवा भर्तृमरणाभावात्। नापि विनिपाद्दत
इत्रित्वात्॥ अतः पुत्रिकायाः कृच्छ्रं ननर्नावादप्रतिषिद्धेतितत्रैवविज्ञुतस्यकेवलमवकीर्णिव्रतं॥ अमत्रविज्ञुत
स्यनिमित्तांतरसन्निपाताद्वकीर्णिव्रतं नैमित्तिकांतरं च प्रयोक्तव्यमिति तदसत्॥ पुत्रिकायाअपिपरनार्या
संतर्नावात्। प्रदानाभावेऽपि विवाहसंस्कारेण संस्कृतत्वाद्धर्मादिविवाहपरिणीतावत्। न च यस्यास्तु न भवे
द्भ्राता न विज्ञायेत वा पिता॥ नोपगच्छेत्तां प्राज्ञः पुत्रिकाधर्मशंकयेति निषेधात्संगोत्रास्विव नार्यत्वं नोपपद्यत इ
तिवाच्यं॥ दृष्टार्थत्वात्तन्निषेधस्य असंग्राहिप्रतिषेधवत्। दृष्टार्थत्वं च पुत्रिकाधर्मशंकयेति हेतूपादानात्॥ न
च पुत्रार्थमेव परिणयनमपि तु धर्मार्थमपि॥ अतश्चौरसादि पुत्रस्यमनन्यार्यस धर्मार्थं पुत्रिकापरिणयने को
विरोधः॥ प्रपंचितं चैतदस्मत्पुरस्तादिदमलं प्रसंगेन तस्माद्ब्रह्मचारिणो योषिति ब्रह्मचर्यस्खलनस्यागम्यागम
नांतरीयकत्वान्नष्टयकनैमित्तिकं प्रयोक्तव्यमिति॥ २२॥ ॥

मुक्तं ब्रह्मचारिप्रायश्चित्तप्रसंगादन्यदुपपातकप्रायश्चित्तमाह॥ भैक्षाग्निरिति॥ यस्त्वनातुर एव ब्रह्मचा
रि निरंतरं सप्तरात्रं भैक्षमग्निकार्यं वा सजत्यसौ कामावकीर्णोस्मि कामकामाय स्वाहा॥ कामावपन्नोस्मि
अवपन्नोस्मि कामकामाय स्वाहेति एताभ्यां मंत्राभ्यामाज्याहुती हुत्वा। सं मा सिंचतु मरुतः समिंद्रः सं बृहस्पति
ः सं मायमग्निः सिंचतां पयसा ब्रह्मवर्चसेनेत्यनेन मंत्रेणाग्निमुपतिष्ठेत्॥ एतच्च गुरुपरिचर्यादिगुरुत
रव्यग्रकार्यतया अकारणे द्रष्टव्यं यदा त्वव्यग्र एवानैत्याग्निकार्यं त्यजति तदाभ्यकृत्वा भैक्षचरणमसमि

भैक्षाग्निकार्ये त्यक्त्वा तु सप्तरात्रमनातुरः॥ कामावकीर्ण इत्याभ्यां जुहुयादाहुतिद्वयं॥ २८१॥

ध्यं च पावकं॥ अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेदिति मानवं द्रष्टव्यं॥ यज्ञोपवीतादिनाशे तु हारितेन प्राय
श्चित्तमुक्तं॥ मनोव्रतपतिभिश्चतस्र आज्याहुतीर्हुत्वा पुनर्यथार्थं प्रतिपादयेत्तद्भेदनाजिनेमुद्रितेनिनि
र्मुक्ते वा। नेदिवास्वप्नेनग्नस्त्रीदर्शनेन नग्नस्नापेन श्मशानमाक्रम्य हयादीनारुह्य पूज्यातिक्रमे चैतानिरेव जुहु
यादग्निसमिंधनेस्थावरसरीसृपादीनां यद्देवा देवहेडनमिति कुष्मांडीभिराज्यं जुहुयात्॥ मणिवासोगवा
दीनां प्रतिग्रहे सावित्र्यष्टकसहस्रं जपेदिति। मनोव्रतपतीभिरिति मनोज्योतिरित्यादिमनोलिंगाभिस्त्वमग्ने
व्रतपा असीत्यादिव्रतलिंगाभिरित्यर्थः॥ ॥ द्वि० व०
१८७

र्थं प्रतिपादितमुपनयोक्तमार्गेण समंत्रकं ग्रहणीयादित्यर्थः॥ यज्ञोपवीतं विना भोजनकरणे तु ब्रह्म
सूत्रं विना भुंक्ते विण्मूत्रं कुरुते॥ गायत्र्यष्टसहस्रेण प्राणायामेन शुध्यति॥ ब्रह्मचारिणां मधुमांसभक्षणे कृ
च्छ्रः कार्यस्तदनंतरमवशिष्टानि च व्रतानि समापयेत्॥ एतच्च शिष्टभोजनागर्हणाकादिमांसभक्षणविष
यं॥ ब्रह्मचारी चेन्मांसमश्नीयादुच्छिष्टं भोजनीयं कृच्छ्रं द्वादशरात्रं चरित्वा व्रतशेषं समापयेदिति वसिष्ठस्म
रणात्॥ द्वादशरात्रश्च ग्रहणमतिपूर्वाभ्यासापेक्षयातिकृच्छ्रपराकादेरपि प्राप्त्यर्थं॥ यदा तु मांसे कोपनो घ

उपस्थानं ततः कुर्यात्सं मा सिंचत्वनेन तु॥ ॥

माध्वनिवृत्तस्तदा मांसस्य गुरोरुच्छिष्टं कृत्वा न ग्रहणीयं॥ स चेद्व्याधीतदाकामं गुरोरुच्छिष्टं भैषज्यार्थं सर्वं
प्राश्नीयादिति तेनैवोक्तत्वात्॥ सर्वग्रहणं मांसजन्यनाद्यनद्याभावनार्थं॥ तच्च ग्रहणेन चापगतव्याधि
रादित्यमुपतिष्ठेत। तथा च बोधायनः॥ येनेच्छेत्तु चिकित्सितं स यदा गदो भवति। तदोत्थायादित्यमुपति
ष्ठेत। हंसः शुचिषदिति मधुनोप्यत्रान्नतः प्राशनेपि पत्नीनैदोषः॥ अकामोपनतं मधु वाजसनेयके न दु
ष्यतीति वसिष्ठस्मरणात्॥ अन्यस्मृतकान्नादिभक्षणे प्रायश्चित्तं तत्रत्तणप्रायश्चित्तेनैव ग्राम:॥ आज्ञाप्र
तिघातादिना गुरोः प्रतिकूलमाचरत्परुषभाषणपातादिना गुरुं प्रसाद्य विशुध्यति॥ ॥

मि०प्रा०
१४८

ब्रह्मचारिप्रायश्चित्तप्रसंगाद्गुरोरपि प्रायश्चित्तमाह॥ कृच्छ्रत्रयमिति॥ यत्तु गुरुः शिष्यं रोगव्याप्तत्याकुलं प्रदेशे
सांद्रतरांधकाराकुलितनिशीथावसरे कार्यार्थं शिष्यं प्रेरयति। स च तया प्रेरितो दैवान्म्रियते तदासौ गुरुः कृच्छ्रा
णां प्राजापत्यादीनां त्रयं कुर्यात्॥ न पुनस्त्रिः प्राजापत्यं तथा सति शिष्यस्य निवेशिनी संख्यानुपपन्ना स्यात्॥ न
चैकादशप्रयाजानामजतीतिवत्॥ अष्टत्वपक्षसंख्येति चतुरस्रं॥ स्वरूपप्रयुक्तं संनवसाष्टत्वपेक्षयाष्टमा
न्यावाप्रापदीयमुत्तमत्वगतासंख्यास्यात् तदास्मादपि कथं विशाष्टत्वपेक्षा किं तु स्वनिगतेयं॥ अस्मिंस्त्र

कृच्छ्रत्रयं गुरुः कुर्यान्म्रियते प्रहितो यदि॥
क्रियमाणोपकारे तु मृते विप्रे न पातकं॥२४॥

आहुतीर्जुहोतीति वस्तुस्वरूपपृथक्त्वापेक्षायेवन्नवसंख्याघटनायुक्ता॥ सकलहिंसाप्रायश्चित्तमाह॥
क्रियमाण इति॥ आयुर्वेदोपदेशानुसारेणौषधपथ्यान्नप्रदानादिभिश्चिकित्सकादिना क्रियमाणेनत्प
कारे यस्य ब्राह्मणादेस्तस्मिन्कथंचिन्मृतेऽपि नैव पातकं भवति॥ विप्रग्रहणं प्राणिमात्रोपलक्षणं॥ अत एव
[illegible]रोगचिकित्सार्थं मूढगर्भविमोचने। यत्ने कृते विपत्तिः स्यान्न स पापेन लिप्यत इत्यादि संवर्ताद्युक्तं
[illegible]स्वपंचितं प्राक्॥२४॥ ॥

प्रा०वृ०
१४८

...नेत्रां सिप्रायश्चित्तविवक्षया तदुपयोग्यार्थवादं तावदाह॥ मिथ्याभिशंसिन इति॥ यस्तु परोत्कर्षेर्ष्या
न रोषकलुषितांतःकरणो जननसमक्षं प्रकाशयति न स्यात् मानकिमदोषत्वात्कं। तथा चापस्तंबः॥ दो
षं बुध्वा न पूर्वः परेभ्यः पतितस्य समाख्याने पतितः स्यात् परिहरेत्त्वेनं धर्मेषु इति न केवलं मिथ्याभिशंसि द्विगुणदो
षभाक्॥ अपि तु मिथ्याभिशस्तस्य यत्समाद्दुःकृतजातं तदपि समाहरति इति वक्ष्यमाणप्रायश्चित्तेऽर्थवादः न पु
नः पापद्वैगुण्यादिप्रतिपादनमत्र विवक्षितं॥ तन्निमित्तस्य लघुत्वाल्लघु प्रायश्चित्तमुपदेक्ष्यमाणत्वात्कृ

मिथ्याभिशंसिनो दोषो द्विः समो भूतवादिनः॥ मिथ्याभिशस्तदोषं च समादत्ते मृषा वदन्॥२५॥
महापापोपपापाभ्यां योऽभिशंसेन्मृषा परं॥

तनौग्रो कृतागमब्रसंगाच्च॥२६॥ तत्र प्रायश्चित्तमाह॥ महा
पाप इति॥ यस्तु महापापेन ब्रह्महत्यादिना गोवधाद्युपपापेन वा मृषैव परमभिशंसति स मासं यावज्जल
ग्रासोपवासी जितेंद्रियश्च भवेत्॥ जपश्च शुद्धवतीनां कार्यः॥ ब्राह्मणमनेनेताभिशस्यपतनीयेनोपपत
नीयेन वा मासमब्भक्षः शुद्धवतीरावर्तयेदश्वमेधावभृथं वा गच्छेदिति वसिष्ठस्मरणात्॥ महापापोपपापग्र
हणमन्येषामप्यतिपातकादीनामुपलक्षणं॥ एतच्च ब्राह्मणस्यैव ब्राह्मणेनाभिशंसने कृते द्रष्टव्यं॥ ॥

मि०प्रा०
१५८

यदा तु ब्राह्मणः क्षत्रियादेरभिशंसनं करोति क्षत्रियादिर्वा ब्राह्मणस्य तदा प्रतिलोमापवादे बुद्धिगुणत्रिगुणाद
मा ॥ वर्णानामानुलोम्येन तस्मादर्धार्धहानितः इति दंडानुसारेण प्रायश्चित्तहानिर्द्रष्टव्या कल्पनीयो ॥ गु
ताभिशंसिनस्तु पूर्वोक्तार्थवादानुसारेण दंडानुसारेण च तदर्धं कल्पनीयं ॥ तथा पातकाभिशंसिन एतदे
वव्रतं पादोनं पातकाभिशंसिनस्त्वर्धं उपपातकाभिशंसिनस्तु परस्तुरीयो ऽंशः ब्रह्महत्यायाश्च त्रिपस्यार्धे

अब्दं स्त्री मासमासीत मन्त्रजापी नियतेन्द्रियः ॥२८॥ ॥

स्त्री तस्तूपपातकं कृत्वा क्षत्रियादिवधे महापातकप्रायश्चित्ततुरीयांशस्य दर्शनात् ॥ एवं प्रकीर्णकाभि
शंसिनेस्तूपपातकार्धं कल्पनीयं ॥ ब्राह्मणे ... प्रायश्चित्तं कल्पयेदिति स्मरणात् ॥ यत्तु शंखलि
खिताभ्यां नास्तिकः कृतघ्नः कूटव्यवहारी ब्राह्मणवृत्तिघ्नो मिथ्याभिशंसी चेत्येते पञ्च वर्षाणि ब्राह्मणगृहेषु
भैक्षं चरेयुः ॥ संवत्सरं नैत्यं अत्रीयुः ॥ षण्मासान्वा गान्वनुगच्छेयुरिति गुरुप्रायश्चित्तमुक्तं तदभ्यासतार
तम्यविषयतया योजनीयं ॥२८॥ ॥

शि०
१५९

...मिथ्याभिशंसिप्रायश्चित्तप्रसंगादभिशस्तप्रायश्चित्तमाह ॥ अनिशस्त इति ॥ यः पुनर्मिथ्याभिशस्तः स कृच्छ्रं प्राजा
...पत्यं चरेत् ॥ अग्निदैवत्येन वा पुरोडाशेन यजेत ॥ वायुदैवत्येन वा पशुना एषां च पक्षाणां शक्तिसंनिपातापेक्षया व्य
वस्था ॥ यत्तु वसिष्ठेन मासमब्भक्षत्वमुक्तमेतेनैवाभिशस्तो व्याख्यात इति ॥ तदाभिशस्तस्यैव किंचित्कालम
कृतप्रायश्चित्तस्य सतो द्रष्टव्यं ॥ संवत्सराभिशस्तस्य दुष्टस्य द्विगुणो दम इति दंडातिरेकदर्शनात् ॥ यत्तु पैठी
नसिनोक्तं ॥ अनृतेनाभिशस्तः स्यान्मासं कृच्छ्रं चरेन्मास उपपातकेषु महापातकेषु द्विमासमिति ॥ तत्पिवसि

अनिशस्तो मृषा कृच्छ्रं चरेदाग्नेयमेव वा ॥ निर्वपेच्च पुरोडाशं वायव्यं पशुमेव वा ॥२९॥

ष्ठेन समानविषयं ॥ यत्तु बोधायनेनोक्तं ॥ पातकाभिशंसने कृच्छ्रस्तदर्धमभिशस्तस्येति तदुपपातकादि
विषयमज्ञानविषयं वा ॥ एवमन्येषामपि उच्चावचप्रायश्चित्तानामभिशस्तविषयाणां कामाकामाद्यपेक्ष
या व्यवस्था विज्ञेया ॥ यथाह मनुः ॥ षष्ठान्नकालता मासं संहिताजप एव वा ॥ होमाश्च शाकला नित्यमपाङ्क्त्यानां
विशोधनं ॥ अपाङ्क्त्यानां मध्ये अभिशस्ताः पठिताः ॥ यद्यप्यत्राभिशस्तस्य निषिद्धाचरणं नोपलभ्यते ॥ त
थापि मिथ्याभिशस्तत्वलिंगानुमितप्राग्भवीयनिषिद्धाचरणनिबन्धनमिदं प्रायश्चित्तं कर्मनिष्ठानामविच्छिन्नवि
रोधः ॥२९॥ ॥

मि॰ प्रा॰
१५०

किंच ॥ अनियुक्त इति ॥ यस्तु नियोगं विना भ्रातुर्ज्येष्ठस्य कनिष्ठस्य वा नार्यां गच्छति स चान्द्रायणं चरेत् ॥ तत्र स
कृदमतिपूर्वविषयं द्रष्टव्यं ॥ यत्तु गौतमवचनं ॥ परिवित्तिपरिवेत्त्राच संवत्सरं ब्राह्मणगत्वे कृच्छ्रं चरेत् ॥ ज्येष्ठ
नार्यां पाम नियुक्तो गच्छेत्तस्यैव कनिष्ठनार्यां च नित्यकामकारविषयं ॥ यः पुनरुक्तो रजस्वलागमने त्रि
रात्रमुपोष्यांते घृतं प्राश्य विशुध्यतीति इदमकामतः सकृद्गमनविषयं नैत्रैवाभ्यासे रजस्वलागमने सप्तरा
त्रमिति ज्ञातातपोक्तं द्रष्टव्यं ॥ कामतः सकृद्गमनेप्येतदेवापस्तंबवृहत्संवर्त्तोक्तं ॥ रजस्वलां तु यो गच्छेद्गर्भिणीं

अनियुक्तो भ्रातृजायां गच्छेच्चान्द्रायणं चरेत् ॥ त्रिरात्रांते घृतं प्राश्य गतोदक्यां विशुध्यति ॥ २९१ ॥

पतितां स्तथा ॥ तस्य पापविशुध्यर्थमतिकृच्छ्रं विशोधनमिति तत्कामतोभ्यासविषयं ॥ यत्तु नः शंखेन त्रै
मासिकमुक्तं पादस्तु शूद्रहत्याया उदक्यागमने न तथैवेति ॥ न कामतो संतानविच्छिन्नाभ्यासविषयं ॥ र
जस्वलायास्तु रजस्वलादेः स्पर्शे प्रायश्चित्तं स्मृत्यन्तरोक्तं द्रष्टव्यं ॥ तथा च वसिष्ठः ॥ स्पृष्ट्वा रजस्वलेन्योन्यं सगो
त्रैकभर्तृके ॥ कामादकामतो वापि सद्यः स्नानेन शुध्यतः इति ॥ असमपत्न्योस्तु सवर्णयोरकामतः स्नानम
तु सावर्णायाः स्पृष्टा चेत्स्यादुदक्यायास्तस्मिन्नेवाहस्तात् शुद्धिमाप्नोत्यसंशयमिति ॥ ॥

स्मरणात् ॥ यत्तु कश्यपवचनं ॥ रजस्वला तु संस्पृष्टा ब्राह्मण्या ब्राह्मणी यदि ॥ एकरात्रं निराहारा पंचग
व्येन शुध्यतीति तत्कामकारविषयं ॥ असवर्णास्पर्शे तु वृद्धवसिष्ठेन विशेषो दर्शितः ॥ स्पृष्ट्वा रजस्वलान्योन्यं
ब्राह्मणी शूद्रजापि च ॥ कृच्छ्रेण शुध्यते पूर्वा शूद्रा दानेन शुध्यतीति ॥ दानेनेति पादकृच्छ्रेणाल्पवृत्त
निकचतुर्थांशदानेन शुध्यति ॥ स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी वैश्यजापि च ॥ पादहीनं चरेत्पूर्वा कृच्छ्र
पादं तथोत्तरा ॥ स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी क्षत्रियापि च ॥ कृच्छ्रार्धाच्छुध्यते पूर्वा उत्तरा तु त्र्यहेन तु ॥ स्पृ
ष्ट्वा रजस्वलान्योन्यं क्षत्रिया शूद्रजापि च ॥ उपवासैस्त्रिभिः पूर्वा त्वहोरात्रेण चोत्तरा ॥ स्पृष्ट्वा रजस्वला
न्योन्यं क्षत्रिया वैश्यजापि च ॥ त्रिरात्राच्छुध्यते पूर्वा त्वहोरात्रेण चोत्तरा ॥ स्पृष्ट्वा रजस्वलान्योन्यं वैश्या शूद्रा
तथैव च ॥ त्रिरात्राच्छुध्यते पूर्वा उत्तरा तु दिनद्वयात् ॥ ब्राह्मणीनां कामतः स्पर्शे शुद्धिरेषा पुरातनी ॥ अकामत
स्तु द्विस्नानेनोक्तं स्नानमात्रं रजस्वला हीनवर्णां रजस्वलां ॥ स्पृष्ट्वा न तावदश्नीयाद्यावन्न शुद्धा स्यात्
॥ सवर्णामधिकवर्णां वा स्पृष्ट्वा सद्य एव शुध्यतीति ॥ चंडालादिस्पर्शे तु वृद्धवसिष्ठेन विशेष उक्तः ॥ पतितान्त्य
श्वपाकेन संस्पृष्टा चेद्रजस्वला ॥ तान्यहानि अतिक्रम्य प्रायश्चित्तं समाचरेत् ॥ प्रथमेह्नि त्रिरात्रं स्याद्द्वितीये त्र्य
हमेव च ॥ अहोरात्रं तृतीयेह्नि परतो नक्तमाचरेत् ॥ शूद्रयोच्छिष्टया स्पृष्टा शुना वा स्पृष्टमाचरेदिति ॥ ताम
हानिमतिक्रम्य प्रायश्चित्तं समाचरेत् ॥ अनौदकेन तीर्थेन यावत् ॥ एतत्कामतः स्पर्शविषयं ॥ अका

मतस्तु रजस्वलां तु संस्पृष्ट्वा चाण्डालान्त्यजवायसैः। तावत्तिष्ठेन्निराहारा यावत्कालेन शुध्यतीति बोधाय
नोक्तं द्रष्टव्यं॥ यत्तु नस्तेनैवोक्तं रजस्वलां तु संस्पृष्ट्वा ग्रामकुक्कुटशूकरैः॥ श्वभिस्नात्वा क्षिपेत्तावद्याव
च्चन्द्रस्य दर्शनमिति तद्दशाकविषयं॥ यदा तु भुञ्जानायाः श्वादिस्पर्शनं भवति तदाप्यसंतरेवित्रिराप
उक्तः॥ रजस्वला तु भुञ्जाना श्वाद्यांत्यादिस्पर्शनं भवति श्वानमार्जारसंस्पृष्टो घरिणो मृत्रयावत्काहारयद्रात्रेणैव
शुध्यति॥ अत्रोक्ताकाचनं स्याद्विषेमोवापि नो जनेमिति॥ यदा तु छिष्टयाः परस्परं स्पर्शनं भवति तदा तु छिष्टे
छिष्टसंस्पृष्टा कह्यचित्स्त्री रजस्वला॥ कृच्छ्रेण शुध्यते पूर्वा शुद्धा दानैरुपोषिते इत्यविशेषोक्तं द्रष्टव्यं॥ यदा तु छिष्ट
नरजस्वलां स्पृशति तदा द्विजानुकथंचिदुच्छिष्टान्रजस्त्रीयदि संस्पृशेत्॥ अधोच्छिष्टे त्वहोरात्रमूर्ध्वोच्छिष्टे
त्र्यहं क्षिपेदिति मार्कण्डेयोक्तं द्रष्टव्यं॥ एवमवकीर्णिप्रायश्चित्तप्रसंगात्कृतिविदनुपपातके कृतप्रायश्चि
त्तानामपि व्यवहार्यत्वमनुस्मरामः॥ तत्रावकीर्णनं तरं सुतानां चैव विक्रय इत्युक्तं तत्रमनुयोगीश्वरो
क्तानि त्रैमासिकादीनि कामाकामकृतित्वाद्यपेक्षया पूर्ववद्व्यवस्थापनीयानि॥ यत्तु शंखवचनं। वीक्रि
...पकंगां चकृच्छ्रं सांतपनं चरेदिति। तदुनयमप्यापद्यकामतो द्रष्टव्यं॥ देवगुह्यपतिश्रयोद्यानारा
...तातडागपुष्करसेतुसुतविक्रयं कृत्वा तं छृकृच्छ्रं चरेदिति॥ ॥

...तु नारीणां विक्रयं कृत्वा चरेच्चांद्रायणव्रतं। द्विगुणं तु पुरुषस्यैव व्रतमाहुर्मनीषिण इति चतुर्विंश
...क्तं द्रष्टव्यं॥ यत्तु पैठीनसिनोक्तं आराम तडागोदपान पुष्करिणी सुकृतसुतविक्रये त्रिषव
णस्नाय्यधःशायी चतुर्थकालाहारः संवत्सरेण पूतो भवतीति तदेकपुत्रविषयं॥ तदनंतरं धान्य
कुप्यपशुस्तेयमित्युक्तं तत्प्रायश्चित्तानि स्तेयप्रकरणे प्रपंचितानि॥ २८॥ अनंतरमयाज्यानां च य
जनमित्युक्तं तत्प्रायश्चित्तमाह॥ त्रीनिति॥ यस्तु सावित्रीपतितानां याजनं करोति स प्राजापत्यव्रत

त्रीन्कृच्छ्रानाचरेद्व्रात्यायाजकोभिचारन्नपि॥ ॥

त्रीस्त्रीन्कृच्छ्रानाचरेत् तेषां च गुरुलघुभूतानां कृच्छ्राणां त्रित्वनिमित्तगुरुलघुभावेन कल्पनीयं॥ तथा
भिचरन्नपि श्येनादिनैव प्रायश्चित्तं कुर्यात्॥ तत्र चायं विशेषः घातनाव्यतिरेकेण षट्सु स्तनेनाभिचरन्नतीतिविशिष्ट
रणात्॥ अपि त्रात्योहीनयाजकांसेष्टियाजयोः संग्रहार्थः॥ अत एवोक्तं मनुना॥ व्रात्यानां याजनं कृत्वा परेषाम
न्त्यकर्म च। अभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहतीति॥ परेषामन्त्यकर्मेत्संतानासविषयं शूद्रांत्यकर्मविषयं
वायं प्रायश्चित्तस्य गुरुत्वात्। अहीनो द्विरात्रादिद्वादशाहपर्यंतो हर्गणयागः॥ यत्तु शातातपेनोक्तं पतितसावि
त्रीकान्तोपन

मि०प्रा० येनाध्यापयेत्तं याजयेद्वा एनानुपनयेदध्यापयेद्याजयेद्वा स उद्दालकव्रतं चरेदिति तत्कामकारविषयं ॥ उ
१५२ द्दालकव्रतं च प्रागुदर्शितं ॥ एतच्च कृच्छ्रत्रयं साधारणोपपातकप्रायश्चित्तस्यापवादकं ॥ अतउपपातकसा
धारणप्रायश्चित्तं शूद्राद्ययाजनेव्यतिष्ठते तत्र कामतस्त्रैमासिकं अकामतस्तु योगीश्वरोक्तं प्राजापत्यमि
ति प्रचेतसा ॥ शूद्रयाजकादिति पञ्चमीकं एतेषं च न पोष्यावकान्नाजननाध्ययनानुतिष्ठेयुः ॥ क्रमेणाग्नी
न्वयादिमन्त्रेषु मासं गोमूत्रयावकमश्नीयुरिति तत्कामतो मासविषयं ॥ यत्तु यमेनोक्तं ॥ पुरोधाः शूद्रवर्गा

वेदश्रावीयवाग्राह्यं सकामाचरणागतं ॥ २०॥ ॥

सर्वाक्षरेणायः प्रवर्तते ॥ वेदाद्वर्षसमं गोदानं सम्यक्कृच्छ्रो विशोधनमिति ॥ तदकामकविषयं ॥ यत्तु पैठीनसि
नोक्तं शूद्रयाजकः सर्वद्रव्यपरित्यागात् पूतो भवति ॥ प्राणायामसहस्रेण पुत्रान्तकृत्वो ऽभ्युतिष्ठेदिति ॥ तदप्यका
मतो मासविषयं ॥ यत्तु गौतमेनोक्तं ॥ निषिद्धमन्त्रप्रयोगे सहस्रवाक्सवेदिति निषिद्धादीनां पतितादीनां या
जापनात्मके मन्त्रप्रयोगे बहुशो मासं प्राकृतेष्वतं तन्त्रं तत्सच्चर्युपदिष्टं ॥ तत्कामतो मासविषयं ॥ प्रा० १५२
विप्रावपतिग्रहरक्ता मोपितस्कवातिरिक्तं शरणागतमुपेक्षते सोपि संवत्सरं यवोदनेनैव जानः श्रु
यति ॥ तत्र ॥

म पर्वचण्डालश्रोत्रियकात्राद्यनध्यायेष्वध्ययनं ॥ उत्कर्षहेतोरपि यानस्य किंचिदसिनासितं तत्पे से
प्रयोगदानं चाविज्ञाय न मुच्यते ॥ अतएवोक्तं स्मृत्यन्तरे रहस्यानुयोगान्नधेनुः पतितान्मनुरब्रवीदिति य
धुवसिष्ठेनोक्तं ॥ पतितचण्डालश्वावरणे त्रिरात्रं वाग्यतो ऽनश्नन्नासीरन् सहस्रपरमं वा तदभ्यसन्तः
पूता भवन्तीति विज्ञायत इत्यनेनैव गर्हिताध्यापकयाजका व्याख्याता ॥ इति तस्मात्त्र पूता भवन्तीति विज्ञा
यत इति तद्बुद्धिपूर्वविषयं ॥ परासप्याद्यमन्तरागमनमात्रे न भवति न पुनस्तत्राधीतेन तत्प्रायश्चित्तं यमेनोक्तं
सर्पस्य नकुलस्य श्वशृगालमार्जारयोस्तथा ॥ मूषकस्य तथा ढ्रम्स मण्डूकस्य तथोषितः ॥ पुरुषस्यैडकस्यापि
शुनो ऽश्वस्य खरस्य चाप्यन्तरागमने सद्यः प्रायश्चित्तमिदं शृणु ॥ त्रिरात्रमुपवासस्त्रिसन्ध्याश्वानिषेचनं ॥ ग्रा
मान्तरं वा गन्तव्यं ज्ञानुमान्नात्र संशय इति ॥ पितृसुतमागतडागारामविक्रयेषु मनुयोगीश्वरोक्तोपपातक
प्रायश्चित्तानि पूर्ववत् ॥ जातिशक्तिगुणाद्यपेक्षया योज्यानि ॥ तत्र पितृमात्रादिसागमस्यकारणोपस्थित
मातापित्रोर्गुरोस्तथा ॥ इत्यत्र मध्यमपापात्तन्निमित्तमपि प्रायश्चित्तं भवति ॥ यथाह मनुः ॥ षष्ठान्नकालता
मासं संहिताजप एव वा ॥ होमश्च शाकलो नित्यमपाङ्क्त्यानां विशोधनमिति ॥ अपांक्तश्वाश्वादकाण्डे स्तेनपति
तक्लीवास्तिकवादिवैरशीलिना ॥ तडागारामविक्रये पुत्रकलत्रविक्रये प्रायश्चित्तानि सविषयाणि सुतविक्रि

मि॰ प्रा॰ १५३ प्रायश्चित्तान्यस्मरेकथितानि॥ अनंतरं कमादुपपातिनुक्तं तत्रैव त्रैमासिकं द्वैमासिकं चांद्रायणं निवर्णा
निमवर्णविषयेयोज्यानि॥ आनुलोम्येपुनर्मासिकं पयोव्रतं प्राजापत्यंवामकामास्वनुलोमासुनरोत्पन्न
मध्याधमइतिदंडापस्तंबदर्शनात्॥ यत्तुव्याघ्रेणोक्तं कन्याहस्वीसोमविक्रयी कृच्छ्रमाचरेयातामिति॥ यच्चहारी
तवचनं॥ कन्याहृषीसोमविक्रयीद्विषपत्नीपतिः कौमारदारत्यागीसुरामद्यपः शूद्रयाजकोगुरोः प्रतिहंता नास्ति
कः कृतघ्नः कूटव्यवहारीब्राह्मणवृत्तिघ्नमिथ्याभिशंसिपतितव्यवहारीमित्रध्रुक् शरणागतघाती ब्रा
तिरूपकस्त्रिरात्रिस्थितेपंचतपोभ्यावकान्नाजलकायनान्ननुतिष्ठेयुश्चीर्णव्रतपादिमंतेषुमासंगोमूत्रेयावकमश्नी
युरितितदुत्पममपिक्षत्रियवैश्ययोः प्रतिलोम्येणदुषणीयोज्यं॥ शूद्रस्यवधएवदुषणेनुकरछेदत्रव्रतमायां
वधस्तयेतिदर्शनात्॥ परिवेदकस्याजनकन्याप्रदानस्योःकौटिल्येन्द्रविप्रोष्टाप्रतिषिद्धव्रतलोपेस्यात्मार्थपाक॥
क्रियारंभेमद्यपस्त्रीनिषेवणेवसाधारणोपपातकप्रायश्चित्तंशाम्यवस्थापनीयं॥ आद्ययोस्तुविशेषश्चा
...निपरिवेदनायाज्ययाज्ययाजनप्रायश्चित्तकर्षणप्रभृत्यादेशविक्रितानि॥ अनंतरंस्वाध्यायसागरस्तु शिव॰
...त्यबस्मनेनात्रान्यत्यागी अधीतस्यचनाशनमितित्रिस्त्रेहसामसंप्रायश्चित्तमुक्तं वास्त्रसवणाद्या १५३
...गेतुत्रैमासिकाद्युपपातकप्रायश्चित्तानिजातिराक्षाद्यपेक्षयाव्यवस्थापनीयानि॥ यत्तुवसिष्ठे

...तीजकृच्छ्रंद्वादशरात्रंचरित्वापुनरुपयुंजीतवेदमाचार्यादितितदसंतापद्विषयं॥ अग्निमागेपिते
...गोदर्तितः॥ योग्नीनपविध्येत्सकृच्छ्रंद्वादशरात्रंचरित्वापुनराधेयंकारयेदितिद्वादशरात्रमहरहरा
...कृच्छ्रंन्नकालापेक्षयाप्राजापत्यादिगुरुलघुकृच्छ्राणांप्राप्यरपंतत्रमासवर्षेप्राजापत्यमासचतुष्टयेत्र
तिकृच्छ्रंषण्मासोच्छेत्रे पराकः॥ यस्मात्माहहृद्योगीश्वरोक्तानुपपातकसामान्यप्रायश्चित्तानिकालाद्य
पेक्षयायोज्यानि॥ संवत्सराद्धर्व्वंतुमासनवेत्रैमासिकंद्वैमासिकेइतिव्यवस्था॥ एतच्चनास्तिकेनस्याग्नि
विषयं॥ तथाचव्याघ्रः॥ योग्निंसजतिनास्तिक्यात्प्राजापत्यंचरेद्विजः इति॥ यदातुप्रमादादाउजतितदाचरवाजन्य
विशेषउक्तः॥ चारायणायमहरात्समाविरात्रात्ततस्तउपवासःस्यात्त्रिंशतिरात्रादतउर्द्धमाषष्ठिरात्रात्स्त्रिरात्रं
रुपवसेरतउर्द्धंकालवहुत्वेदोषबहुत्वमितितदाबालम्यादिनामजनितदापितेनैवविशेषउक्तः॥ अहर
ग्नहानिकमेत्रहेमेपुपवासोमासमात्रातिक्रमेद्वादशाहमुपवासः संवत्सरातिक्रमेपासोपवासः पयोन्न
तेणचेति॥ संवत्सरादुर्द्ध्वंतुहारीतेनविशेषउक्तः॥ संवत्सरंरोछन्नेःग्निहोत्रेचान्द्रायणंकृत्वापुनराधा
नाद्विवर्षोत्सन्नेचान्द्रायणंसोमापनेनवकुर्यात्॥ त्रिवर्षोत्सन्नेसंवत्सरंकृच्छ्रमभ्यस्यपुनराधानमिति
सामायनंकृच्छ्रकांडवद्रूपनें॥ शंखेनापिविशेषउक्तः॥ अग्नमुत्सादिसंवत्सरंप्राजापत्यंचरेद्धेम

मि० प्रा०
१५४

दद्यादिति। सुतत्यागे बंधुत्यागे च त्रैमासिकं गोवधव्रतं कामतः। अकामतस्तु योगीश्वरोक्तं व्रतचतुष्टयं
शक्त्याद्यपेक्षया योज्यं॥ द्रुमच्छेदे प्रायश्चित्तं प्रागुक्तं स्त्रीप्राणिवधवृत्तीकरणादि निर्जीवने तिलेक्षुयंत्र
प्रवर्तने च तान्यव्रतानि तथैव योज्यानि॥ यत्तु बौधायनेनाश्रयाशुचिकराणि॥ घूनिमनिचारेणाश्रंस्छह
त्रिसमाहृत्य स्पृशेदाचर्यातस्य चरुकुलेषामन्त्रं चतुर्मासां समासां यश्चनमध्यापयेति नक्षत्रनिर्देशकं चे
ति। वारस्रमार्द्धमासान्द्वादशाघ्रडहान्द्वादशरात्रमेकाहमित्यशुचिकरनिर्देशात्॥ घुतेत्राणि कित्रतम्
कं। तदस्मास विषयं। यत्तु मनुनेत्तमोक्तं॥ अन्नव्वाकतस्करौ वंदिराजान्नेमोष्ट्वा ग्रोपकष्टत्रिर्गरदो गणि
श्वरयगतारोहणात्त्रिर्गोपजीवी श्वागणिकः श्मशानोपाध्यायो वृषलीपतिर्नांडाकानदाज्ञोपजीवी श्वहत्ति
ब्रह्मजीवी चिकित्सको देवजकः पुरोहितः॥ कितवो मघपः कोटकारको। पशुविक्रयी मनुष्यमस्थिविक्रय
ता चेति तानुद्वरेत्तत्रममेस्मायतो ब्राह्मणाव्यवस्थायामर्वद्रव्यस्त्यागेचतुर्थकालाहारैः संवत्सरं त्रिषवणमु
. . . युक्तस्ता नेदि वपिन्दतर्पणं नाक्रिकंचरेत्सेवं व्यवहार्ये ति॥ तदपि बौधायनेन समानविषयं। अ
. . . ोपः श्वगणेन तीव्रति नांडिकी वंदित्यतिरिक्तो रात्रौ नृपादिभिः स्वनैः प्रतिबोधयिता॥ बंदिनः प्र
यगुपादा॥

शिव०
१५५

. . . स्त्रिसेवकः॥ ब्रह्मजीविद्विजकार्ये पुमूल्येन परिचारकः॥ मनुः कामपि प्रायश्चित्तानि वक्ष्यन्नकामता
. . . मत्वा हितिनिज्ञा निशाश्राद्यपेक्षया योज्यानि॥ नदुक्तं श्रपाकमध्येपि कितवादिव्यसनिनां पतितत्वात्र श्रा
. . . विकयेष्वक्रमेवार्यां च समामान प्रायश्चित्तानि प्रागुक्तवयोज्यानि॥ यत्तु बौधायनेनोक्तं। अमुद्रयानं ब्राह्म
णस्यन्यासापहरणं सर्वपण्येर्व्यवहरणं नृसमन्वतं शूद्रसेवायश्चशूद्रायामभिजायते नरदपसन्नवति॥ तेषां
तु निर्देशः। अश्वतुर्थकालमितरभोजना अपुरपो अपेयुः। सेचनानुकल्पं स्नानासनान्यां विहितेहरंतरस्रते त्रिभि
र्वर्षेस्तदपघ्नंतिपापमिति॥ तबहुकालसेवाविषयं हीनजातिभिः सख्येतूपपातकसामान्यप्रायश्चित्तान्येव।
यत्तु यमेनेतसोक्तं॥ मिश्रनेदकरणादहोरात्रमनश्नन्नहुत्वा पयः पिबेदिति। तदहीनसख्यनेदनविषयं॥ हीन
योनिनिषेवणोप्युपपातकसामान्यप्रायश्चित्तानियोज्यानि॥ यत्तु शातातपेनोक्तं। ब्राह्मणो राजन्यायां
कृच्छ्रं दह्याद्धरात्रं चरित्वा विप्राणां चोपचरेद्वैश्यपापूर्वंत मन्त्रं कृच्छ्रं प्राप्रविंतुकृच्छ्रातिकृच्छ्रं राजन्यश्चोवै
श्यापूर्वा कृच्छ्रमवादशरात्रं चरित्वा निवेशनं चोपपयच्छेत॥ शूद्रा शूद्रा त्वतिकृच्छ्रं वैश्यशूद्रा प्राकृच्छ्रं वादशरा
त्रं चरित्वा तांचापयच्छेदिति। तत्रनिवेशतां मनुरुपपातकसामान्यप्रायश्चित्तेष्वपवस्थितमेव। असाधारणासं
नोगश्वहीनयोनिषेवणमिनुक्तं तत्रापि पश्चैवेपानिगमनेत्राजापत्यं विधीयत इति संबन्धोऽकामकामतो
द्रष्टव्यं॥

कामतस्तु यमोक्तं द्रष्टव्यं॥ वेदस्याग्निगमनं पापं ब्रह्महत्यासमं द्विजातयः॥ पीत्वा मद्यं सकृच्छ्रं त्रिसप्तरात्रं कृच्छ्रोदकेन
तिष्ठेत्॥ उपपातकसामान्यप्रायश्चित्तानि कामकामतो मासोपवासादियाप्यासानि। तत्र मासमासे तु प्रतिनिमित्तं
नैमित्तिकमावर्तत इति मासाभ्यासेन निमित्तनैमित्तिकाष्टतौ प्रसक्तायां लोगाक्षिणा विशेषो उक्तः॥ द्विमासे
द्विगुणं द्विमासि दर्शयिष्यते॥ त्रैमास्ये त्रिगुणं द्विपावत्संवत्सरं नवेत्॥ ततः संवत्सरगुणाया वत्सा पञ्चमा
चरेदिति। अतिपूर्वाष्टत्रीष्टत्रीचतुर्विंशतिमते विशेष उक्तः॥ सकृत्कृत्वेतु यत्प्रोक्तं त्रिगुणं तत्त्रिजिर्दिने॥
मासाभ्यं च गुणं प्रोक्तं षण्मासाद्यानवेत्॥ संवत्सरान्तं चदशाब्दे त्वद्विगुणं नवेत्॥ ततोऽप्येवं प्रकल्प्य
स्याच्छाताप वचो यथेति॥ यत्तु नर्विधेः प्राथमिकाद्द्वितीये द्विगुणं चरेदिति। प्रतिनिमित्तमादृत्ति विधायुक्तं
तन्महापातकविषयमित्युक्तं प्राक्॥ यत्तु यमेन सोधारणस्त्रीगमने मधिकृत्य गुरुतल्पव्रतम्।
इति। ष्टं गुरुतल्पव्रतं केचिच्चान्द्रायणत्रानं गोघ्नमिच्छन्ति केचिदवकीर्णिनः इति॥ एतच्च जन्मप्रभृतिमा
नवधानवच्छिन्नामासविषयं। अनन्तरं यो वानाश्रमवासस्तुक्तं तत्र हारीतेन विशेष उक्तः॥ अनाश्रमी
[illegible] संवत्सरं प्राजापत्यं कृच्छ्रं चरित्वाश्रममुपेयात्॥ द्वितीये द्वितीये कृच्छ्रातिकृच्छ्रमतस्तृतीये चान्द्रायणमिति॥
[illegible] संवत्सरविषयं संवत्सरं तु मासोपपातकप्रायश्चित्तानि कामतो व्यवस्थापनीयानि॥ पराके

चिंतास

[illegible] गमनाधिकपरित्रार्याविक्रयेषु च मनुयोगीश्वरप्रतिपादितोपपातकसामान्यप्रायश्चित्तानि नाति
[illegible] गुणायेपस्तयाव्यवस्थापनीयानि॥ ॥ नार्याविक्रयश्चैषामिसन्नचराद्वेमन्वायुक्तासंस्वनित्र
डानेदितान्नादनाद्युपलक्षणार्थमित्युक्तं तत्रामत्वविषये प्रायश्चित्तविशेषमाह॥ गोष्ठे इति॥ यस्तु सत्व
निग्रदकरोति मन्त्रब्रह्मचर्यपूर्वकोगोष्ठे वसन्गायत्रीजपन्त्रीजोमासं पयोव्रतेन शुध्यति। प्रतिग्रहस्य वास
वेरानुजनितकर्मनिबंधनं तयाचांडालादेः पतितादेश्चतयादेवाकाजनिबंधनं च यथा कुरुक्षेत्रोपरागा

गोष्ठे वसन्ब्रह्मचारी मासमेकं पयोव्रतः॥ ॥

दौ॥ तथा प्रतिग्रहद्रव्यनिबंधनं॥ यथा सुरामेखीमत्राम्पोमत्रान्नयमुख्यादेः॥ यदा तु पतितादेर्मेष्यादिकं
गृह्णाति तदा दिदं गुरुप्रायश्चित्तं द्रष्टव्यं॥ प्रतिकमद्रपदस्वानेनानिमित्तस्य गुरुत्वादानवत्रजपेन नु नासंख्या
विशेष उक्तः॥ जपित्वा त्रीणि सावित्र्याः सहस्राणि समाहितः॥ मासं गोष्ठे पयः पीत्वा मुच्यते सत्प्रतिग्रहादि
ति प्रसत्तदत्रिसहस्रोजपोद्रष्टव्यः॥ मासमिति द्वितीयपात्रिसहस्रसंख्याकस्यजपस्य प्रतिदिवसव्यापित्वा
वगमात्॥ यदा तु मायः हस्तेन त्राह्मणादेः सकाशान्निषिद्धमेध्यादिकं गृह्णाति। पतितादेर्वान्दुष्पादिकंनिषिद्धं
॥

नि० प्रा०
१५६

तदापद्विज्ञान्मतोक्तं द्रष्टव्यं ॥ पवित्रेष्टाविष्णुध्यानिसर्वैर्धारा:प्रतिग्रहं कृत्वापासमभ्युसदावसेत् ॥ षष्ठेका
लेपयोन्नं कृ:पुरेणमासेप्रमुच्यते ॥ तर्पयित्वाद्विजान्कामैःमततं नियतव्रतइति ॥ तत्सर्वविषये न्यासे द्रष्टव्यम
यद्वापतितादेःकुरुक्षेत्रेपरिग्रहोक्तश्याजिनादिप्रतिग्रहविषयं ॥ तथाप्रतिग्रहस्य द्रव्याल्पत्वयाथायश्चित्त
मल्पं ॥ यथाह हारीतः ॥ मलिवासोगवादीनां प्रतिग्रहे मासविप्रष्टसहस्त्रं जपेदिति ॥ तथापद्विज्ञान्मतेपि ॥ मि
त्रामात्रेयहीनेतु पुण्यमंत्रमुदीरयेदिति प्रतिग्रहे पुम्सर्वेषु षष्टौ त्रापरिकल्पयेत् ॥ इदं प्रायश्चित्त जानत

॥ गायत्रीजप्यनिरतो मुच्यते सप्रतिग्रहात् ॥ ३० ॥ जामश्रेयादि दोषेण निंद्यान्नादेश्च व्रात्यतः ॥

संसा गोत्रकाजं द्रष्टव्यं ॥ पक्व हविर्नैनार्जयतिकर्मणाब्राह्मणाधनं तस्योत्सर्गेण शुध्यंति जप्येन तप
सैव चेति मनुस्मरणात् ॥ एवमसपिस्मृतिव्याख्या निंद्यभ्योराजन्या वा सां विषयेषु व्यवस्थापनियानि
॥ ३० ॥ जातीनि ॥ तत्र जातिदुष्टपलांड्वादि निंदा एकामतःसकृत् कृते पलांडु विड्वराहं चेत्सादिचांद्रायणमु
[illegible] मतोमासेतुनिषिद्ध नैवेद्यएतैस्वमिताहिनोक्तं सुरापाणसमंज्ञेयं श्चेत्रं ॥ अकामतःसकृद्भक्ष
[illegible] नं तत्रैवामासेयतिचांद्रायणं ॥ अमसे तानिषट् जग्ध्वा कृच्छ्रं सांतपनं चरेत् ॥ यतिचांद्रा ॥ ॥

[illegible] पेत्रोषेषु पवमेद्रहरितिमनुस्मरणात् ॥ यत्तु वृद्धयमेनोक्तं ॥ षष्टवान्नकिकंनीकव्रश्चनभ्र
[illegible] त्रणशिग्रुकंचैवस्त्रकस्वंडकवकानिच ॥ एतेषां भक्षणं कृत्वा प्राजापत्यं चरेद्विजः इति तत्काम
तःमासविषयं ॥ मस्याश्वमतोजग्ध्वासोपवासस्त्र्यहं द्विपेदिति ॥ योगीश्वरेण कामतःसकृद्भक्षणेत्र्यहसो
कत्वा तूपलांडुःपलाकंशुनमित्यनेकवकं राजसर्षपास्वंत्राकं खुकस्वंडं तदित्रोपोवलिवर्दमायेनानि
दिष्टं ॥ यत्तु यमेनोक्तं ॥ तंडुलीयकंनीकव्रश्चनप्रनवास्तथा ॥ नालिकेरीचश्लेष्मातकफलानि च ॥ वृत्रणशि

योगीन्द्रोक्तं व्रतं तत्रांतं सांप्रतं तु प्रतन्यते ॥ ३१ ॥ ॥

ग्रुकंचैवखड्गास्वंकवकंतथा ॥ एतेषां भक्षणं कृत्वा प्राजापत्यं चरेदिति ॥ तदपि मतिपूर्वीमासविषयं ॥ ना
लिकानालिकेरीचनाकविशेषोपट्टास्यं चा ॥ अकामतःसकृद्भक्षणे तु त्रोषेषूपवसेद्दहरिति मनूक्तं दृष्ट
व्यं ॥ तत्रैवामासे द्वित्रिःकृत्वा ॥ अन्येतोमासे तु मंसमर्गदुष्टं पद्मात्रिक्रियादुष्टमकामतः ॥ तु कास्यवाल
णक्कचित्रचांद्रायणेन शुद्धिःस्यादापस्तंबोब्रवीन्मुनिरिति आपस्तंबस्मरणात् ॥ कामतोमासेद्वि
